संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 117 पुष्पम्

# शिशुपालवधमहाकाव्यानुशीलनम्



प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. शुकदेवभोई

सहसम्पादकः
डॉ. ज्ञानधरपाठकः

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-110016

संस्कृतविश्वविद्यालयग्रन्थमालायाः 117 पुष्पम्

# शिशुपालवधमहाकाव्यानुशीलनम्

प्रधानसम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादक
**प्रो. शुकदेवभोइ**

सहसम्पादकः
**डॉ. ज्ञानधरपाठकः**

**शोध-प्रकाशनविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**( केन्द्रीयविश्वविद्यालयः )**
**नवदेहली-110016**

प्रकाशकः
**शोध-प्रकाशनविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

© प्रकाशकाधीनः

प्रकाशनवर्षम् : 2023

ISBN : 81-87987-94-4

मूल्यम् : ₹ 240.00

मुद्रकः
**डी.वी. प्रिन्टर्स**
97-यू.बी., जवाहरनगरम्, देहली-110007

# प्ररोचना

कविविरिञ्चिप्रपञ्चितेऽस्मिन् काव्यसंसारसञ्चये घण्टामाघविरचितं शिशुपालाभिधानं महाकाव्यं समेषां विदुषाममन्दमानन्दसन्दोहं तनोतीति नास्ति कस्यापि विमतिः। काव्यमिदं विलक्षणकाव्यकलाविलासस्य स्वर्णिमस्वाक्षरं समुद्वहति। काव्यस्यास्य विषयविशेषता, वर्णनापटुता, कलाकुशलता, रसपेशलता, भावविमलता, भाषातरलता, शब्दसरसता, अर्थगम्भीरता, अलङ्कारसफलता, रीतिविचित्रता, गुणसार्थकता, ध्वनि-चमत्कारिता, कविकर्मविलासिता च धूलिधरणीमतिक्रम्य नभश्चुम्बति। अतः शिशुपालवधं भवति अलङ्कृतकाव्यकदम्बस्य प्रतिनिधिभूतम्। तदर्थं साध्विदमुच्यते-

**मेघे माघे गतं वयः।**

अपि च- माघेनेव च माघेन कम्पः न जायते।

अस्मिन् काव्ये माघकवेः बहुशास्त्रदर्शितायाः सफलस्वाक्षरं समुद्वहन्ती विविधशास्त्रान्तरविषयिणी चर्चापि दरीदृश्यते। तेषु शास्त्रेषु न्याय-मीमांसा-दर्शन-वेदान्त-व्याकरण-अश्वविद्या-गजशास्त्रयुद्धविद्यादयश्च अन्तर्भवन्ति। काव्यस्यास्य ऊनविंशतितमे सर्गे प्रयुक्ता विविधाश्चित्रबन्धा निश्चप्रचं विदुषां विस्मयमातन्वन्ति। एष भवति शिशुपालवधस्य शास्त्रीयपक्षः। एतदतिरिच्य काव्यस्यास्य सामाजिक-व्यावहारिकपक्षोऽपि समभावेन उल्लेखनीयोऽस्ति। अक्षमणीयापराधकारणात् शिशुपालस्य दण्डप्राप्तिर्यथा सामाजिकमौचित्यं संसूचयति, दण्डदानार्थं तस्य शतापराधपूर्तिपर्यन्तं भगवतः श्रीकृष्णस्य सधैर्यमपेक्षापि तथा व्यवहारगतपरिपक्वतां प्रतिपादयति। एतेषां

सर्वेषां विषयाणां निष्पक्षमालोचनं केवलं तथ्यनिष्ठचर्चासत्रद्वारा एव सम्भवति यत्तु अस्माकं विश्वविद्यालयस्य साहित्यविभागेन कृतम्।

सम्प्रति महदिदं प्रमोदास्पदं यदस्माकं साहित्यविभागस्य आचार्येण प्रोफेसर-**शुकदेवभोई**महोदयेन शिशुपालवधमाश्रित्य समायोजिते राष्ट्रिचर्चासत्रे समुपस्थापितानां शोधनिबन्धानां पुस्तकरूपेण प्रकाशनं विधीयते। अवसरेऽस्मिन् आयोजकेभ्यः सर्वेभ्यः शुभाभिनन्दनमुपकल्पयामि, पुस्तकस्य बहुलं प्रचारं प्रसारं च कामये।

**प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,

नवदेहली-110016

# सम्पादकीयम्

*क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः* – महाकवेर्माघस्य कालजयिवचनमिदं तस्य शिशुपालवधमहाकाव्ये अक्षरशः समन्वितं दृश्यते। शिशुपालवधं भवति घण्टामाघस्य अशेषशेमुषीविभूषितायाः काव्यकलाविलास-प्रतिभायाः अनन्यनिदर्शनम्। अतः काव्यस्यास्य नित्यनावीन्यं सहृदयसमालोचकेषु सर्वदा सर्वथा च अमन्दानन्दसन्दोहं तन्तन्यते। महाकाव्यमिदमलंकृतकाव्यकौशलस्य सर्वश्रेष्ठमुदाहरणमिति निर्विवादम्। काव्योत्कर्षप्रसङ्गे कविनाने यन्निगदितं तत्तु तस्यैव काव्यकौस्तुभे प्रातिभप्रभे शिशुपालवधे विलसतितराम्। कवेर्भाषया–

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥** (2.86)

वाक्येऽस्मिन् दीपशिखाकालिदासस्य *वागर्थाविव संपृक्तौ* – इति वचनस्य प्रेरणामूलकं प्रतिफलनमेव प्रविलोक्यते। माघस्य काव्यार्थः भावानुरूपः, शब्दाः समुचितार्थद्योतनपराः, वर्णनावैभवं सकलकाव्यकला-कल्पलतायमानं च राराज्यते। काव्योपादानेषु एवंविधः कश्चन बिन्दुः लोचनगोचरतां नायाति यो माघेन न स्पृष्टः। कविताकामिनीकान्तस्य कालिदासस्य उपमा – गङ्गा, कविरवेः भारवेः अर्थगौरव – यमुना, प्रचण्डपाण्डित्यविमण्डितस्य दण्डिनः पदलालित्य – सरस्वती च तीर्थराजसदृशे शिशुपालवधे सम्मिलन्ति। तत एव समालोचकाः समुद्घोषयन्ति– *माघे सन्ति त्रयो गुणाः*। साहित्यिकसमृद्धिं विहाय शास्त्रान्तराणां समावेशसौख्यमपि काव्यस्यास्य समधिकश्रीवृद्धिं संसाधयति। विविधदर्शनानि, गजाश्वादिविषयकानि शास्त्राणि, पुराणतत्त्वानि, न्यायवैशेषिकादयो विषयाश्च काव्येऽस्मिन् यथास्थानं विलसन्ति। अतः काव्यमिदमधिकृत्य गवेषणात्मक-चर्चालोचना सर्वैदैव प्रचलति।

अनेन क्रमेण अस्माकं विद्यापीठपक्षत: 2015 तमे क्रैष्टसम्वत्सरे एका राष्ट्रियसंगोष्ठी आयोजिता आसीत्। तत्र भारतवर्षस्य विविधेभ्य: प्रन्तेभ्य: नैके विद्वांस: समुपस्थाय शोधपत्रवाचनं चक्रु:। तेषु शोधपत्रेषु कानिचिन्निर्वाच्य प्रकाशनमिदं प्रस्तूयते। अवशिष्टानि नु आगामिसंख्यायां प्रकाशयिष्यन्ते। पुस्तकमिदं सदयसहृदयानामानन्दवर्धनाय विश्वनाथस्य कृपयालं भूयादिति आशा।

।। इति शम् ।।

नवदेहली
8.2.2022 दिनाङ्के

विद्वन्मानसोपजीवी
-**प्रो. शुकदेव भोइ**
आचार्य: साहित्यविभागे

# विषयानुक्रमणिका


| विषयः | | पृष्ठसंख्या |
|---|---|---|
| | प्ररोचना | iii |
| | सम्पादकीयम् | v |

**संस्कृत**

| | | |
|---|---|---|
| 1. | **माघकाव्ये न्यायदर्शनम्**<br>– प्रो. विष्णुपदमहापात्रः | **1–9** |
| 2. | **शिशुपालवधे दार्शनिकतत्त्वानां विवेचनम्**<br>– प्रो० कुलदीपकुमारः | **10–16** |
| 3. | **शिशुपालवधमहाकाव्ये भौगोलिकी स्थितिः**<br>– डॉ. सुरेशकुमारशुक्लः | **17–28** |
| 4. | **शिशुपालवधमहाकाव्ये दार्शनिकतत्त्वानि**<br>– डॉ. सच्चिदानन्दस्नेही | **29–33** |
| 5. | **शिशुपालवधमहाकाव्ये वक्रोक्तिविचारः**<br>– डॉ. देवीप्रसादडोबरियालः | **34–41** |
| 6. | **माघकाव्ये गुणविचारः**<br>– डॉ. विनयकुमारमिश्रः | **42–51** |
| 7. | **माघस्याऽऽधमर्ण्यमौत्तमर्ण्यञ्च**<br>– डॉ. सुरेन्द्रपालसिंहः | **52–61** |
| 8. | **शिशुपालवधे महाकविमाघपाण्डित्यम्**<br>– डॉ. सुभाषरतूड़ी | **62–70** |

9. **शिशुपालवधे भौगोलिकस्थानानि** 71-75
- डॉ. अरविन्दकुमारः

10. **शिशुपालवधे राजधर्मः** 76-86
- डॉ. अनिलकुमारः

11. **शिशुपालवधमहाकाव्ये रसविचारः** 87-94
- डॉ. शक्तिशरणशर्मा

12. **महाकविमाघस्य स्थान-कालविचारः** 95-102
- डॉ. संजू शर्मा

13. **शिशुपालवधमहाकाव्ये रीतिविचारः** 103-111
- डॉ. तोषी शर्मा

14. **शिशुपालवधमहाकाव्ये वर्णितं प्रकृतिचित्रणम्** 112-121
- डॉ. स्वाति

15. **शिशुपालवधे सामाजिकमूल्यानां विवेचनम्** 122-136
- डॉ. नरेन्द्रकुमारः

16. **शिशुपालवधे छन्दोविवेचनम्** 137-147
- डॉ. रिंकेशभूदला

17. **शिशुपालवधे अवतारवादः** 148-155
- डॉ. शिप्रा सिंह

18. **शिशुपालवधे शब्दशास्त्रसन्दर्भाः** 156-166
- डॉ. संजयकुमारचौबे

19. **शिशुपालवधे पौराणिकतत्त्वानि** 167-175
- श्रीचन्द्रप्रकाशतिवाड़ी

20. **शिशुपालवधमहाकाव्ये गुणविचारः** 176-182
- श्रीदेवकीनन्दनशर्मा

21. **बृहत्त्रय्यां शिशुपालवधमहाकाव्यस्थानम्** 183-193
- श्रीशैलेन्द्रविक्रमः

22. **शिशुपालवधमहाकाव्ये वक्रोक्तिविचारः** 194–199
– श्री अमितकुमारः

23. **माघे सन्ति त्रयो गुणाः** 200–206
– डॉ. नागेशः

24. **माघे सन्ति त्रयो गुणाः** 207–214
– डॉ. शिवराजः

25. **माघे सन्ति त्रयो गुणाः** 215–220
– डॉ. इमराना परवीन

26. **माघे सन्ति त्रयो गुणाः** 221–227
– डॉ. सुमेधा

✦✦✦

# माघकाव्ये न्यायदर्शनम्

**प्रो. विष्णुपदमहापात्रः**
आचार्यः, न्यायवैशेषिकविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली- 110016

**नतास्मिन् यदुनन्दनः स भगवान् वीरप्रधानो रसः**
**शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना।**
**इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं**
**धन्यो माघकविर्वयं तु कृतिनः तत्सूक्तिसंसेवनात्॥**

इह खलु जगति धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् तस्य मोक्षस्यावाप्तये समेषां दार्शनिकानां यथा प्रवृत्तिः दृश्यते तथैव साहित्यिकानामपि दृश्यते। साहित्यशास्त्रस्य मुख्यप्रयोजननिरूपणावसरे काव्यकारैः इत्थमुद्घोषितम्-

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥**[1]

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥**[2]

एतादृशं प्रयोजनमभ्युपेत्य माघकविना सप्तमशताब्द्यां विंशतिसर्गात्मकं शिशुपालबधनामकं महाकाव्यं विरचितम्। काव्यसंरचनावसरे यद्यपि काव्यकारैः विधिपक्षमुत्सृज्य स्वानुसारं काव्यं रचितं "नियतिकृतनियमरहितां ह्लादैक-मयीमनन्यपरतन्त्राम्। नवरसरुचिरां निर्मितिमादधती....." तथापि प्रयोजनपक्षः कदापि नैव उपेक्षितः। माघकविना तु काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्"

1. साहित्यदर्पणः- 1/2
2. भामहः

इति वचनमपि समाश्रितं काव्यरचनायाम्। अत एव क्षेमेन्द्रेण औचित्यविचार-चर्चाग्रन्थे तत्त्वौचित्यस्य प्रत्युदाहरणरूपेण माघश्लोकस्य उद्धरणं प्रस्तुतं-

**बुभुक्षितैर्व्याकरणं न भुज्यते**
**पिपासितैः काव्यरसो न पीयते।**
**न विद्यया केनचिदुद्धृतं कुलं**
**हिरण्यमेवार्जय निष्फलाः कलाः।।**

एतेन वक्तुं शक्यते यत् माघकविना व्याकरणशास्त्रस्य मर्यादा संस्थापिता। स्वीयकाव्यरचनावसरे तेन कविना व्याकरणस्य इत्थं प्रशस्तिः कृता-

**असम्पादयतः कश्चिदर्थं जातिक्रियागुणैः।**
**यदृच्छाशब्दवत् पुंसः सञ्ज्ञायै जन्म केवलम्।।**[1]

अर्थात् यः जनः स्वजातिक्रियागुणसदृशं अलौकिकं कमपि अर्थं न सम्पादयति, केवलं जन्मना एव ब्राह्मणः क्षत्रियो वा भवति तस्य जन्म एव निरर्थकम्। एवञ्च-

**निहन्त्यरीनेकपदे य उदात्तः स्वरानिव।**[2]
**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा।।**[3]
**केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।**
**धातवः सृजतिसंदृशास्त्रयः स्तौतिरत्र विपरीतकारकः।।**[4]
**निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम्।**
**पाणिनीयमिवालोकि धीरैस्तत्समराजिरम्।।**[5]

एभिः श्लोकैः शब्दशास्त्रस्य महत्त्वं स्वीयशब्दशास्त्रपाण्डित्यञ्च प्रदर्शितम्। तत्र माघकवेः सांख्यशास्त्रेऽपिनुरागः दृश्यते।

---

1. शिशु. -2/47
2. शिशु. -2/95
3. शिशु. -2/112
4. शिशु. -14.66
5. शिशु -19/75

**तस्य सांख्यपुरुषेण तुल्यतां विभ्रतः स्वयमकुर्वतः क्रियाः।**
**कर्तृता तदुपलम्भतोऽभववद्वृत्तिभाजि करणे यथर्त्विजि॥**[1]

तत्र काणादशास्त्रे माघकवेः अनुरागः नासीदिति वक्तुं नैव शक्यते, यतः "सर्वं शब्देन भासते" इति हरिवचनमनुसृत्य शब्दस्य व्यवहार-नियामकत्वात् शब्दस्याश्रयत्वेन आकाशस्य अस्तित्वमुररीकृतं स्वीयकाव्ये। तथाहि-

**अप्यनारम्भमाणस्य विभोरुत्पादिताः परैः।**
**व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः॥**[2]

अत्रेदमवधेयं न्यायवैशेषिकयोः समानतन्त्रत्वात् काणादपदेन न्यायशास्त्रस्यापि ग्रहणं भवति। तत्र न्यायवैशेषिकनये "शब्दगुणकम्" इति आकाशद्रव्यस्य लक्षणं भवति। शब्दस्तु आकाशस्य विशेषगुणो भवति। समवायसम्बन्धेन आकाशे शब्दस्तिष्ठतीति, शब्दाश्रयत्वं आकाशस्य लक्षणं फलितं भवति। शब्दस्तु ध्वन्यात्मक-वर्णात्मकभेदेन द्विविधो भवति। शब्दग्राहकमिन्द्रियं तु श्रोत्रेन्द्रियं भवति। श्रोत्रं तु कर्णशष्कुल्यवच्छिन्ननभः प्रदेशो भवति। शब्दप्रत्यक्षे समवायसन्निकर्षस्य शब्दत्वजातिप्रत्यक्षे समवेत-समवायसन्निकर्षश्च भवति। आकाशस्य एकव्यक्तित्वात् आकाशत्वं न जातिः अपि तु शब्दाश्रयत्वेन आकाशस्य बोधो भवति। स च आकाशः नित्यः विभुश्च, सर्वमूर्त्तद्रव्यसंयोगित्वात् आकाशस्य विभुत्वं, व्यापकत्वं स्वीक्रियते नैयायिकैः। तमेव पक्षमनुसृत्य कविरपि उक्तश्लोके उपमालङ्कार-द्वारैव इत्थं भणति- यथा 'शब्दः' सर्वदेशव्यापिणः आकाशस्य गुण इति व्यवह्रियते परमाकाशः तदर्थं न किमपि विदधाति तथैव शक्तः राजा अपि स्वमहिम्नैव परैः सम्पादयन् सर्वार्थानपि स्वकीयतां नयति स्वयञ्च उदासीन एव तिष्ठति न किमपि करोतीति। एवञ्च वाग्व्यवहारात्मकस्य शब्दस्य महत्त्वविषये इत्थं भणति कविः-

**विरोधिवचसो मूकान् वागीशानपि कुर्वते।**
**जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः।**[3]

1. शिशु.-14/19
2. शिशु.- 2/91
3. शिशु.- 2/25

अर्थात्- कुशलवक्ता स्वोच्चारितशब्दबलात् बृहस्पतिमपि वाग्विहीनं कर्तुं शक्नोति, तस्य अपाकरणं कथमपि नैव सम्भवति, एवञ्च मन्दबुद्धिमन्तं प्रज्ञावान् कर्तुं शक्नोति। अतः वाक्तत्त्वस्य महत्त्वं विलसति जगति-

न्यायशास्त्रदृष्ट्या पर्यालोच्यते चेत् तर्हि इत्थं वक्तुं शक्यते यत् शक्तिलक्षणान्यतरात्मकवृत्तिसम्बन्धेन शब्दः स्वार्थोपस्थितिद्वारा शाब्दबोध-सम्पादयितुं समर्थो भवति। तत्रापि शाब्दबोधः सार्थकशब्दैरेव जायते न तु निरर्थकशब्दैः। तथा चोक्तं जगदीशतर्कालङ्कारैः-

**शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।**
**प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा।।** इति।

सार्थकशब्दैः यो हि शाब्दबोधो जायते तं शाब्दं प्रति पदज्ञानं करणं पदार्थोपस्थितिश्च व्यापारो भवति, एवञ्च वृत्ति- आकाङ्क्षा- योग्यता-सन्निधि- तात्पर्यज्ञानानां सहकारिकारणत्वेन कारणत्वमपि कल्प्यं भवति इति यथा न्यायशास्त्रे यथा कार्यकारणभावः प्रसिद्धः विद्यते तथैव माघकविनाऽपि स्वकाव्ये इत्थं भाषितं-

**यावदर्थपदां वाचमेवमादाय माधवः।**
**विरराम महीयांसः प्रकृत्या मितभाषिणः।**[1]

अर्थात् यावदर्थपदामित्यत्र अभिधेयसम्मिताक्षरां निरर्थकपदरहिता-मित्यर्थस्वीकारेणैव ज्ञायते खलु निरर्थकशब्दानां शाब्दबोधजनकत्वं नास्तीति। एवञ्च नानार्थकहरिसैन्धवपुष्पवन्तादिपदस्थले तात्पर्यज्ञानस्य कारणत्वमभ्युपेत्य यथा शाब्दबोधः सम्पाद्यते तथैव माघकविनापि "वक्तुरिच्छा तु तात्पर्यम्" इति तात्पर्यस्यापि "विवक्षितामर्थविदः" इति पदेन प्रकारान्तरेण कारणत्व-मङ्गीकृतम्। अनेन प्रकारेण शब्दस्य अर्थस्य च महत्त्वं प्रकाशितम्। अर्थस्य महत्त्वविषये तैरुद्घोषितं च-

**सङ्क्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः।**
**सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे।।**[2]

---

1. शिशु.- 2/13
2. शिशु.- 2/24

तत्र जगतः दुःखपङ्कनिमग्नत्वात् दुःखपङ्कनिमग्नानां उद्धरणाय न्यायशास्त्रस्य प्रणयनं सूत्रकारैः कृतमिति मणिकारैः प्रामाण्यवादप्रकरणस्य प्रारम्भे उक्तं–"**अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय**" इति। अर्थात् दुःखपङ्कनिमग्नानां जनानामुद्धरणार्थं यथा न्यायशास्त्रस्य प्रणयनं विद्यते तथैव अस्य काव्यस्यापि जगत्कल्याणाय निर्माणं इति माघकवीनाम् आशयः विद्यते। तथा चोक्तं–

**जाज्वल्यमाना जगतः शान्तये समुपेयुषी।**
**व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी।** इति।

अर्थात्– लोकशान्तये एकत्रितः अत्यन्तदीप्यमानः अग्नित्रयः (दक्षिणाग्नि, गार्हपत्याग्नि, तथा आहवनीयाग्निः) सभामण्डपे दीप्यते स्म इति। अत्र कविना अग्नित्रयस्य महत्त्वं लोककल्याणाय उक्तं, किन्तु न्यायज्ञैः पदार्थतत्त्वज्ञानं लोककल्याणाय उक्तमिति अनयोः प्रतिपादनदृष्टिः भिन्ना विद्यते, किन्तु लोककल्याणात्मके लक्ष्ये वैपरीत्यं नास्तीति वक्तुं शक्यते। 'जगतः शान्तये' "श्रियः पतिः श्रीमति शासितुं जगत्" इत्यादिस्थलेषु कविना यो हि जगत् शब्दस्य प्रयोगः कृतः तस्य जगत्छब्दस्यार्थनिर्वचनावसरे साहित्यिकैः जगच्छब्देन विश्वस्यार्थः स्वीकृतः, किन्तु नैयायिकैः अचेतनस्य घटस्यापि जगदन्तर्गतया तस्य घटस्य कथं कल्याणं सम्भवति, उत अचेतनघटे कल्याणशब्दान्तरस्य कथमन्वयः सम्भवति हति जिज्ञासां मनसि निधाय उच्यते– "जगत् संसार्यात्मजातम्" इति। अर्थात् जगत्पदस्य वस्तुमात्रार्थकत्वे घटादीनामचेतनानां मोक्षरूपोद्धारस्य बन्धेन तदीयत्वेनोद्धारेच्छा मुनेर्न सम्भवतीति। अत्र परमेश्वरस्य मुक्तानां च जीवानां नोद्दीधीर्षाविषयत्वसम्भव इत्यतः संसारित्वविशेषणम्। संसारश्च मिथ्याधीप्रभवा वासना भवति इति।

अस्य जगतः सत्यत्वमसत्यत्वं वा इत्यत्र दृश्यते दार्शनिकानां मतभेदः, तत्र अद्वैतिनां मते ब्रह्म विहाय सर्वं मिथ्येति। न्यायसम्प्रदाये जगतः सत्यत्वम्। तस्य जगतः निमित्तकारणम् ईश्वरो भवतीति। उक्तञ्च विश्वनाथेन– "संसारमहीरुहस्य बीजाय" इति। वेदान्तिनां मते ब्रह्मणः जगदभिन्ननिमित्तोपादनत्वेऽपि न्याये तु समवायादिकारणत्रयेषु जगतः

निमित्तिकारणं ईश्वरः एव, स च नित्यः सर्वज्ञः जगन्नियन्त्रकश्च भवति। मन्ये माघकविनापि प्रथमश्लोके "शासितुं जगत्" इत्यनेन वाक्येन श्रीकृष्णचन्द्रः जगतः नियन्त्रकः व्यवस्थापकश्चेति संस्थापितः, एवञ्च "जगन्निवास" इत्यनेन जगदाधारभूतत्वमपि तत्र कृष्णचन्द्रे संस्थापितम्।

न्यायशास्त्रे उत्क्षेपक्षणापक्षेपणादिभेदेन यानि पञ्चकर्माणि स्वीकृतानि सन्ति तेषु पञ्चकर्मसु अन्तिमं कर्म भवति गमनम्। तत्र गमनात्मककर्मणि उर्ध्वज्वलनकर्मणः तिर्यग्गमनकर्मणश्च अन्तर्भावः विद्यते। ऊर्ध्वज्वलनकर्म वह्नौ तिर्यग्गमनकर्म सूर्यात्मकतेजसि विद्यते इति यो हि न्यायसिद्धान्तः विद्यते तस्योदाहरणमुखेन अत्र प्रस्तौति माघकविः–

**गतं तीरश्चीनमनूरुसारथेः**
**प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।**
**पतत्यधो धाम विसारि सर्वतः**
**किमेतदित्याकुलमीक्षितं जनैः॥** इति[1]

अर्थात् तिर्यग्गमनभूताक्रिया सूर्ये ऊर्ध्वज्वलनात्मिकाक्रिया वह्नौ तिष्ठतीति कविना उक्तकाव्ये संसूचितम्।

तत्र न्यायशास्त्रे बुद्ध्याख्यगुणपदार्थस्यापि महत्त्वं विद्यते। यतः सर्वव्यवहारहेतुर्गुणः बुद्धिर्भवति। सा वृद्धिः स्मृत्यनुभवेभेदेन द्विविधा। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। अनुभवस्तु यथार्थायथार्थभेदेन द्विविधः। यथार्थानुभवः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् चतुर्विधः, संशय-विपर्ययतर्कभेदेन अयथार्थानुभवः त्रिविधो भवति। एतादृशी बुद्धिस्तु समवायसम्बन्धेन आत्मनि तिष्ठतीति ज्ञानाधिकरणमात्मा भवति, न वेदान्त-वज्ज्ञानस्वरूपम्। ज्ञानादिलिङ्गेन चेतनस्यात्मनः सिद्धिर्भवतीति न्यायसिद्धान्तः। बुद्धेः सर्वव्यवहारहेतुत्वात् गुणत्वात् च यथा न्यायशास्त्रे महत्त्वं विद्यते तथैव माघकविना बुद्धेः प्राथम्यं प्राशत्यञ्च विवेचितम्। तथा चोक्तं–

**बुद्धिशस्त्रः प्रकृत्यंगो घनसंवृतिकञ्चुकः।**
**चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः॥**[2]

---

1. शिशु.– 1/2
2. शिशु.– 2/82

अत्र बुद्धिशस्त्रस्यार्थो भवति प्रज्ञायुधः, शस्यते क्षिप्यते इति शस्त्रम्, बुद्धिरेव शस्त्रं यस्य सः बुद्धिशस्त्रम्। श्लोकस्यायमेवार्थः राजा किल 'स्वाम्यमात्मसुहृत्कोशराष्ट्रदुर्गबलानि च' इति सप्तभिः प्रकृतिभिः शरीरवान् भवति, पुनः स एव स्वमन्त्रगुप्तिरूपकवचनेन निजं शरीरं रक्षति। उत्साहशीलः पुनः गुप्तचरैः रात्रोः बलाबलं सम्यज्ज्ञात्वा बुद्धिपूर्वकं प्रहरति इति। एतेनापि निश्चप्रचमपि वक्तुं शक्यते बुद्धिर्यस्य बलं तस्येति। सा च बुद्धिः न्यायमते आत्मनि तिष्ठति, बुद्धिमान् आत्मा बुद्धिर्यस्य बलं तस्येति। सा च बुद्धिः न्यायमते आत्मनि तिष्ठति, बुद्धिमान् आत्मा भवति यतः शरीरादीनां अनित्यत्वात् शरीरावच्छेदेन आत्मनि ज्ञानस्योत्पद्यमानत्वात् यथा बुद्धिमान् आत्मा भवति तथैव माघकविनापि बुद्ध्याश्रयत्वेन आत्मनः सत्ता स्वीकृता। तथा चोक्तं (श्लोकचतुष्टयेन)–

**विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः।**
**हेतुःपरिचयस्थैर्ये वक्तुर्गुणनिकैव सा।**[1]

अर्थात् शास्त्रतत्त्ववेत्ताभवान् अतस्त्वत् समक्षं शास्त्रचर्चा नहि तत्त्वावबोधाय, किन्तु ममैव अभ्यासवर्धनाय।

**प्रज्ञोत्साहवतः स्वामी यतेताधातुमात्मनि।**
**तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः।।**[2]

अर्थात् राज्ञा सर्वदा बुद्धिमता उत्साहवता च भाव्यम्, तत एव सम्पदमाप्तुं शक्नोति।

**सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये।**
**तत्रानिशं निषण्णास्ते जानते जातु न श्रमम्।।**[3]

अर्थात् ये जनाः सर्वदा प्रज्ञास्वरूपां शय्यामाश्रित्य उत्साहपूर्वकं कर्मकुर्वन्ति ते बहुकाले समतीतेऽपि ततः खिन्ना न भवन्ति अतः बुद्धिपूर्वकं एव उत्साहः सेव्यः केवलं उत्साहो न सेव्य इति। अनेन प्रकारेण कविना

---

1. शिशु.–2/75
2. शिशु.–2/76
3. शिशु.– 2/77

बुद्धेः बुद्ध्याश्रयस्य प्रशंसा कृता, अत्रापि मन्ये न्यायदर्शनाभिमतं बुद्धितत्त्वं बुद्ध्याश्रयतत्त्वञ्च प्रकारान्तरेण काव्यमुखेन च अभ्युपगतम्।

एवञ्च "आत्मनित्यत्वे प्रेत्यभावसिद्धिः" इति पुनर्जन्मवादस्यास्तित्वं आत्मनः नित्यत्वपक्षे सम्भवतीति यन्न्यायसूत्रकारैः अक्षपादगौतमैः सूत्रितं तस्य प्रभावोऽपि माघकाव्ये दरीदृश्यते। आत्मनः नित्यत्वस्वीकारे एव पूर्वजन्मार्जितपुण्यानामुदयः इह जन्मनि सम्भाव्यते। उक्तं माघेन-

**हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥**[1]

अर्थात् श्रीमतां दर्शनं प्राणिनः त्रैकालिकी योग्यतां प्रकटयति। वर्तमानकाले तत् पापं विनाशयति, आगामिकालस्य मङ्गलं सूचयति तथा पूर्वजन्मार्जितपुण्यैस्तल्लभ्यते। एतेन आत्मना सह भावनाख्यसंस्कारस्य सत्ताऽपि माघकविना प्रकारान्तरेण स्वीकृता।

न्यायप्रस्थाने प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमा चतुर्विधा। तत्करणमपि प्रत्यक्षानुमानोपमानशब्दभेदेन चतुर्विधं भवति। तत्र प्रत्यक्षप्रमाणविषये समेषां दार्शनिकानां वैमत्यं नास्ति। तत्र प्रत्यक्षप्रमां प्रति इन्द्रियं करणं, इन्द्रियार्थसन्निकर्षश्च व्यापारो भवति, अतः इन्द्रियार्थ-सन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणं प्रतिपादितं न्यायज्ञैः। तत्र प्रत्यक्षस्य इयं प्रक्रिया विद्यते- यदा इन्द्रियं करणं भवति तदा इन्द्रियार्थ-सन्निकर्षः व्यापारः निर्विकल्पकज्ञानञ्च फलम्। यदा इन्द्रियार्थसन्निकर्षः करणं तदा निर्विकल्पकज्ञानं व्यापारः सविकल्पकज्ञानं च फलम्, यदा तु निर्विकल्पकज्ञानं करणं तदा सविकल्पकज्ञानं व्यापारः हानोपादानापेक्षाबुद्धिः फलं भवति। एतादृशी न्यायसिद्धान्तानुरूपा या प्रत्यक्षप्रक्रिया विद्यते तस्याः प्रक्रियायाः समाश्रयणं कृतमनेन माघकविना इति शिशुपालबधकाव्यस्या-वलोकनेन ज्ञायते। तथाहि-

**चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।**
**विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥**[2]

1. शिशु.-1/26
2. शिशु.- 1/3

अर्थात् आदौ इन्द्रियार्थसंयोगेन तेजः पुञ्जरूपस्य अवयवस्य च यज्ज्ञानं तन्निर्विकल्पकज्ञानं, मुखादिदर्शनानन्तरं नारदविशेषपुरुषविशेषस्य यत्प्रत्यक्षं तत् सविकल्पकं प्रत्यक्षमिति न्यायप्रक्रिया अत्र सङ्गच्छते।

एवञ्च न्यायप्रस्थाने अपवर्गमार्गविषये यानि तत्त्वानिप्रतिपादितानि सन्ति अर्थात् तत्त्वज्ञानेन मिथ्याज्ञानस्य निवृत्तिः, मिथ्याज्ञाननिवृत्तौ च रागादिदोषाणामपायः, रागादिदोषापाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मापायः, जन्मापाये दुःखनाशः, दुःखनाशश्च मोक्ष इति। यत्र न पुनः जननं न पुनरपि मरणं विद्यते, "न स पुनरावर्तते" इति श्रुति–वाक्यानुसारं मोक्षमार्गोऽपि काव्यमाध्यमेन प्रदर्शितः माघकविना। तथाहि–

**उदीर्णरागप्रतिरोधकं जनैरभीक्षणमक्षुण्णतयाऽतिदुर्गमम्।**
**उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया।।**[1]

अर्थात् यथा पाटच्चरैराक्रान्तं यातायातैरप्रतिहतमतिदुर्गमं कान्तारमार्गं प्राप्तवान् कश्चित् पुरुषः सौभाग्यात् निर्वाधस्थानप्राप्त्या आत्मानं अभयाय प्रकल्पते तथैव विषयाभिलाषप्रतिबन्धकैराक्रान्तम् अनभ्यस्तत्वेन जनैः अतिदुर्गमं मोक्षपथं कामयमानः पुरुषस्त्वामेव प्रथममाप्नोति, ततश्च न स पुनरावर्तते।। अत एवाहं त्वां प्रपन्नोऽस्मि।

उपर्युक्ततथ्यपरिशीलनेन निश्चप्रचमित्थं वक्तुं शक्यते यत् माघकविना न केवलं साहित्यशास्त्रीयतत्त्वमेव भाषितं अपि तु व्याकरणदृष्ट्या न्यायादिदार्शनिकदृष्ट्या च स्वकीयं सरसपूर्वकं शिशुपालबधनामकं काव्यं अस्माकं सम्मुखे समुपस्थापितम्। शास्त्रान्तरेषु विद्यमानानां तत्त्वानामपि निगूढमालोडनं तैः कृतं स्वीयकाव्ये इत्यत्र नास्ति संशयावकाश इत्यलम्।

✦✦✦

1. शिशु.– 1/32

# शिशुपालवधे दार्शनिकतत्त्वानां विवेचनम्

**प्रो० कुलदीपकुमारः**
आचार्यः जैनदर्शनविभागः
श्रीलालाबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली-110016

संस्कृतकाव्यमंदाकिनी अस्माकं सर्वेषां सहृदयानां हृदयानि पवित्रीकरोति। सौन्दर्यमयी माधुर्यगुणोपेता एषा सर्वेषां संस्कृतानुरागिणां मनसि हर्षमुत्पादयन्ति। भारतीयवाङ्मये बहुभिः कविभिः मनीषिभिः निजकाव्यरचनां कृत्वा अस्या अजस्रप्रवाहे योगदानं कृतम्। अस्माकं भारतभूमौ कालिदास-माघ-भारवि-दण्डिप्रभृतयः महाकवयः समये-समये समुद्भूताः। तेषु महाकविषु 'शिशुपालवधम्' नामकस्य महाकाव्यस्य रचियता विराजन्ते माघमहाकवयः। संस्कृतसाहित्येगगने महाकविमाघस्य अतीव महत्त्वपूर्णं स्थानं वर्तते। कवेः माघस्य गौरवाधायकं ग्रन्थरत्नं शिशुपालवध-नामकमेकमेव समुपलभ्यते। महाकाव्ये अस्मिन् विंशतिः सर्गाः, पञ्चचत्वारिंश दुत्तरषट्शताधिक एकसहस्त्रं श्लोकाश्च विद्यन्ते। कालिदासस्य कृतिषु उपमानां प्राधान्यं वर्तते। भारवेः किरातार्जुनीये अर्थगौरवस्य वैशिष्ट्यमस्ति। दण्डिनः दशकुमारचरिते पदलालित्यं प्रतिभाति तत् सर्वं माघस्य शिशुपालवधे वर्तते। अत एव सानन्दमुद्घोष्यते यत्-

**उपमा कालिदासस्य, भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघु सन्ति त्रयो गुणाः॥**

ग्रन्थेऽस्मिन् साहित्यिकतत्त्वैः सह दार्शनिकतत्त्वानां प्राचुर्यमप्यवलोक्यते। सर्वप्रथमं वयमत्र 'दर्शनम्' इत्यस्य शब्दस्य अर्थमवगन्तुं प्रयत्नं कुर्मः। तदनन्तरं शिशुपालवधे वर्णितानां दार्शनिकतत्त्वानां चर्चां कुर्मः।

प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे) ल्युट्-प्रत्यये कृते दर्शनशब्दो निष्पद्यते। संस्कृतभाषायाम् अयं शब्दः दर्शनं नपुंसकलिङ्गे विराजते। सर्वप्रथमं प्रश्नोऽयं समुद्भवति यत् किं नाम दर्शनम्? अस्य व्युत्पत्ति-लभ्यार्थोऽस्ति- **'दृश्यते अनेन इति दर्शनम्।' 'दृश्यतेऽनेन परमं तत्त्वमिति दर्शनम्।'** दर्शनं सामान्यावबोधलक्षणम्। अस्य शब्दस्य व्युत्पत्तिदृष्ट्या अर्थदृष्ट्या च स्पष्टरूपेण कथयितुं शक्यते यत् येन माध्यमेन साधनेन वा इदं विश्वं, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, परमात्मा, अन्तरात्मा, प्रकृतिश्च याथातथ्येन दृश्यन्ते, निरीक्ष्यन्ते, समीक्ष्यन्ते विविच्यन्ते च तद् दर्शनम्। अतः वयमत्र स्पष्टतया वक्तुं शक्नुमः यत् आध्यात्मिकम्, आधिदैविकम्, आधिभौतिकञ्च निरूपणं विवेचनं वा दर्शनशब्दान्तर्गतं विराजते।

किं ब्रह्म? तस्य किं स्वरूपं? क ईश्वरः? को जीवः? क अजीवः? किं मूलतत्त्वम्? के तस्य प्राप्तेरुपायाः? अस्मिन् जगति किं शाश्वततव तम्? इयं सृष्टिः कुतः समागता? किं पुनर्जन्म? किं शरीरम्? जीवस्य उद्भूतिः कुतः सञ्जाता? किं तस्य लक्षणम्? कथं मोक्षस्य प्राप्तिर्भवति? आत्मा चेतनोऽचेतनो वा? अस्याः सृष्टेः कः कर्ता? किं जीवनस्य कर्तव्यम् अकर्तव्यं वा? इत्यादिनां प्रश्नानां समाधानं यत्र सुसूक्ष्मदृष्ट्या विविच्यन्ते तद् दर्शनम्। सुसूक्ष्मदृष्ट्या इदमपि वक्तुम् शक्यते यत् तत्त्वार्थदर्शनमेव दर्शनम्। यथोच्यते केनोपनिषदि-

**केनेषितं पतितं प्रेषितं मनः,**
**केन प्राणः प्रथमः प्रैति युक्तम्।**
**केनेषिता वाचमिमां वदन्ति,**
**चक्षुः क्षोत्रं क उ देवो युनक्ति।।**[1]

भारते प्रचलितदर्शनानां वर्गीकरणं सर्वप्रथमं वयम्, अस्माकं देशे द्विधा विभक्तं कर्तुं शक्नुमः भारतीयदर्शनानि अभारतीयदर्शनानि च। येषां दर्शनानां प्रादुर्भावः भारतादिपूर्वीदेशेषु अभवन् ते सन्ति भारतीयदर्शनानि। भारतीयदर्शनानाम् अपरनाम पूर्वीदर्शनमपि अस्ति। येषां दर्शनानां प्रादुर्भावः

1. केनोपनिषद्, 1.1

यूरोपादिपाश्चात्यदेशेषु अभवन् ते सन्ति अभारतीयदर्शनानि। अभारतीयदर्शनानाम् अपरंनाम पाश्चात्यदर्शनमपि अस्ति।

भारतीयदर्शनानि मुख्यरूपेण द्विधा विभज्यन्ते वैदिकदर्शनानि, अवैदिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यम् अङ्गीकुर्वन्ति तानि वैदिकदर्शनानि इति कथ्यन्ते। यानि दर्शनानि वेदानां प्रामाण्यं नाङ्गिकुर्वन्ति तानि अवैदिकदर्शनानि इति कथ्यन्ते। तत्र साङ्ख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तादिनि षड्दर्शनानि वैदिकदर्शनानि सन्ति। चार्वाक-बौद्ध-जैनदर्शनानि अवैदिकदर्शनानि सन्ति।

केचन जना अनेनैव कारणेन अवैदिकदर्शनानि नास्तिकदर्शनान्यपि प्रतिपादयन्ति यत् समीचीनं नास्ति। यतोहि जैनबौद्धयोरपि वेदानां प्रामाण्यं रूपान्तरेण व्यवहारबुद्ध्या वा स्वीक्रियते एव। तथा पाणिनिव्याकरणदृष्ट्यापि यान्यप्यास्तिकस्य लक्षणानि सन्ति। तानि सर्वाणि उभयोः दर्शनयोः विराजते नास्ति अत्र कापि शंङ्कायाः स्थानम्।

शिशुपालवधे वैदिकावैदिकयोः द्वयोः दर्शनयोः यत्र तत्र विवेचनमुप-लभ्यते। महाकविना माघेन शिशुपालवधमहाकाव्ये परमात्मा श्रीकृष्ण ईश्वररूपेण उपस्थापितो दृश्यते। अनेन इदं ज्ञातुं शक्यते यत् परमात्मनः श्रीकृष्णस्य अलौकिकं किञ्चित् वैशिष्ट्यम् औपनिषदं वेदान्तदर्शनेन अभिप्रेरितमवबुध्यते। तत्र वेदान्तादिदर्शनेषु परमात्मनः परब्रह्मणः परिकल्पना तावत् सर्वेषां जगतां सर्वोच्चसत्तारूपेण उपकल्पितः दृश्यते। परब्रह्म तावत् सर्वव्यापी इति वयं सर्वे जानीमः तादृशः सर्वव्यापिनः ब्रह्मणः प्रकाशेनैव सर्वेषां प्राणिनां प्रकाशः भवति इत्यादि सर्वैः ज्ञायते एव। अत्र महाकविमाघः शिशुपालवधमहाकाव्यें चतुर्दशसर्गे भगवन्तं श्रीकृष्णमेव वर्णयति यत्-

**मर्त्यमात्रवदीधरद्भवान् मैनमानमितदैत्यदानवम्।**
**अंश एष जनतातिवर्तिनो वेधसः प्रतिजनं कृतस्थितेः।।**[1]

अनेन इदमवगन्तव्यं यत् माघः श्रीकृष्णं न केवलं मानवं मनुते, अपितु साक्षात् परब्रह्मस्वरूपं परमात्मानमेव मनुते। एवं दर्शनशास्त्रप्रतिपाद्यं

---

1. शिशुपालवधम्, 14, 59

ब्रह्मसम्बन्धिविचारं माघः तत्र तत्र यथावसरं प्रतिपादयति। बहुविचन्तयता माघेन ब्रह्मविषयिणि चर्चा करणसमये कथितं यत् ब्रह्म तावत् त्रिकालदर्शि त्रिलोकव्यापि च चकास्ति। तादृशस्य परब्रह्मणः मधुसूदनस्य ईश्वरस्य उदरे एव भुवनत्रयं स्थितरता तिष्ठति तादृशीसर्वव्यापी सत्तायाः स्वरूप-निरूपणावसरे कविः उल्लिखति यत् भगवतः श्रीकृष्णस्य कुक्षौ चत्वारः समुद्राः समाविष्टाः। यस्य शरीरसन्निधिषु समस्ताः सरिताः विलीनाः तस्य केशेभ्यो मेघावलयः विर्निगता इति विंशतितमे सर्गे वर्णितं यत्–

**चतुरम्बुधिगर्भधीरकुक्षेर्वपुषः सन्धिषु लीनसर्वसिन्धोः।**
**उदगुः सलिलात्मनस्त्रिधाम्नो जलवाहावलयः शिरोरुहेभ्यः॥**[1]

न केवलं एतावान् विशेषः शिशुपालवधस्य काव्यस्य अपितु भीष्मपितामहः श्रीकृष्णस्य परमात्मस्वरूपमेवं मानदेहसन्बन्धञ्च स्मरणं प्रकाशयति यथा–

**सर्ववेदिनमनादिमास्थितं देहिनामनुजिघृक्षया वपुः।**
**क्लेशकर्मफलभोगवर्जितं पुविशेषममुमीश्वरं विदुः॥**[2]

एवं महाकविना माघेन कृतमिदं दार्शनिकविवचनं मूलतः **'क्लेश-कर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः'** इति पातञ्जलयोग-सूत्रवचनेन सादृश्यं भजते एवं कविना उपनिषद्प्रतिपाद्यस्य ब्राह्मणज्ञानस्य सम्पूर्णपरिचयः प्रदर्शितःअर्थात् कृष्णब्रह्मणो अभेद एव प्रदर्शितः। यथा श्रीकृष्णः सत्याचरणशीलोऽपि मायावान् वृद्धोऽपि बालकः, जनितोऽपि अजः। अत एव उक्तम्–

**'अजायमानो बहुधविजायते'** इति। एवं नवोऽपि पुराणपुरुषः एतत् सर्वं मनसि निधाय रचयति कविमाघः माघकविः–

**सत्यवृत्तमपि मायिनं जगद्वृद्धमप्युचितनिद्रमर्भकम्।**
**जन्म बिभ्रतमजं नवं बुधा यं पुराणपुरुषं प्रचक्षते॥**[3]

---

1. शिशुपालवधम्, 20, 66
2. शिशुपालवधम्, 14, 62
3. शिशुपालवधम्, 14, 70

यथा वा वेदान्तदर्शनस्य बहूनि तत्त्वानि माघकाव्ये दृश्यन्ते तथैव सांख्यदर्शनस्य अपि अनेकानि तत्त्वानि स्पष्टतया उपलभ्यन्ते, यथा नारदः श्रीकृष्णस्य स्तुतिं यदा करोति तद् सांख्योक्तपुरुषलक्षणस्य तादात्म्यं भजते। यथा–

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।**
**बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः।।**[1]

एवं तथा वा सांख्यदर्शने आत्मा पुण्यपापादिकर्मानुष्ठानं स्वयं न करोति परन्तु बुद्धिरेव पुरुषं कारयति तत्र आत्मना एव कर्तृत्वं तेषां कर्मणामिति मन्येत तदेव कविनापि माघकाव्ये एवं प्रदर्शितम्।

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।**
**फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।।**[2]

अन्यत्र भगवतः श्रीकृष्णस्य वैशिष्ट्यवर्णनप्रसङ्गे आत्मना साक्षित्वं फलभागि– त्वञ्च सम्यक् प्रदर्शितमस्ति। एवं धर्मपुत्रस्य युधिष्ठिरस्य यागप्रसङ्गेऽपि तस्य सांख्यपुरुषतुल्यता वर्णिता यथा–

**तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रिया।**
**कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि।।**[3]

एवं यथा सांख्यदर्शनप्रतिपादिततत्त्वानां विवेचनं माघकाव्ये उपलभ्यते तद्वत् योगदर्शनसम्बद्धं विवेचनमपि समुपलभ्यते। यथा–

**"मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धस–बीजयोगाः ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य वाञ्छन्ति तामपि समाधिभृतो न रोद्धुम्।।"**[4] पश्यन्तु, अस्मिन् श्लोके समाधिशब्देन योगदर्शन– प्रतिपादितानि–

---

1. शिशुपालवधम्, 01, 33
2. शिशुपालवधम्, 02, 59
3. शिशुपालवधम्, 14, 19
4. शिशुपालवधम्, 4, 55

यमनियमासनप्रायाणामप्रत्याहारध्यानधारणासमाधिरूपाणि अष्टौ अङ्गानि ग्राह्यानि। अनेन ज्ञायते यत् माघकवेः योगविषयकं परिज्ञानं सम्यगवगन्तुम् शक्यते। किञ्च–

**उपैतुकामैस्तत्पारं निश्चतैर्योगिभिः परैः।**
**देहत्यागकृतोद्योगैरदृश्यत परः पुमान्।।**[1]

इत्यनेन पद्येन अस्माभिः स्पष्टमवगन्तुं शक्यते यत् माघकवि अष्टसिद्धिवर्णनं, चित्तवृत्तिवर्णनं, यमनियमवर्णनं, ध्यानयोगादिवर्णनञ्च उपस्थापयति।

एवं शिशुपालवधमहाकाव्ये कविना माघेन न्यायदर्शनशास्त्रीयप्रयोगा अपि सुष्टु प्रतिपादिताः यत् सविकल्प–निर्विकल्पकज्ञानम्, अनुमानप्रमाणं, निमित्तकारणम्, उपादानकारणमित्यादि विचारा अपि (प्रतिपादिताः विघन्ते) यथा व्यापक आकाशः स्वयं क्रियाशून्यः सन् अपि परेण उत्पादितं शब्दम् आत्मीयं गुणमेवाङ्गीकरोति तथैव राजा निष्क्रिय सन् परसम्पन्नं कार्यं स्वगुणमिव आदधाति। यथा–

**अप्यनारभमाणस्य विभोरुत्पादिताः परैः।**
**ब्रजन्ति गुणतामर्थाः शब्दा इव विहायसः।।**[2]

एवं न केवलं शिशुपालवधमहाकाव्ये वैदिकदर्शनानां विचारविमर्शः दृश्यते अपितु अवैदिकदर्शनानामपि विचारविमर्शः दृश्यते। यथा–

**सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।**
**सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्।।**[3]

यथा वा बौद्धानां नये पञ्चस्कन्धातिरिक्तस्य आत्मनः पृथक्तया अस्तितत्वं नास्ति तथैव राज्ञां पञ्चाङ्गयुक्तमन्त्रातिरिक्तः मन्त्रः नास्त्येव। एवमेव यथा जैनदर्शने सुप्रसिद्धः प्रमुखश्च विचारः स्याद्वादविचारः

---

1. शिशुपालवधम्, 19, 87
2. शिशुपालवधम्, 02, 91
3. शिशुपालवधम्, 02, 28

तत्र–तत्र काव्येषु महाकविना माघेन श्रीकृष्णवणर्न प्रसङ्गे शिशुपालवधप्रसङ्गे वा सुष्टुतया वर्णिता विघन्ते।

सम्पूर्णशिशुपालवधमहाकाव्यस्य अवलोकनसन्दर्भे अत्यन्तसुलभतया इदं ज्ञातुं शक्यते यत् अयं महाकविः न केवलं कविसार्वभौम अपितु दार्शनिकसिद्धान्तमर्मवेत्ता इत्यपि वक्तुं शक्यते। अत एव साहित्यमपि शास्त्राभिधां भजते।

✦✦✦

# शिशुपालवधमहाकाव्ये भौगोलिकी स्थितिः

**डॉ. सुरेशकुमारशुक्लः**
पूर्वशोधच्छात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालय, नवदेहली–16

**भूमिका–** स्वकीयविशिष्टकाव्यबन्धयोजनायाः कृते विश्वविख्यात-महाकवेर्माघस्य एकमात्रकृतिः (शिशुपालवधम्) तस्य प्रतिभायाः कवि-कौशलस्य चोत्कृष्टं प्रदर्शनमकरोत्। महाकविना माघेन स्वकीयकाव्यबन्धे शिशुपालवधेऽलौकिकसाहित्यिकालङ्कारिकशोभायाः प्रतिपादनं कृतम्, येन तस्य कविप्रतिभया सह पाण्डित्यस्याप्यद्भुतचमत्कारः स्पष्टतया परिलक्ष्यते सम्पूर्णसंस्कृतसाहित्याकाशे शिशुपालवधमहाकाव्यस्यैतावती ख्यातिरभवत् यत् महनीयेषु बृहत्काव्येषु (बृहत्त्रयिषु) अन्यतमं स्वीक्रियते। यदि महाकवेर्माघस्य शिशुपालवधमाधारीकृत्य तस्य पाण्डित्यप्रदर्शनस्य निर्धारणं क्रियते, तर्हि सर्वागामिप्रेरणायाः स्रोतं भवति। बहुमुखिप्रतिभायाः धनिनि महाकविमाघे उपमार्थगौरवपदलालित्यानां त्रयाणां गुणानां सन्निवेशो वर्तते–

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥**[1]

विश्वकविकुलगणनायां महाकविमाघं को न जानाति। महाकवेर्माघस्य पाण्डित्यप्रदर्शनस्य दर्शनं शिशुपालवधस्य सम्यगवलोकनादेव कर्तुं शक्यते। महाकविमाघः वेददर्शनादारभ्य राजनीतिं यावत् शिष्टपाण्डित्यं स्वकीयस्यास्य

---

1. कविप्रशस्तिः

महनीयग्रन्थे प्रादर्शयत्। इदमेव विशिष्टपाण्डित्यं विद्वज्जनेभ्यः मनोविनोदस्यै-काद्भुतसाधनमस्ति। भौगोलिकी स्थितिरिति वर्णनीयविषयोऽयमत्यन्तं चमत्कारी वर्तते। माघेन शिशुपालवधस्य चतुर्दश सर्गे यज्ञस्य भौगोलिकस्थितेः एतावत्सुन्दरं वर्णनं कृतं यत् पठनानन्तरं तथा प्रतिभाति यत् सः स्वयमेव एतं विशालं यज्ञमपश्यदिव।

स्वकीयविशिष्टप्रतिभायाः कृते विख्यातः माघः राजस्थानस्य मरुभूमिं कविप्रतिभाया रससंचारेण सिचितां कृतवान्। राजस्थानस्य जालौरमण्डलान्तर्गते भीनमालनगरेऽस्य जन्म अभवत्। अयं नीरसकाव्यबन्धमपि सरसं करोति। अनेन कश्चिदपि विषयोऽस्पृष्टो नास्ति। अस्य काव्यशास्त्रीयप्रतिभा समस्तेषु कविमण्डलेषु विराजामाना वर्तते। अयं महाकविः वेदः, दर्शनं, ज्योतिषं, व्याकरणं, मीमांसा, राजनीतिः, अर्थविद्या, गायनविद्या, पाकशास्त्रं, नीतिशास्त्रं, धर्मशास्त्रं, पौराणिकज्ञानं, लोकव्यवहारज्ञानं चेत्यादिषु समस्तेषु विषयेषु पारङ्गतो वर्तते। अस्य मते उपर्युक्ताः समस्ताः विषयाः लोकमङ्गलाय लाभदायकाः कल्याणकारिणश्च सन्ति।

महाकवेर्माघस्य भावभाषारसालङ्कारप्रकृतिचित्रणचरित्रचित्रणादेर्वर्णनमपि अनेकदृष्टया उत्कृष्टमस्ति। माघेन विहितललितपदानां विन्यासस्तु निःसन्देहेन मनोहारी वर्तते। सहैव माघस्य पदयोजना एतावती उत्कृष्टा वर्तते यत् कश्चनपि विद्वान् एतां तत् तत् स्थानात् न तु दूरी कर्तुं शक्नोति, न च तस्यां विपर्ययं कर्तुं शक्नोति।

तादृशो न कश्चिदपि विद्वान् अभवत्, येन माघस्य रचनायाः सरसा परमानन्दानुभूतिर्न कृता स्यात्। महाकवेर्माघस्य काव्यबन्धे तादृशा बहवो विषयाः प्राप्यन्ते, येषां सम्यगध्ययने एव सम्पूर्णं जीवनं व्यतीतं भवति। माघविषयिणी सूक्तिर्विद्यते- 'मेघे माघे गतं वयः।'

महाकवेर्माघस्य वैदुष्यमप्रतिमं वर्तते। लक्ष्म्याः दृष्ट्या अयं कविः धनाढ्यः वर्तते। शब्दकोषस्य च विषयेऽयं कविः परमसमृद्धोऽस्ति। अयं महाकविः स्वकीयशिशुपालबधे महाकाव्ये कस्यामपि नूतनपदरचनायां कस्यचिदपि शब्दस्य मुहुर्मुहुः प्रयोगं न करोतीत्येव माघस्य वैशिष्ट्यमस्ति। अत एव महाकवेर्माघस्य प्रशंसामकुर्वन्।

दर्शनक्षेत्रे महाकवेर्माघस्य रचना अत्यन्तानन्दस्यानुभूतिं कारयित्वा परमानन्दस्य प्राप्तिं कारयति। माघस्य रचनाया अध्ययनानन्तरं विद्वांसो भक्तजना वा मुरारिनामानं कृष्णं भजन्ति। मुरारिकवे: मर्मस्थलीयज्ञानं तावत्पूर्णतां न प्राप्तवान्, यावद् माघस्य ज्ञानं न वर्तते। अत एवोक्तं विद्वद्भिः- "मुरारिपदचिन्ता चेत् माघे रतिं कुरु।"

महाकवेर्माघस्य इयमेव एकमात्रा रचना सम्पूर्णकविमण्डलं स्वकीय-वैशिष्ट्यात् कम्पयति। तथा च अस्य रचनाया: अनुशीलनानन्तरं अन्य: कवि: माघमास इव कम्पयति। अस्य प्रशंसायां च इयं सूक्तिर्विशेषरूपेण चरितार्था वर्तते–

**माघेन विघ्नोत्साहं नोत्सहन्ते पदक्रमे।**
**स्मरन्तो भारवेरेव कवयः कपयो यथा।।**[1]

महाकवेर्माघस्य वैदुष्यविषये एतदपि कथ्यते यत्- "तावद् भारवेर्भाति यावन्माघस्य नोदय:।" अर्थात् तावदेव भारवीत्यादिपूर्ववर्तिन: कवय: विख्याता अभवन्, यावद् माघकवि: उत्पन्नो नाभवत्। माघे उत्पन्ने सत्येव अन्ये सर्वे कवयो न्यूना: अभवन्। अनया दृष्ट्या महाकवेर्माघस्य महत्वपूर्ण स्थानं वर्तते।

महाकवेर्माघस्य भौगोलिकज्ञानमेतावद् बृहद् वर्तते यत् सम्पूर्णविश्वस्य भ्रमणं कृत्वा सर्वमपि विश्वमपश्यदिव स माघ:। अस्य कलापक्षं सुदृढं परिपक्वमुच्चस्तरीयं च वर्तते। पदे पदे अस्य रचना माधुर्यं व्यक्तीकरोति। अलंकारप्रयोगे स: सिद्धहस्तोऽस्ति। उपमारूपकोत्प्रेक्षाऽन्वयकाव्यलिंगयमक-समासोक्तितुल्ययोगितेत्यादिषु सर्वत्र माघीयछटा माघमासे मेघा इव विद्यमाना वर्तते।

व्याकरणज्ञाने महाकविमाघ: वैयाकरणकेसरीसंज्ञया विख्यातो वर्तते। अयं परमोच्चकोटे: वैयाकरणोऽस्ति। संस्कृतसाहित्याकाशे रावणवधकाव्यस्य प्रणेता महाकविर्भट्टि: व्याकरणपरकप्रयोगे प्रसिद्धोऽस्ति। तस्य महाकाव्ये

---

1. कविप्रशस्ति:

श्लोकेषु पदे पदे व्याकरणनियमाः उपस्थिताः सन्ति। अथ च तस्य कथनमस्ति यत् अवैयाकरणाः महाकाव्यस्य सर्जनासमये सफलीभूता न भवन्ति, वैयाकरणा एव सफलिनो भवन्ति। महाकवेर्माघस्य लेखनी भट्टिमतं सर्वथानुकरोति। महाकवेर्माघस्य लेखन्यां व्याकरणकलासाधनप्रवृत्तिर्विद्यमाना वर्तते। व्याकरणशास्त्रेऽस्य नैपुण्यं सर्वविदितमस्ति। विविधछन्दसां प्रयोगेऽपि सिद्धहस्तोऽयं माघः। शास्त्रीयतथ्यप्रकटकरणेऽपि कविरयं दक्षोऽस्ति।

रैवतकपर्वतस्य वर्णने महाकवेर्माघस्य भौगोलिकज्ञानं परिलक्ष्यते। अत्र रैवतकपर्वतस्य वर्णने उद्भाविता नूतना कल्पना माघस्य घण्टामाघस्य कारणस्य विरुदो भवति। पर्वतरूपिहस्ती अथ च तं चोभयतः अवलम्बिनोः घण्टयोः सूर्यचन्द्रमसाभ्यां सह उपमाकरणं विद्वद्भ्यं एतावद् रोचते स्म यत् कवयः तं माघं घण्टामाघः वक्तुमारब्धवन्तः।

इत्थं पर्वतानां नदीनां निर्झराणां वनानां पशूनां पक्षीणां वनस्पतीनां च भौगोलिकवर्णनं शिशुपालवधमहाकाव्यस्य विविधेषु स्थानेषु समुपलभ्यते। प्रथमसर्गे महाकविः माघः नारदस्य तुलना हिमालयपर्वतेन सह करोति। तत्र नारदमुनिः कमलकेशरस्य इव पिंगलवर्णीयां जटां धारयतः, शरदृतोश्चन्द्र-किरणसदृशं गौरवर्णीयहिममयस्थानेषु उत्पन्नां पुरातनत्वाच्च पिंगलवर्णीयलतां धारयतः हिमालयपर्वतरिव प्रतीयते स्म–

**दधानमम्भोरुहकेसरद्युतीर्जटाः**
**शरच्चन्द्रमरीचिरोचिषम्।**
**विपाकपिंगलस्तुहिनस्थलीरुहो**
**धराधरेन्द्रं व्रततीततीरिव।।**[1]

शिशुपालद्वारा द्वारकापुर्याः कृताक्रान्तप्रसंगे माघः सुमेरुपर्वतस्य रात्रिकालिक - अदृश्यशिखराणाम् अदृश्यतामथयत् यत् रात्रौ सूर्येऽस्तङ्गते अन्धकारः सुमेरुपर्वतस्य शिखरान् तथैव आवृणोति, यथा कृष्णे गते सति शिशुपालो द्वारकापुरीं–

1. शिशुपालवधम् 1.5

**त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमियाम्।**
**प्रेणितार्यमणं मेरोरन्धकारस्तटीमिव॥**[1]

शिशुपालवधे वर्णनात् ज्ञायते यत् रैवतकपर्वते नैका: महौषधय: तमालवृक्षा: नैकाश्च लता: समुपलभ्यन्ते। तत्र चमरीगाव:, गजा:, कम्बलमृगा:, कस्तूरीमृगा:, सर्पा:, नैकाश्च पक्षिणो निवसन्ति स्म। अथ च पर्वतोऽयं जलाशयै: परिपूर्ण आसीत्, मरकतमणिनिर्मितयूथिषु प्रतिबिम्बितसूर्यरश्मीनां सुन्दरं चित्रं प्रस्तुतं कुर्वन् महाकवि: कथयति यत् अस्य रैवतकगिरे: मरकतमणिमयभूमिषु वृक्षाणां पल्लवानां मध्यभागेभ्य: पतमाना रश्मि: मयूरकण्ठस्य शोभां धारयन्नस्ति–

**मरकतमयमेदिनीषु भानो-**
**स्तरुविटपान्तरपातिनो मयूखा:।**
**अवनतशितिकण्ठकण्ठलक्ष्मी-**
**मिह दधाति स्फुरिताणुरेणुजाला:॥**[2]

महाकवि माघ: यमकालङ्कारस्य सुन्दरप्रयोगै: रैवतकपर्वतस्य माध्यमेन भौगोलिकस्थितेर्वर्णनमकरोत्। रैवतकपर्वते कलभानां (गजशावकानां) तथा च सिद्धगणानां स्वकीयाङ्गनानां पार्श्वे मधुरं गायनं वर्णयन् माघ: कथयति यत् अत्र जलाशयेषु प्रविष्टा गजशावका: विकसितकमलेषु आनन्देन रमन्ते, मधुरोद्दीपकस्वरयुक्ता: सिद्धगणा: स्वकीयस्त्रीणां सपीपम् उच्चस्वरै: गायन्ति–

**कुशेशयैरत्र जलाशयोषिता**
**मुदा रमन्ते कलभा विकस्वरै:।**
**प्रगीयते सिद्धगणैश्च योषितामुदा-**
**रमन्ते कलभाविकस्वरै:॥**[3]

---

1. शिशुपालवधम् 2.39
2. शिशुपालवधम् 4.56
3. शिशुपालवधम् 4.33

चतुर्थसर्गे माघः कथयति यत् अस्मिन् रैवतकपर्वते श्रेष्ठमन्दराचलात् आगतो भ्रमरसमूह इव तथा च कमलनेत्रयुता योगीजनाः स्त्रीयुता भूत्वा अनुरागयुक्तनवीनसुरतस्य सेवनं न कुर्वन्तीति न–

**सवधूकाः सुखिनोऽस्मिन्ननवरतममन्दरागतामरसदृशः।**
**नासेवन्ते रसवन्न नवरतममन्दरागतामरसदृशः॥**[1]

रैवतकपर्वतः भौगोलिकस्वरूपस्य विविधरूपाणि धारयति। अत एव तस्य विविधरूपाणि विलोक्य श्रीकृष्णस्य मनसि विस्मयं उत्पद्यते। अस्यैव प्रसंगस्य वर्णनं कुर्वन् माघः शिशुपालवधस्य चतुर्थसर्गे कथयति - "क्षणे क्षणे यन्नवतामुपेति तदेव रूपं रमणीयतायाः॥" इयमेव सूक्तिः अग्रे माघस्य प्रशस्तिरूपेण विख्याता जाता।

महाकविमाघः सुमेरुपर्वतशिखरेण सह यदा आसने समुपविष्ट-श्रीकृष्णस्य तुलनां करोति, तदा तया तुलनया सुमेरुपर्वतस्योपरि स्थित-जम्बूवृक्षज नतशोभाया वृद्धिर्भवति यथा–

**स कांचने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत।**
**जिगाय जम्बूजनितश्रियः श्रियं सुमेरु शृंगस्य तदा तदासनम्॥**[2]

यस्मिन् समये महामुनिनारद आकाशात् अवतरन् आसीत्, तस्मिन् समये राजसभायाः वर्णनमद्भुतं वर्तते, यत्र श्रीकृष्ण उपविष्ट आसीत्। नारदं विलोक्य सर्वे श्रीकृष्णसहिताः सभासदः आह्लादिताः अभवन्। राजसभायाः वर्णनं माघोऽतिसजीवतया कृतवान्। तेजःपुञ्जसदृशो महामुनिर्नारद एव साक्षाद् आकाशात् अवतरति, तत्र न सूर्यतेजोऽस्ति, न तत्र अग्नितेजः। वैकुण्ठेश्वरश्रीकृष्णस्य अनन्यभक्तनारदो मेलनार्थं श्रीकृष्णस्य पार्श्वे आयाति। इत्थमनेन तथ्येन ज्ञायते यत् एतादृशं गुरुत्वाकर्षणस्य गुणं न्यूटनादिवैज्ञानिकाः स्वकीयसिद्धान्तरूपेण गृहीतवन्तः सन्ति। अद्यापि च वैज्ञानिकसिद्धान्तरूपेण प्रचलितमस्ति। इत्थं चेदं वैज्ञानिकदृष्ट्याऽपि समीचीनमस्ति। विषयोऽयमद्यापि वैज्ञानिकानां मानसपटले गूढचिन्तनरूपेण स्थितोऽस्ति।

---

1. शिशुपालवधम् 4.51
2. शिशुपालवधम् 1.19

महाकवि: माघ: शास्त्रेषु बहुविधनिष्णातकविरस्ति। तस्य कल्पना-शक्ति: उच्चस्तरीया वर्तते। भावनाया: उत्कर्षस्तु अप्रतिम एवास्ति। सूक्ष्माति-सूक्ष्मता तु अस्य कवे: पदे पदे विद्यमाना वर्तते। कविश्च नीतिकुशलो वर्तते। अस्य व्यवहारहेतु: अतीव सजीवतया पूर्णोऽस्ति। लोकानुरंजनग्राह्यक्षमता प्राचुर्यमात्रायां विद्यमाना वर्तते। अस्य लोकायतपदलालित्यं अर्थगौरवप्रधान-युक्तोक्ति: सर्वत्र साहित्यजगति प्रसिद्धाऽस्ति। यथा भगवान् भास्करोऽन्धकारं हरति, तथैव भगवान् श्रीकृष्ण: राक्षसानां संहारं करोति यथा-

**ऋते रवेः क्षालयितुं क्षमेत कः,**
**क्षपातमस्काण्डमलीमसं नभः।।**[1]

महाकवि: माघ: त्रिकालदर्शी वर्तते। अयं त्रयाणां कलानां साक्षादिवानुकरणं करोति। अथ च अनेन ज्ञानमण्डलेन इदं आभासितं भवति यत् इदं वर्तमानसमयस्य भौगोलिकपरिक्षेत्रस्य वर्णनं नास्ति, अपितु त्रैकालिकभौगोलिकपरिक्षेत्राणां कर्म पुनर्जन्मनश्चाधारेण व्याप्तोचितानुचितज्ञानं प्रकटयति। महामुनिर्नारद: श्रीकृष्णस्य समीपमागच्छति। श्रीकृष्ण: प्रणमति-तम्। अथ च महामुनिं नारदमभिलक्ष्य कथयति यत् संसारे शरीरधारिणां कृते भवत्सदृशानां महापुरुषाणां दर्शनं कल्याणकरं भवति। प्रथमं तु वर्तमानकालिकपापानां हरणं करोति, द्वितीयं भविष्ये शुभस्य कारणं भवति, तृतीयं च भूतकाले कृतपुण्यानां फलस्वरूपे महापुरुषाणां दर्शनं भवति। शिशुपालवधस्य प्रथमसर्गे माघो लिखति -

**हरत्यघं सम्प्रति हेतुरेष्यतः**
**शुभस्य पूर्वाचरितं कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति**
**कालत्रितयेऽपि योग्यताम्।।**[2]

महाकवेर्माघस्य षडर्तूनां वर्णनस्य ज्ञानं समस्तसाहित्यजगतो हृदयहारोऽभवत्। रावणस्य लंकापुर्या: भौगोलिकवर्णनं अत्यन्तं सुन्दरमस्ति,

---

1. शिशुपालवधम् 1.38
2. शिशुपालवधम् 1.26

तत्र कवेः विचाराः सुन्दररीत्या समाहिताः सन्ति। रावणस्य लंकापुर्यां सर्वे कुटुम्बिनोऽभवन्। यथा–

**तपेन वर्षाः शरदा हिमागमो**
**वसन्तलक्ष्म्या शिशिरः समेत्य च।**
**प्रसूनक्लृप्तिं दधतः सदर्तवः पुरेऽस्य**
**वास्तव्यकुटुम्बितां ययुः॥**[1]

वर्तमानसमयस्य परिवर्तितसामाजिकपरिवेशं तदानीन्तनं सामाजिक-परिवेशेन सह योजयितुं शक्यते। अथ च कीदृशं समाजः परिवर्तितपरिवेशात् नवीनतां प्राप्तुं शक्नोति। अस्याः नवीनतायाः उदाहरणं महाकविः तद्रैवतकपर्वतस्य माध्यमेन अददात्। इत्थं तदानीन्तनी भौगोलिकी स्थितिः तथा च इदानीन्तनी भौगोलिकीस्थितिश्चेति द्वयोस्तुलना बहुसुन्दररीत्या प्रस्तुता कृता महाकविना माघेन। वारं वारं दृष्टोऽपि सो रैवतकपर्वतः अपूर्वमिव भगवतः श्रीकृष्णस्याश्चर्यमवर्धयत्, यतोहि यत् प्रतिक्षणं नवीनतां प्राप्नोति, तदेव रमणीयतायाः स्वरूपं भवति। यथा–

**दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान।**
**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः॥**[2]

महाकविमाघः रैवतकपर्वतस्य अत्यन्तं सुन्दरं सजीवं च वर्णनं कृतवान्। यथा एकतः स्फटिकमणेः प्रभय मिश्रितत्वात् नीलवर्णीया नद्यः अस्मिन् रैवतकपर्वते यमुनायाः नीलजलराशेः सुशोभितायाः अर्थात् मिश्रितश्वेतजलाभायाः गङ्गायाः शोभां धारयन्ति। अर्थात् रैवतकपर्वतस्य नद्यः तीर्थराजप्रयागे स्थितयोर्गङ्गायमुनयोरिव शोभां धारयन्ति। यथा–

**एकत्र स्फटिकतटांशुभिन्ननीरा,**
**नीलाश्मद्युतिभिदुराम्भसोऽपरत्र।**
**कालिन्दीजलनितश्रियः श्रयन्ते**
**वैदग्धीमिह सरितः सुरापगायाः॥**[3]

---

1. शिशुपालवधम् 1.66
2. शिशुपालवधम् 4.17
3. शिशुपालवधम् 6.26

महाकविर्माघः समयस्यापि सुन्दरं वर्णनमकरोत्। तत्र शिशुपालवधे किंचिदपि पक्षं स्थापयितुं कांचिदपि कृपणतां नादर्शयत्। तस्य काव्यबन्धे सर्वत्र लोकमंगलस्यैव वार्ता वर्तते। आशयोऽयमस्ति यत् समय एव मनुष्यं बलाबलं करोति। अर्थात् समयस्य प्रभावेण प्राणिनो बलवन्तो निर्बलाश्च भवन्ति। एवं कथयतस्तत्र हंसानां स्वराः मधुरतां मयूराणां च स्वराः कर्कशतां प्राप्नुवन्ति। यथा–

**समय एव करोति बलाबलं, प्रणिगदन्त इतीव शरीरिणाम्।**
**शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम्।।**[1]

इत्थमेव महाकविः माघः तस्मिन् रैवतकपर्वते कामकलानामपि सुन्दरं विवेचनं कृतवान्। माघस्य कामकलाः सम्पूर्णं कविमण्डलं एकस्याः नूतनकाव्यविधायाः शिक्षां ददतीव। तत्र रैवतकपर्वते कामिनीनां विलासगतिषु तासां नखानां प्रभया इन्द्रधनुषरचनया गमनागमनं धारयन्त्याः, इतस्ततः कम्पयन्त्याश्च तरुण्याः बाहुलताः कङ्कणस्य झङ्कारात् विशालनितम्बेषु स्खलिता भवन्ति स्म। यथा–

**नखरुचिरचितेन्द्रचापलेखं**
**ललितगतेषु गतागतं दधाना।**
**मुखरीतवलयं पृथौ नितम्बे**
**भुजलतिका मुहुरस्खलत्तरुण्याः।।**[2]

महाकविः माघः तस्मिन् समयेऽपि सांसारिकजनानां मनोदशानां संस्काराणां स्त्रियोचितधर्माणां च कथने लेशमपि संकोचं न कृतवान्। नीतिशतकेऽपि रतिकाले लज्जा कलत्राणां परमाभूषणं कथितमस्ति– 'लज्जा परमाभूषणम्।' इत्थं माघमतेऽपि रतिकाले लज्जा स्त्रीणां कृते परमाभूषणमस्ति। यथा–

**अवनतवदनेन्दुरिच्छतीव**
**व्यवधीमधीरतया यदस्थितास्मै।**

---

1. शिशुपालवधम् 6.44
2. शिशुपालवधम् 7.4

**अहरत सुतरामतोऽस्य चेतः**
**स्फुटमभिभूषयति स्त्रियस्त्रपैव॥**[1]

अर्थात् स्वमुखचन्द्रमधः कुर्वती, तथैव व्याकुलीभूत्वा पतिव्यवधान-मिच्छन्तीव, अस्य स्वकीयप्रियतमस्य कृते आत्मानं प्रकाशयन्ती स्वदेहमुद्घाटयन्ती वा नायिका स्वकीयपत्युश्चित्तं सहजरीत्या अहरत् यतोहि लज्जैव स्त्री अलङ्करोति।

महाकविमाघः कामदेवमपि स्वकीयकाव्यबन्धे सामाजिकरसकेल्याः भवन्तीत्यस्य केलिक्रीडासमये नायकनायिकाः कीदृश्यः स्वकामभावनाः व्यक्तीकर्तुकामाः भवन्तीत्यस्य प्रत्यक्षं ज्ञानं माघस्य रचनायाः रसास्वादनानन्तरम् उद्भूयते, यदद्यापि विषयाकर्षकं विद्यते। यथा–

**इदमिदमिति भूरुहां प्रसूनैर्मुहुरतिलोभयता पुरःपुरोऽन्या।**
**अनुरहसमनायि नायकेन त्वरयति रन्तुमहो जनं मनोभूः॥**[2]

अर्थात् इदं पुष्पं गृहाण, इदं पुष्पं गृहाणेत्यनेन वृक्षाणां पुष्पाणि पुरः पुरः दर्शयन् कामुको नायकः अङ्गनाः रहसि अगमयत्। आश्चर्यमहो! कामदेवो रतिक्रीडायै स्थानसमययोर्विचारात् रहितं कृत्वा मनुष्यं कियन्तमधीरं करोति।

उपरिवर्णितेन वर्णनेन ज्ञायते यत् महाकविमाघः कामशास्त्रस्य एतावत् सुन्दरतमं वर्णनं तत्कालिकभौगोलिकवातावरणात् प्रभावितमस्ति। तत्र एकमपि पक्षमस्पृष्टं नास्ति। इत्थमेव महाकविरयमेतदपि सिद्धयति यत् कामशास्त्रे कामक्रीडायां वा पुनरुक्तिदोषो न भवति, तस्य तत्र सर्वथा अभावो विद्यते। अस्योत्तममुदाहरणं शिशुपालवधे सहजतया स्फुटितं वर्तते, यदित्थं चरितार्थं कृतं कविना–

**सीमन्तं निजमनुबध्नन्ती कराभ्यामालक्ष्य स्तनतटबाहुमूलभागा।**
**भर्त्रान्यां मुहुरभिलप्यता निदध्ये नैवाहो विरमति कौतुकं प्रियेभ्यः॥**[3]

---

1. शिशुपालवधम् 7.38
2. शिशुपालवधम् 7.50
3. शिशुपालवधम् 8.69

स्वकीयकेशरचनां द्वाभ्यां हस्तां गृहणन्तीं, व्यक्तस्तनबाहुमूलां चेतादृशीं कामपि एकां रमणीं कामयन् कामुको नायकस्तस्या ध्यानमकरोत्। आश्चर्यमहो! विषयेभ्य इच्छा न विरमति अर्थात् बारं बारं विषयसेवनेऽपि विषयवासना वर्धते। विष्णुपुराणे इदमेव विषयमधिकृत्य लिखितमस्ति–

**न जातु कामः कामानामुपभोग्येन शाम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥**[1]

महाकविमाघः समाजे मनुष्यमुचितानुचिताचरणायापि शिक्षामददात्। माघः कथयति यत् गुणहीनो मनुष्यः कीदृशः निर्दोषो भवितुं शक्नोति। मूर्खमनुष्यः शान्तो भूत्वा स्वकीयमर्यादारक्षणं कर्तुं शक्नोति। तथापि एतेषां सर्वेषां प्रकृत्या मानवीकरणस्य शिक्षादाने एतावान् पारङ्गतोऽस्ति माघो यत् अमुना कविना सूर्यचन्द्रतारकनभोग्रीष्मान्धकाराश्चैतत्सर्वमेकस्मिन्नेवोदाहरणे नूनमेव कण्ठहारसदृशं गुम्फितं शिशुपालवधे यथा–

**अविभाव्यतारकमदृष्टहिमद्युतिबिम्बमस्तमितभानु नभः।**
**अवसन्नतापमतमिस्त्रमभादपदोषतैव विगुणस्य गुणः॥**[2]

अर्थात् यत्र तारकमदृष्टं वर्तते, चन्द्रमण्डलमपि अदृष्टमस्ति, सूर्योऽस्तङ्गतोऽस्ति, तापः शान्तोऽभवत्, अन्धकारोऽपि नास्ति चैतादृशो निर्दोषो नभो शोभायमानो भवति स्म यतोहि गुणहीनस्य निर्दोषभवनमेव गुणो भवति।

इत्थं महाकविमाघः स्वकीयकाव्यबन्धे भौगोलिकस्थितेः प्रणयने प्रकृतेः कमपि विषयं नैव त्यक्तवान्। नदीपर्वताकाशनिर्झराणां वर्णनं भवेद् वा, फलपुष्पादेर्वर्णनं भवेद् वा, शीतग्रीष्मादेर्वर्णनं भवेद् वा, राजनीतिशास्त्र-धर्म-ज्योतिष-विज्ञान-वेद-दर्शनपुराणानां वर्णनं भवेद् वा, सामाजिक-बौद्धिक-आधिदैविक-आधिभौतिक-प्रकृतिपुरुषादेर्वर्णनं भवेद् वा सर्वे विषयाः नूनमेव माघस्यानुगामिनः आसन्। युधिष्ठिरस्य राजसभायाः सुन्दरं चित्रमधोलिखितं वर्तते–

---

1. विष्णुपुराणम्
2. शिशुपालवधम् 9.12

**नानवाप्तवसुनार्थकाम्यता नाचिकित्सितगदेन रोगिणा।**
**इच्छताशितुमनाशुषा न च प्रत्यगामि तदुपेयुषा सदः॥**[1]

अर्थात् तस्य युधिष्ठिरस्य राजसंसदि धनस्येच्छयाऽगतः पुरुषो धनमस्वीकृत्य न गतः, आगतो रोगी रोगस्य चिकित्सामकारयितुं न गतः, भोजनस्येच्छयाऽगतोऽभुक्त्वा न गतः। अर्थात् यां यां कामनां मनसि निधाय पुरुषः युधिष्ठिरस्य राजसंसदि गतः, तत्र तस्य सा सा कामना पूर्णाऽभवत्।

महाकवेर्माघस्य कवित्वशक्ति एतावती प्रबला आसीत् यत् नूनमेव स भूगोलवेत्ता आसीत्। अद्यत्वे च स विदुषां मानसपटले स्वकीयायाः उच्चस्तरीयकवित्वशक्तेः कृते स्मरणं क्रियत इति।

✦✦✦

---

1. शिशुपालवधम् 14.49

# शिशुपालवधमहाकाव्ये दार्शनिकतत्त्वानि

**डॉ. सच्चिदानन्दस्नेही**

सहाचार्यः-सर्वदर्शनविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः

रघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतारन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥**[1]

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**[2]

संस्कृतसाहित्ये कविकुलगुरूवाल्मीकिपरम्परायां महाकविमाघः अन्यतमः वर्तते। अनेन प्रणीतं शिशुपालवधमहाकाव्यं कः न जानाति? श्रीमाघप्रणीतं शिशुपालवधाख्यमेकमेव महाकाव्यं विराजते। महाभारतात् शिशुपालवधाख्यां कथां गृहीत्वा स्वकल्पनावैदुष्येण विंशतिसर्गात्मकं महाकाव्यमिदं कवित्वकौशलस्य चूडान्तं निदर्शनं गण्यते। भारवेः किरातार्जुनीयस्यानुकरणप्रभावात् तत् शैलीसाम्यं सर्वत्रैव प्रतिभासते। महाकाव्येऽस्मिन् भावपक्षेण सह कलापक्षस्य, कवित्वेन सह वैदुष्यस्य, हृदयेन सह मस्तिष्कस्य च यादृशमलौकिकं साम्यं दृश्यते तादृशमन्यत्राति दुलर्भं विद्यते। अतः काव्यमिदं भारवेः किरातार्जुनीयं, महाकविकालिदासप्रणीतं रघुवंशमहाकाव्येन च सह वृहत्त्रय्यामपि परिगण्यते। महाकविः माघस्य काव्ये कालिदासस्य

---

1. 'शिशुपालवधम्' 1.1, मङ्गलाचरणम्, चौखम्बाविद्याभवनवाराणसीतः प्रकाशितं, संस्करणं 1993 ई०।
2. 'रघुवंशम्', महाकविकालिदासप्रणीतम् सर्ग सं०-01, श्लोक सं०-01, व्या०- श्रीकृष्णमणित्रिपाठी, पृ०सं० 02, चौ० सुरभारतीप्रकाशनवाराणसीतः प्रकाशितं, संस्करणम् 2011.

उपमा, भारवे अर्थगौरवं, दण्डिनः पदलालित्यमिति त्रयमपि समगमनीयते। अत एव साहित्यप्रणयिवर्गे संसरति सूक्तिरेषा-

**उपमा कालिदासस्य, भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

अस्य प्रतिभा न केवलं साहित्यशास्त्रे एव संराजते, अपि तु तथैव विविधशास्त्रेषु अपि विहारं विधत्ते। माघापरपर्यायभूते शिशुपालवधमहाकाव्ये तेन नवसर्गेषु तथा नवनवाः शब्दाः प्रयुक्ताः यत् नव सर्गातिक्रान्ते सति नव शब्दो न कोऽपि विद्यते। शिशुपालवधमहाकाव्ये विशालं शब्दकोशराशि-रूपलभ्यते। अतः प्रसिद्धं काव्ये जगति- **"नव सर्गगते माघे नवशब्दो न विद्यते।"**

काव्येऽस्मिन् प्रसङ्गानुकूलप्रतिपादितानि पद्यानि अस्य कविवरस्य सर्वशास्त्रीयं विशिष्टवैदुष्यं वदन्ति। अनेन प्रतीयते यत् मान्यवरस्यास्य प्रवेशः न केवलं वृहत्संस्कृतवाङ्मये यथा-व्याकरणे, वेदे, पुराणे, न्याय-वैशेषिक, सांख्य-योग, पूर्वमीमांसा-वेदान्त-बौद्धादिदर्शनेषु वर्त्तते अपि तु राजनीतौ, सङ्गीतशास्त्रे, नाट्यशास्त्रे, काव्यशास्त्रे, कामशास्त्रे, आयुर्वेदे, चित्रकाव्ये, नीतिशास्त्रे, अश्वमातङ्गादिलक्षणादिषु अपि विद्यते। यथोक्तं शिशुपालवधमहाकाव्यस्य द्वितीयसर्गे-

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा॥**[1]

अनेन श्लोकेन ज्ञायते यत् अस्य कविश्रेष्ठस्य विद्वज्ज्येष्ठस्य व्याकृतिना सह राजनये अपि विचरन्ती प्रतिभा आसीत्। महाकाव्येऽस्मिन् विविधानि दर्शनतत्त्वानि अपि परिदृश्यन्ते। शिशुपालवधमहाकाव्यस्य प्रथमसर्गे मङ्गलाचरणे माघेन भक्तिभावनायां भगवतः श्रीकृष्णस्य जगतः शासकरूपेण चित्रणं- **"श्रियः पतिः श्रीमति शासितुं..........मुनिं हरिः।"** ईश्वरवादं समर्थयति। वर्णनमिदं श्रीरामानुजस्य विशिष्टाद्वैतवेदान्तस्य तत्त्वमीमांसानुकूलञ्च समनुभूयते। तथा च नारदमुनिना भगवद्श्रीकृष्णस्य स्तुतौ यत् प्रतिपादयते

---

1. 'शिशुपालवधम्' 2.112

तत् सांख्यदर्शनस्यानुकूलं प्रतीयते। यथा–

**युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत।**
**तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः।।[1]**

स्वीयं दर्शनशास्त्रवैदग्धं प्रकटयता माघेन दार्शनिकभावसम्पोषयिता अनेको श्लोका उपन्यस्ताः। श्रीकृष्णस्य स्तुतौ सांख्योक्तपुरुषवर्णनं तेन प्रस्तूयते। समानभावः सांख्यकारिकायामप्युक्तम्। तद्यथा–

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरूषः।।[2]**

ननु प्रकृतिविविक्तपुरूषसाक्षात्कारान्मोक्षो माघेन नाभीष्टम्। मोक्षाय भगवतः श्रीकृष्णस्य साक्षात्करणमेव प्रर्याप्तमिति सुष्ठूक्तमिति भावः। तद्यथा–

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन।**
**बहिर्विकारं प्रकृतेः पृथग् विदुः पुरातनं त्वां पुरुषं पुराविदः।।[3]**

शिशुपालवधमहाकाव्ये प्रथमसर्गस्य द्वात्रिंशततमे श्लोके योगिनामपि अतिदुर्लभं मोक्षप्राप्त्यर्थं ईश्वरस्य भगवतः श्रीकृष्णस्यैव साक्षात्कारो करणीय इति प्रतिपादितम्। यथोक्तं–

**उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमम्।**
**उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया।।[4]**

वर्णनमिदं योगदर्शनस्य रामानुजदर्शनस्य च भक्तिसिद्धान्तं समर्थयति। यतो हि तत्र प्रतिपादितं यत् योगस्य सिद्धिः अभ्यासवैराग्याभ्याम्, ईश्वरप्रणि–धानाद्वा[5] भवति। रामानुजस्य मते तु ईश्वरशराणागतिरेव मोक्षः। द्वितीये सर्गे

1. 'शिशुपालवधम्' 1.23
2. 'सांख्यकारिका' सं० 3
3. 'शिशुपालवधम्' 1.33
4. 'शिशुपालवधम्' 1.32
5. अभ्यासवैराग्याभ्यां तन्निरोधः।। योगसूत्र 1.12।।, ईश्वरप्रणिधानाद्वा।। योगसूत्रम् 1.23।।

राज्ञः लक्षणे सांख्यदर्शनस्य तत्त्वद्वयं **बुद्धिस्वरूपा प्रकृतिः**[1] **पुरूषः**[2] च अर्थगौरवेण परिभाषितम्। तत्रोक्तं–

> **बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृत्तिकञ्चुकः।**
> **चारेक्षणो दूतमुखः पुरूषः कोऽपि पार्थिवः।।**[3]

एवमेव चतुर्थे सर्गे अपि सांख्ययोगदर्शनस्य तत्त्वानि तदनुकूलपदानां यथा– चित्त[4], परिकर्म, सबीजयोग[5], सत्त्वपुरूषान्यथाख्याति[6], समाधि[7] इत्यादिनां प्राचुर्येण प्रयोगो परिलभ्यते। तथा हि–

> **मैत्र्यादिचित्तपरिकर्मविदो विधाय**
> **क्लेशप्रहाणमिह लब्धसबीजयोगाः।**
> **ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य**
> **वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्।।**[8]

---

1. 'सत्वरजस्तमसां साम्यावस्था प्रकृतिः' सांख्यसूत्रम् 1.26
2. 'नित्यशुद्धबुद्धमुक्तस्वरूपोऽसङ्गोऽयं पुरूषः, सुषुप्त्याद्यसाक्षित्वम्' सांख्यप्रवचन-भाष्यम्–'असङ्गोऽयं पुरूष इति'।। सां.सू.त्र. 1.15।।
3. 'शिशुपालवधम्' 2.82, चौखम्बाविद्याभवनवाराणसीतः प्रकाशितं, संस्करणं 1993 ई०।
4. सांख्ययोगदर्शने –अन्तःकरणविशेषः मन–बुद्धि–अहंकाराणां समूहः नाम चित्तः। 'मैत्रीकरूणामुदितोपेक्षाणां – सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्'।। योगसूत्रम् 1.33।।
5. 'सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्'।। योगसूत्रम् 1.45।।, 'ता एव सबीजः समाधिः'।। योगसूत्रम् 1.46।।
6. 'सत्त्वपुरूषान्यथाख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च'।। योगसूत्रम् 3.48।।
   सत्त्वपुरूषयोः शुद्धिसाम्ये कैवल्यमिति।। योगसूत्रम् 3.54।।
7. 'योगश्चितवृत्तिनिरोधः'–योगसूत्रम् 1.2, 'यमनियमाऽऽसनप्रणायामप्रत्याहारधारणा-ध्यानसमाधायोऽष्टावंगानि' योगसूत्र 2.29,
   'योगः समाधिः, समाधिर्योगः स च सार्वभौमचित्तस्य धर्मः' तत्रैव व्यासभाष्यम् 1.2।
8. 'शिशुपालवधम्' 4.55, चौखम्बाविद्याभवनवाराणसीतः प्रकाशितं, संस्करणं 1993 ई०।

चतुर्दशसर्गे युधिष्ठिरस्य राजसूययज्ञस्य प्रसङ्गे तस्य तुलना सांख्यपुरूषेण[1] कृता। यथोक्तं-

**तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रियाः।**
**कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि॥[2]**

तदनन्तरं भारतीयदर्शनस्य कर्मसिद्धान्तं, आत्मनः पुनर्जन्मसिद्धान्तञ्च वर्ण्यते। तत्र उक्तमपि-

**हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥[3]**

एवमेव बौद्धदर्शनीयं **पञ्चस्कन्धानि[4], अनात्मवादं च** प्रतिपादयन् वैदुष्यं वददिव विभ्राजते पद्यमिदं काव्यजगति-

**सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।**
**सौगतानामिवात्मन्यो नास्ति मन्त्रो महीभृताम्॥[5]**

निष्कर्षतः वक्तुं शक्यते यत् माघस्य काव्यगतवर्णने बहूनि दार्शनिकतत्त्वानि प्रदर्शितानि। एतैरेव स्वाभाविकवर्णनेन कवेः व्यावहारिक-जीवनदर्शनस्य पर्यवेक्षणशक्तेः च पूर्णः परिचयः समुपलभ्यते। सर्वविध-शास्त्रीयवैदुष्यसम्भूतस्य माघस्य शब्दशास्त्रीयज्ञानं सर्वान् कविवरानतिशेते नास्ति इत्यत्र कश्चिद् संशयः।

✦✦✦

---

1. 'तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरूषस्य।
 कैवल्यं माध्यस्थ्यं द्रष्टुत्वमकर्तृभावश्च॥' सांख्यकारिका सं० 19
2. 'शिशुपालवधम्' 14.19
3. 'शिशुपालवधम्' 1.26
4. 'रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः। तत्र विषयप्रपञ्चो रूपस्कन्धः, तज्ज्ञानप्रपञ्चो वेदनास्कन्धः, आलयविज्ञानसंतानो विज्ञानस्कन्धः, नामप्रपञ्चः संज्ञास्कन्धः, वासनाप्रपञ्च संस्कारस्कन्धः। 'पृ० सं० 72, शिशुपालवधम्' 2.28 चौखम्बाविद्या-भवनवाराणसीतः प्रकाशितं, संस्करणं 1993 ई०।
5. 'शिशुपालवधम्' 2.28

# शिशुपालवधमहाकाव्ये वक्रोक्तिविचारः

**डॉ. देवीप्रसादडोबरियालः**
पूर्वशोधच्छात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः नवदेहली–16

भारतीयकाव्यशास्त्रे षट्–सम्प्रदायाः प्रख्यातः वर्तन्ते। तेषु षड्–सिद्धान्तेषु वक्रोक्तिसम्प्रदायः विशिष्टस्थाने वर्तते। अस्य सम्प्रदायस्य प्रवर्तकः कुन्तकाचार्यः वर्तते। स्वयं कुन्तक–महाभागः अपि स्वकीये 'वक्रोक्तिजीविते' ग्रन्थे पुनः–पुनः शिशुपालवधमहाकाव्यस्य उदाहरणानि ददति। एवं प्रकारेण शिशुपालवधमहाकाव्ये आचार्य–कुन्तकमहोदयस्य सिद्धान्तस्य प्रत्येकभेदाः सुस्पष्टतया प्राप्यते। समीक्षापूर्वं वक्रोक्तेः सामान्यपरिचयः प्रस्तूयते। वक्रोक्तिः नाम किम्? वक्रोक्तेः सामान्यार्थः वक्र+उक्तिः वक्रोक्ति इत्यभिधीयते। कुन्तकाचार्यात् पूर्वमपि वक्रोक्तेः सामान्यपरिचयः तु लभ्यते स्म। संस्कृतवाङ्मये वक्रोक्तिशब्दस्य प्रयोगः दरीदृश्यते। अथर्ववेदे वक्रशब्दस्य प्रयोगः कुटिले अर्थे एव अस्ति।

**"अयं यो वक्रोविपरुर्व्यङ्गे**
**मुखानि वक्र वृजिना कृणोषि"।**[1]

कालिदासः 'वक्रः पन्थाः' प्रयोगेऽस्मिन् वक्रस्यार्थः कुटिलो यथा–

**'वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशम्।'**[2]

---

1. अथर्ववेदः 7.58.4
2. मेघदूतम् पू. 29

बाणभट्टेन कादम्बरीगद्यकाव्ये वक्रोक्तेः प्रयोगः वाक्छलक्रीडालाप-परिहासजल्पितचमत्कारपूर्णशैलीवचनप्रभृतिविदग्धतार्थेषु कथितम्-

**'एषाऽपि बुध्यते एतावतीवक्रोक्तिः।'**[1]

काव्यशास्त्रीयग्रन्थे भामहेन वक्रोक्तेः कल्पना सर्वप्रथमं कृता वर्तते।

**सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥**[2]

कुन्तकात् पूर्वमपि वक्रोक्तेः सर्वालङ्कारमूलत्वं निरूपितमेव। एवं पूर्ववर्तिनां वक्रोक्तिर्निरूपणानां सारांशं स्वीकृत्यैव कुन्तकाचार्येण विस्तृततरूपेण वक्रोक्तिनिरूपणं कृतम्। कुन्तकात् परवर्तिनः प्रमुखाचार्याः मम्मट-विश्वनाथप्रभृतयः वक्रोक्तिं केवलाङ्करत्वेनैवाङ्गीकृतवन्तः। परञ्च आचार्य-कुन्तको वक्रोक्तेः सूक्ष्मादपि सूक्ष्मरूपं वर्णयति। वक्रोक्तेर्लक्षणम्-

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।**
**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥**[3]

अर्थात् शब्दार्थौ द्वावपि अलङ्कार्यौ स्तः पुनः तयोरलङ्कृतिः चातुर्यपूर्णकथनमेव वक्रोक्तिः कथ्यते।

**वक्रोक्तेः भेदाः-**

कुन्तकाचार्येण विपुलवक्रोक्तिसिद्धान्तस्य निरूपणं कृतम्। अपि च वक्रोक्तेः षड्भेदाः कृताः। प्रत्येकभेदस्य बहवो भेदाः सन्ति। प्रमुखभेदाः वर्णविन्यासवक्रता-पदपूर्वार्द्धवक्रता-पदपरार्द्धवक्रता-वाक्यवक्रता-प्रकरण-वक्रता-प्रबन्धवक्रताश्चेति। तद्यथा-

**वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।**
**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः॥**
**वाक्यस्य वक्रभावाऽन्यो भिद्यते यः सहस्रधा।**
**यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥**

---

1. कादम्बरी पू. पृष्ठ. 296
2. काव्यालङ्कारः 2.85
3 व.जी. 1.10

**वक्रभावः प्रकरणे प्रबन्धे वाऽस्ति यादृशः।**
**उच्यते सहजाहार्य-सौकुमार्य-मनोहरः।।**[1]

इत्थं वक्रोक्तिसिद्धान्तस्य काव्यशास्त्रीयसिद्धान्तेषु विशिष्टं स्थानं वर्तते। संस्कृतमहाकाव्येषु महाकविमाघकृतं शिशुपालवधं विशिष्टमस्ति। महाकाव्येऽस्मिन् पदे पदे वक्रता दरीदृश्यते। अत्र वक्रोक्तेः तेषां पूर्वोक्तानां भेदानां सक्रमेण विवेचनं क्रियते।

**वर्णविन्यासवक्रता-**

वक्रतायाः प्रथमो भेदस्तु वर्णविन्यावक्रता। एषा वक्रताऽक्षराणां वर्णानां वा विन्यासे निवसति। अलङ्कारशास्त्रस्य अन्यैः विद्वद्भिः अनुप्रास-यमकालङ्कारयोर्मध्ये येषां विषयाणां समावेशः कृतोऽस्ति, तेषां विवेचनं वर्णविन्यासवक्रतान्तर्गतमागच्छति।

**वर्णविन्यासवक्रतायाः प्रभेदाः–**

**एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः।**
**स्वल्पान्तरस्त्रिया सोक्ता वर्णविन्यासवक्रता।।**
**वर्णान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नादयः।**
**शिष्टाश्च रादिसंयुक्ताः प्रस्तुतौचित्यशोभिनः।।**[2]

अर्थात् अत्र एकवर्णस्य पुनरावृत्तिः, बहुवर्णानां पुनरावृत्तिः स्वाल्पान्तरे मिलति। अपि च वर्णान्तयोगिनः स्पर्शवर्णस्य, द्विरुक्तास्य-ल-नादयः वर्णवक्रता, रादिसंयुक्तवर्ण-विन्यासवक्रतेति। एतेषां सर्वेषां भेदानामन्तर्भावः वर्णविन्यासवक्रताऽन्तर्गतमागच्छति।

वक्रोक्तिसिद्धान्तस्य प्रथमभेदस्य वर्णविन्यासवक्रोक्तेः शिशुपालवधे बहून्युदाहरणानि दृष्टिगोचराणि भवन्ति। यथा-

**अमानवं जातमजं कुले मनोः प्रभविनं भाविनमन्नमात्मनः।**
**मुमोच जानन्नपि जानकीं न यः सदाभिमानैकघना हि मानिनः।।**[3]

1. व.जी. 1.19-21
2. व.जी. 2.1-2
3. शि.व. 1.67

श्लोकेऽस्मिन् 'न्न' वर्णस्यावृत्तिः चमत्करोति। द्विरुक्तास्त-ल-नादयः विन्यासवक्रतायाः उदाहरणमस्ति अयमेव श्लोकः। एवञ्च-

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोक्यत्स सुरभिं सुरभिं सुमनोभरैः॥**[1]

श्लोकेऽस्मिन् बहुवर्णानां पुनरुक्तिः दृश्यते। अतः वर्णविन्यासवक्रताऽन्तर्गते बहुवर्णयुक्तविन्यासवक्रता वर्तते।

**पदपूर्वार्द्धवक्रता-**

वक्रोक्तेः द्वितीयभेदः पदपूर्वार्द्धवक्रताऽस्ति। वर्णानां समूहः शब्दः भवति। सुबन्ततिङन्तशब्दः पदं कथ्यते। पदस्य पूर्वार्धस्य अपरनाम प्रकृतिः वर्तते। अत्र पदपूर्वार्द्धवक्रतायाः बहवः भेदाः सन्ति। तत्र च रूढि-पर्याय-उपचार-विश्लेषण-संवृत्ति-वृत्ति-भाव-लिङ्ग-क्रियाणां विस्तृतप्रयोगानां विवेचनमस्ति। आचार्यकुन्तकः पदपूर्वार्द्धवक्रतायाः अष्टभेदाः इति स्वीकरोति। अष्टभेदातिरिक्तमागमवक्रता-प्रत्ययवक्रता-भाववक्रता अपि सन्ति। शिशुपालवधे वक्रोक्तेः बहून्युदाहरणानि दृष्टिगोचराणि जायन्त। परन्तु विस्तारभयकारणात् तेषां सर्वेषामुदाहरणानां विवेचनं कर्तुं समर्थो नास्मि। अत्र केवलेन मुख्योदाहरणानां प्रयोगं कृतं मया। यथा-

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥**[2]

अत्र मुनेः 'हिरण्यगर्भाङ्गभुवः' इति पर्यायशब्द अतः पदपूर्वार्द्धवक्रताऽन्तर्गते पर्यायवक्रता वर्तते। एवञ्च-

**निवर्त्य सोऽनुव्रजतः कृतानती-**
**नतीन्द्रियज्ञाननिधिर्नभः सदः।**
**समासदत्सादितदैत्यसम्पदः पदं**
**महेन्द्रालयचारु चक्रिणः॥**[3]

---

1. शि.व. 6.2
2. शि.व. 1.1
3. शि.व. 1.11

श्लोकेऽस्मिन् 'कृष्णः' शब्दस्य पर्यायशब्दः 'चक्रिणः' वर्तते। अतः पदपूर्वार्द्धवक्रताऽन्तर्गते पर्यायवक्रता दृष्टिगोचरं भवति।

**पदपरार्द्धवक्रता–**

वक्रोक्तेः तृतीयभेदः पदपरार्द्धवक्रताऽस्ति। पदपरार्द्धवक्रताया अपरनाम प्रत्ययवक्रताऽपि वर्तते। पदस्य द्वयोः भागयोः परार्द्धभागः प्रत्ययः कथ्यते। प्रत्ययवक्रतायाः बहवः भेदाः सन्ति। ते च कालवैचित्र्यवक्रता–कारकवक्रता–संख्यावक्रता–उपग्रहवक्रता–प्रत्ययक्रता–उपसर्गवक्रता निपातवक्रतेति। यथा–

**स्मरत्यदो दाशरथिर्भवन्भवानमुं**
**वनान्ताद्वनितापहारिणम्।**
**पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य**
**लङ्कां निकषा हनिष्यति।।**[1]

श्लोकेऽस्मिन् 'हानिष्यति' पदप्रयोगः लृट्लकारे भवति परन्तु कविना भूतकालिकघटनायै भविष्यकालिकधातुः प्रयुज्यते। एवञ्च–

**कलासमग्रेण गृहानमुञ्चता**
**मनस्विनीरुत्कयितुं पटीयसा।**
**विलासिनस्तस्य वितन्वता रतिं**
**न नर्मसाचिव्यमकारि नेन्दुना।।**[2]

श्लोकेऽस्मिन् 'गृहं' शब्दस्थाने 'गृहान्' शब्दस्य प्रयोग संख्यावक्रतऽन्तर्गतेऽऽगच्छति अर्थात् एकवचनस्य प्रयोगः दरीदृश्यते।

**वाक्यवक्रता–**

वाक्यवक्रताया अपरनाम वस्तुवक्रताऽस्ति। वक्रोक्तेः चतुर्थभेदः वाक्यवक्रता वर्तते। वाक्यवक्रतायाः विविधभेदाः सन्ति। तृतीयोन्मेषे राजानककुन्तकाचार्येण वक्रोक्तिजीवितग्रन्थस्य वाक्यवक्रतायाः भेदानां व्याख्या कृताऽस्ति।

---

1. शि.व. 1.68
2. शि.व. 1.59

**वाक्यवक्रता**- (1) सहजा (2) आहार्या

**सहजा**- (1) स्वभावप्रधाना (2) रसप्रधाना

**आहार्या**- (1) वस्तुवक्रता (2) अलङ्कारवक्रता (3) रसवक्रता

**स्वभावप्रधाना**- (1) सामान्या (2) शोभायुक्ता

**अलङ्कारवक्रता**- (1) समस्तालङ्कारः

वाक्यवक्रताऽन्तर्गतेऽलङ्काराणां समावेशोऽस्ति। आचार्यकुन्तकानुसारेण वक्रोक्तिजीवितग्रन्थे विंशति अलङ्काराणां पुनः स्वमेधया लक्षणं कृतमस्ति। अपि च पूर्वोक्तालङ्काराणां खण्डनं विधाय विंशति अलङ्कारान् स्वीकरोति। ते च रूपक-अप्रस्तुतप्रशंसा-पर्यायोक्ति-व्याजस्तुति-उत्पेक्षा-अतिशयोक्ति-उपमा-श्लेष-व्यतिरेक-दृष्टान्त-अर्थान्तरन्यास-आक्षेप-ससन्देह-अपह्नुति-संसृष्टि-संकर-रसवत्-दीपक-सहोक्तिरिति। शिशुपालवधे वाक्यवक्रतायाः नैकानि उदाहरणानि परिलक्ष्यन्ते। यथा –

**जाज्वल्यमाना जगतः शान्तये समुपेयुषी।**
**व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी।।**[1]

अत्र 'नरशिखित्रयी' पदे रूपकालङ्कारः वर्तते। अतः रूपकालङ्कारः वाक्यवक्रताऽन्तर्गतेऽऽगच्छति। एवञ्च-

**अमानवं जातमजं कुले मनोः**
**प्रभाविनं भाविनमन्तमात्मनः।**
**मुमोच जानन्नपि जानकीं न यः**
**सदाभिमानैकधना हि मानिनः।।**[2]

श्लोकेऽस्मिन् विशेषस्य सामान्येन सह समर्थनकारणात् अर्थान्तरन्या-सालङ्कारः वर्तते। अतः अर्थान्तरन्यासालङ्कारः वाक्यव-क्रताऽन्तर्गतेऽऽगच्छति।

**प्रकरणवक्रता**-

वक्रोक्तेः पञ्चमो भेदः प्रकरणवक्रता वर्तते। यस्यार्थः-प्रबन्धस्य एकदेश अर्थात् सम्पूर्णग्रन्थस्यान्तर्गतमेकविशिष्टवाक्यसमूहाश्रितः वर्ण्यविषयः

1. शि.व. 2.3
2. शि.व. 1.67

प्रकरणवक्रता वर्तते। प्रकरणवक्रतायाः नवभेदाः। ते च सन्ति-

पात्रप्रवृत्तिवक्रता-उत्पाद्यालावण्यवक्रता-उपकार्योपकारवक्रता-आवृत्तिवक्रता-प्रासङ्गिकप्रकरण-वक्रता-प्रकरणवक्रता-अवान्तरवस्तुवक्रता-गर्भाङ्कवक्रता-सन्ध्यङ्गविनिवेशवक्रतेति। प्रकरणवक्रतायाः शिशुपालवधे नैकानि उदाहरणानि सम्प्राप्यन्ते। विस्तारभयकारणात् तेषां सर्वेषामुदाहरणानां विवेचनं कर्तुं न शक्यते। अत्र केवल प्रमुखोदाहरणान्येव प्रस्तौमि। यथा-

**जगत्पर्याप्तसहभानुना न यन्नियन्तुं समभावि भानुना।**
**प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः॥**[1]

अत्र कविः प्रतिभया इतिहासप्रसिद्धकथापात्रस्य चरित्रोत्कर्षं करोति। अर्थात् प्रमुखपात्रेण गौणपात्रस्य चरित्रोत्कर्षं मुख्यकारणमस्ति। अतः प्रकरणवक्रताऽन्तर्गते पात्रप्रवृत्तिवक्रताऽऽगच्छति। एवञ्च-

**नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृतिना स्फुटोपमं भूतिसितेन शम्भुना॥**[2]

अत्र शिशुपालवधमहाकाव्यख्यातवृत्ते कल्पितकथांशस्य सन्निवेशः एव उत्पाद्यलावण्यवक्रतायाः उदाहरणमस्ति। शिशुपालवधे प्रथमसर्गे नारदस्य वर्णनं कविकल्पितमस्ति। अतः प्रकरणवक्रताऽन्तर्गते उत्पाद्यलावण्यवक्रताऽऽ-गच्छति।

**प्रबन्धवक्रता-**

वक्रोक्तेः षष्ठः भेदः प्रबन्धवक्रता इति अस्ति। प्रबन्धस्य अर्थः वर्तते समस्तग्रन्थः प्रबन्धवक्रता अंगीरूपे वर्तते। पूर्वोक्ता पञ्चविधवक्रता वर्तते एतत् प्रबन्धवक्रतायाः अङ्गमात्रं वर्तते। प्रबन्धवक्रतायाः षड्भेदाः सन्ति ते च मूलरसपरिवर्तनवक्रता-समापनवक्रता-कथाविच्छेदवक्रता-आनुषङ्गिकफलवक्रता-नामकरण-वक्रता-कथासाम्यवक्रता च इति। शिशुपालवधे प्रबन्धवक्रतायाः बहूनि उदाहरणानि सन्ति। अत्र केवलमहं सामान्य-परिचयमेव ददामि। यथा-

1. शि.व. 1.27
2. शि.व. 1.4

**करोति कंसादिमहीभूतां वधाद्**
**जनो मृगाणामिव यत्तवं स्तवम्।**
**हरे! हिरण्याक्षपुरः सरासुरद्विपद्विषः**
**प्रत्युत सा तिरस्क्रिया।।**[1]

अस्मिन् श्लोके वीररसः अवलोकितो भवति। यतोहि महाभारत-महाकाव्यस्य अङ्गी रसः शान्तः इति स्वीक्रियते। शिशुपालवधमहा-काव्यस्य-उपजीव्यं महाभारतम् इतिहासप्रसिद्धं महाकाव्यं वर्तते। आचार्य-कुन्तकोऽपि वक्रोक्तिजीवितमिति ग्रन्थे कथयति यत्-

**'रामायणमहाभारतयोश्च शान्ताङ्गित्व पूर्वसूरिभिरेव निरूपितम्'**[2]
परन्तु माघ-महाभागेन मूलरसं (शान्तरसं) विहाय शिशुपालवधे वीररसस्य प्रयोगो कृतः वर्तते। कविना स्वकीयशिशुपालवधमहाकाव्ये श्रीकृष्ण-शिशुपालयोः युद्धस्य वर्णनं शिशुपालवधं च मुख्य विषयरूपेण स्वीकृतमिति। यतः वीररसः एव अस्मिन् काव्ये अङ्गीरसरूपेण स्वीकृतः वर्तते। रसपरिवर्तनवक्रता प्रबन्धवक्रतायाः अन्तर्गते एव आगच्छति। एवञ्च-

यत्र नाम मात्रादेव काव्यस्य कथावस्तुः इत्यस्य ज्ञानं प्राप्यते तत्र नामकरणवक्रता विद्यमानं वर्तते। कुन्तकस्य अभिप्रायः अयमस्ति यत् ग्रन्थस्य नामकरणेऽपि वैचित्र्यम अपेक्षितमिति। यथा- शिशुपालवधमहा-काव्ये नाममात्रात्र्येव शिशुपालवधस्य ज्ञानं भवति। अतः प्रबन्धवक्रतायाः अन्तर्गते नामकरणवक्रता आगच्छति।

**उपसंहारः-**

शिशुपालवधमहाकाव्यं संस्कृतसाहित्यस्य महत्त्वपूर्णं काव्यमस्ति। अस्मिन् महाकाव्ये वीररसः अंगीरसः वर्तते। शिशुपालवधे पदे-पदे वक्रता (कुटिलतां) दृश्यमाना वर्तते। अत्र वक्रोक्तेः भेद-प्रभेदानां वर्णनमस्ति। एवंप्रकारेण निष्कर्षरूपेण वक्तुं समर्थोऽस्मि यत् इदं महाकाव्यं वक्रोक्तिदृशा साफल्यमधिगच्छति।

---

1. शि.व. 1.39
2. व.जी. चतुर्थोन्मेषः पृ. 441

# माघकाव्ये गुणविचारः

**डॉ. विनयकुमारमिश्रः**

पूर्वशोधछच्छात्रः, साहित्यविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रिय–

संस्कृतविश्वविद्यालयः, नवदेहली–110016

शिशुपालवधस्य रचनाकारः महाकविमाघः प्रमुखतया ओजगुणस्य कविरस्ति। अस्मिन् महाकाव्ये वीररस्य प्राधान्येन ओजगुणस्य प्रधानता स्वाभाविकी अस्ति। स्वकाव्यप्रतिभाबलेन महाकविरयं काव्यस्य प्रमुखतत्त्वानां सहजस्वाभाविकं कौशलपूर्णं प्रयोगं करोति स्वरचितमहाकाव्ये। माधुर्यगुणस्य प्रयोगमपि माघकाव्ये यत्र तत्र भवति परमस्य प्रयोगं तत्र स्वल्पमस्ति। प्रसादगुणस्य स्थितिस्तु सर्वत्र विराजते अस्मिन् महाकाव्ये। यद्यपि प्रसादगुणस्य प्रयोगः बहुलतया क्रियते परमोजगुणस्य प्रधानता एव अस्य माघकाव्यस्य विशेषता वर्तते।

गुणाः के? इति विषये विविधमतं प्रचलितम्। भामहविवरणस्य रचनाकारेण भट्टोद्भटेन स्थापितमिदं यत् गुणालंकारमध्ये भेदः नास्ति। तेन कथितं यत् "समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादयः गुणालंकाराणां भेदः, ओजः प्रभृतीनाम् अनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेदः।"[1]

वामनस्य मते गुणालंकारयोः मध्ये भेदः वर्तते। "काव्यशोभायाः कर्तारो धर्मा गुणाः"[2]। ये खलु शब्दार्थयोः धर्माः काव्यशोभां कुर्वन्ति ते गुणाः। ते च ओजप्रसादादयः। न यमकोपमादयः। "तदतिशयहेतवस्त्व–लङ्कारा:"[3]। तस्याः काव्यशोभायाः अतिशयस्तदतिशयः अस्य हेतवः। तु

1. भामहविवरणम् भट्टोद्भट्टः
2. काव्यलङ्कारसूत्रवृत्तिः वामनः 3.1.1
3. काव्यलङ्कारसूत्रवृत्तिः वामनः 3.1.2

शब्दो व्यतिरेके। अलङ्काराश्च यमकोपमादयः। आनन्दवर्धनेन गुणालङ्कारमध्ये भेदः कृतः–

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।**
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्॥**

ये तमर्थं रसादिलक्षणमङ्गिनं सन्तमवलम्बन्ते ते गुणाः शौर्यादिवत्। वाच्यवाचकलक्षणान्यङ्गानि ये पुनस्तदाश्रितास्तेऽलङ्कारा मन्तव्याः कटकादिवत्। मम्मटाचार्येण वामनानन्दवर्धनयोः गुणस्य परिभाषायाः कानिचित् तत्त्वानि स्वीकृत्य स्वमतमेवं प्रकटितम्–

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥**[1]

यथा शौर्यादय आत्मन एव धर्मा भवन्ति न शरीरस्य तथैव माधुर्यादयो गुणाः रसस्यैव धर्मा भवन्ति न वर्णानाम्।

वामनस्य दशविधगुणानां खण्डनं कृत्वा तेषामन्तर्भावः त्रिविधगुणेषु कृतो मम्मटाचार्येण। तेन कथितम्– माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश। माधुर्यगुणस्य लक्षणं तस्य विस्तारञ्च कथ्यते आचार्येण एवं–

**आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्।**[2]
**करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्।**[3]

**ओजगुणस्य लक्षणं तस्य विस्तारं आचार्यमेवमाह–**

**दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।**[4]
**बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च।**[5]

---

1. काव्यप्रकाशः कारिका 66
2. काव्यप्रकाशः कारिका 68, सूत्र 89
3. काव्यप्रकाशः कारिका 68, सूत्र 90
4. काव्यप्रकाशः कारिका 69, सूत्र 91
5. वही कारिका 69, सूत्र 92

**प्रसादगुणस्य विषये मम्मटाचार्यस्य मतमिदं यत्–**

> **शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः।**
> **व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्रविहितस्थितिः॥**[1]

अर्थात् माधुर्यगुणः शृङ्गाररसे प्रमुखतया वर्तते, परं करुणविप्रलम्भ-शृङ्गारशान्तसरसेषु च तस्य स्थितिरतिशयान्विता चमत्कारजनिका च भवति। परं बीभत्सरौद्ररसयोः तस्याधिक्यं विशेषचमत्कारयुक्तं भवति। सर्वेषु रसेषु सर्वासु रचनासु वसन् प्रसादगुणः चित्ते मनसि क्षिप्रमेव व्याप्तं भवति।

शिशुपालवधे गुणानाम् आधाने महाकविमाघेन इयं कल्पना कृता यत् कालज्ञस्य राज्ञः कृते तेजः क्षमा वा धारयितुं कोऽपि नियमः नास्ति तथैव रसभावविदः कवेः ओजप्रसादगुणयोः स्थापनायाः निश्चितविधिः न वर्तते।

> **तेजः क्षमा व नैकान्तं कालज्ञस्य महीपतेः।**
> **नैकमोजः प्रसादो वा रसभावविदः कवेः॥**[2]

कवेः इयं स्वतन्त्रता काव्यशास्त्रीयप्रगल्भता वर्णनचातुरी तस्य काव्ये पदे पदे परिलक्ष्यते। यद्यपि नैकः गुणानां सन्निवेशः कविना स्वकाव्ये कृतः तथापि प्रसङ्गानुकूलरसप्रयोगैः समस्तगुणानामन्तर्भावः माधुर्यौजप्रसादगुणेषु भवति। सर्वप्रथमः माधुर्यगुणस्य स्थितिः तस्य प्रयोगश्च माघकाव्ये एवं वर्तते।

चतुर्थसर्गे रैवतकवर्णनप्रसङ्गे शृङ्गाररसवर्णने माधुर्यगुणस्य प्रयोगः कविना एवं कृतः–

> **बिम्बोष्ठं बहु मनुते तुरङ्गवक्र-**
> **श्चुम्बन्तं मुखमिह किन्नरं प्रियायाः।**
> **श्लिष्यन्तं मुहुरितरोऽपि तं**
> **निजस्त्रीमुत्तुङ्गस्तनभरभङ्गभीरुमध्याम्॥**[3]

---

1. तत्रैव कारिका 70, सूत्र 93
2. शिशुपालवधम् 2.83
3. शिशुपालवधम् 4.38

तत्पर्वतप्रसङ्गे एव माधुर्यगुणस्य शृङ्गाररसयुक्तेऽस्मिन् उदाहरणे सुखिनः जनाः सहवधूभिः विशिष्टसुरतानां सेवनं कुर्वन्ति–

**सवधूकाः सुखिनोऽस्मिन्ननवरतमन्दरागतामरसदृशः।**
**नासेवन्ते रसवन्न नवरतममन्दरागतामरसदृशः॥**[1]

पञ्चमे सर्गे नदीकरिण्योः नायकनायिकयोः रूपे कल्पना अद्भुदस्ति। शृङ्गाररसे माधुर्यगुणस्य इदृशी कल्पना कविरेषरेव कर्तुं शक्नोति–

**संसर्पिभिः पयसि गैरिकरेणुरा-**
**गैरम्भोजगर्भरजसाङ्गनिषङ्गिणा च।**
**क्रीडोपभोगमनुभूय सरिन् महेभावन्योन्य-**
**वस्त्रपरिवर्तमिव व्यधत्ताम्॥**[2]

षष्ठे सर्गे वसन्तऋतुवर्णने कथं भ्रमरी माधवीलतायाः परगेण समेधितमेधया भवति उच्चस्वरेण गायनं करोतीति अस्य वर्णने माधुर्यगुणस्य संधानमेवं कृतं कविना–

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥**[3]

विप्रलम्भशृङ्गारान्तर्गते माधुर्यगुणस्य प्रयोगे प्रोषितभर्तृकायाः निश्चितमरणं तस्या अम्बुमुचं प्रति दैन्यं रोषञ्च दर्शितम्–

**पटलमम्बुमुचां पथिकाङ्गना सपदि जीवितसंशयमेष्यती।**
**सनयनाम्बुसखीजनसम्भ्रमाद्विधुरबन्धुरमैक्षत॥**[4]

माधुर्यगुणस्य विषये कवेः विचारमित्थमस्ति–

**अतिकोमलमेकतोऽन्यतः सरसाम्भोरुहवृन्तकर्कशम्।**
**वहति स्फुटमेकमेव ते वचनं शाकपलाशदेश्यताम्॥**[5]

---

1. शिशुपालवधम् 4.51
2. शिशुपालवधम् 5.39
3. शिशुपालवधम् 6.20
4. तत्रैव 6.29
5. शिशुपालवधम् 16.18

अत्र अतिकोमलशब्देन माधुर्यस्याभिप्रायः। अपि च मधुरं बहिरन्तर-प्रियम्, प्रकटं मृदूनां जल्पत इत्यनयोः पद्ययोरपि माधुर्यगुणस्य विषये सङ्केतः कृतः। स्वमुखेन कविः माधुर्यगुणं प्रशंसति।

**मधुरैरपवादकरैरिव स्मृतिभुवः पथिका हरिणा इव।**
**कलतया वचसः परिवादिनीस्वरजिता रजिता वशमाययुः॥**[1]

इत्थंभूतस्य माधुर्यगुणस्य प्रसारो माघेन स्वकाव्ये न केवलं षष्ठे सर्गे अपितु अन्येष्वपि सर्गे कृतः। यथा द्वारिकापुरीप्रसङ्गे माधुर्यगुणाधाने कविः कथयति यत् अम्बराणि वस्त्राणि केवलं नामतोऽम्बरमिति नाम्नै व आकाशसाम्यं न दधुः अपितु अर्थक्रिययापि तत्साम्यं न दधुः।

**छन्नेष्वपि स्पष्टतरेषु यत्र स्वच्छानि नारीकुचमण्डलेषु।**
**आकाशसाम्यं दधुरम्बराणि न नामतः केवलमर्थतोऽपि॥**[2]

अपि च द्वारिकापुरीवर्णने समुद्रमध्ये हेमप्राकारप्रभया दिशः पिङ्गलवर्णाः कुर्वती या पूः समुद्रोदकं भित्वा वडवायामखे हव्यं वहतीति।

**मध्येसमुद्रं ककुभः पिशङ्गीर्या कुर्वती काञ्चनवप्रभासा।**
**तुरङ्गकान्तामुखहव्यवाहज्वालेव भित्वा जलमुल्ललांस॥**[3]

तथैव रैवतकपर्वतवर्णने ह्रदेषु वसन्तः त्रिंशद्वर्षकरिणः कुशेशयैः शतपत्रैः प्रीत्या क्रीडन्ति। उद्दीपकस्वरैः सिद्धगणैः स्वस्त्रीणां समीपे उच्चैः प्रगीयते।

**कुशेशयैरत्र जलाशयोषिता मुदा रमन्ते कलभा विकस्वरैः।**
**प्रगीयते सिद्धगणैश्च योषितामुदारमन्ते कलभाविकस्वरैः॥**[4]

षष्ठे सर्गे वसन्तऋतुवर्णने माधुर्यगुणस्य प्रयोगः द्रष्टव्यः

---

1. शिशुपालवधम् 6.9
2. शिशुपालवधम् 3.56
3. शिशुपालवधम् 3.33
4. शिशुपालवधम् 4.33

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः।।**[1]

एवमेवान्येष्वपि शृङ्गायुक्तस्थलेषु माधुर्यगुणस्य स्थितिर्दृश्यते एव। सम्प्रति प्रसादगुणस्य स्थिति माघकाव्ये स्पष्टीक्रियते। शब्दश्रुतिमात्रेणार्थस्य प्रतीतिः सर्वेषु रसेषु सर्वासु रचनासु च यत्र भवति तत्र प्रसादो गुणः भवति। अस्मिन् विषये ध्वन्यालोककारो भणति।

**सम्पर्कत्वं काव्यस्य यत्तु सर्वरसान् प्रति।**
**स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः।।**[2]

शिशुपालवधेऽस्य गुणस्याभिव्यक्तिः प्रथमसर्गादेव जायते। तद्यथा–

**स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत।**
**जिगाय जम्बूजनितश्रियः श्रियं सुमेरु शृङ्गस्य तदा तदासनम्।।**[3]

तथैव द्वितीये सर्गे हरिः यावत् अर्थपदां वाचामादाय विरराम। तथाहि महीयांसः स्वभावेन मितभाषिणः भवन्ति।

**यावदर्थपदां वाचमेवमादाय माधवः।**
**विरराम महीयांसः प्रकृत्या मितभाषिणः।।**[4]

काव्येऽस्मिन् कथं रसानां प्रयोगे प्रसादगुणस्य अन्तर्भावः क्रियते अस्योदाहरणम् अग्रे प्रस्तुतम्। षष्ठे सर्गे ऋतुवर्णनप्रसङ्गे प्रसादगुणस्यान्तर्गते शृङ्गाररसस्य प्रयोगं एवं क्रियते कविना।

**प्रियतमेन यया सरुषा स्थितिं न सह सा सहसा परिरभ्य तम्।**
**श्लथयितुं क्षणमक्षमताङ्गना न सहसा सहसा कृतवेपुथः।।**[5]

अपि च, कविः कथयति हेमन्ते भवाः तासु रजनीसु के युवानः शेरते स्वपन्ति वा अर्थात् केऽपि न।

---

1. शिशुपालवधम् 6.2
2. ध्वन्यालोकः 2.10
3. शिशुपालवधम् 1.19
4. शिशुपालवधम् 2.13
5. शिशुपालवधम् 6.57

**कान्ताजनेन रहसि प्रसभं गृहीत-**
**केशे रते स्मरसहासवतोषितेन।**
**प्रेम्णा मनःसु रजनीष्वपि हैमनीषु**
**के शेरते स्म रसहासवतोषितेन॥**[1]

प्रसादगुणस्यान्तर्गते हास्यरसस्य प्रयोगो तदा प्राप्यते पञ्चदशे सर्गे यदा शिशुपालः कथयति यत् कृष्णस्य सञ्ज्ञा मधुसूदनः मधुक्षौदं पीडनेन ताडितेन प्रथितोऽस्ति मधुनामासुरात् वधो न।

**असुरस्त्वया न्यवधि कोऽपि मधुरिति कथं प्रतीयते।**
**दण्डदलितसरघः प्रथसे मधुसूदनस्त्वमिति सूदयन्मधु॥**[2]

अपि च–

**त्वयि पूजनं जगति जाल्म कृतमिदमपाकृते गुणैः।**
**हासकरमघटते नितरां शिरसीव कङ्कतमपेतमूर्धजे॥**[3]

वीररसस्तु अस्य महाकाव्यस्य अङ्गीरस एव। अस्य प्रयोगो तु प्रायः ओजगुणे भवति परं कविना प्रसादगुणस्यान्तर्गतेऽपि अस्य प्रयोगः कृतः। प्रथमसर्गस्य उदाहरणं द्रष्टव्यम् रणेषु तस्य प्रहितेन प्रचेतसा।

**प्रहर्तुरेवोरगराजरज्जवो**
**जवने कण्ठं सभयाः प्रपेदिरे॥**[4]

रौद्ररसेऽपि ओजगुणस्य प्रधानता भवति परं प्रसादगुणस्यान्तर्गतेऽपि कविना अस्य श्लक्ष्णः प्रयोगः कृतः।

**पुर एव शार्ङ्गिणि सवैरमथं पुनरमु तदर्चया।**
**मन्युरभजदवगाढतरः समदोषकाल इव देहिनं ज्वरः॥**[5]

---

1. शिशुपालवधम् 6.77
2. शिशुपालवधम् 15.23
3. शिशुपालवधम् 15.33
4. शिशुपालवधम् 1.56
5. शिशुपालवधम् 15.2

बीभत्सरसस्य प्रयोगोऽपि दृश्यते प्रसादगुणेऽत्र।

**त्वयि भक्तिमताः न सत्कृतः कुरुराजा गुरुरेव चेदिपः।**
**प्रियमांसमृगाधिपोज्झितः किमवद्यः करिकुम्भजो मणिः॥**[1]

चतुर्दशे सर्गे भयानकरसस्य प्रयोगोऽपि प्रसादगुणे क्रियते कविना।

**यस्तवेह सवने न भूपतिः कर्म कर्मकरवत्करिष्यति।**
**तस्य नेष्यतिवपुः कबन्धतां बन्धुरेव जगतां सुदर्शनः॥**[2]

अस्मिनेव गुणे अद्भुद्रसस्योदाहरणमेवमस्ति

**विविनक्ति न बुद्धिर्दुर्विधः स्वयमेव स्वहितं पृथग्जनः।**
**यदुदीरितमप्यदः परैर्न विजानाति तदद्भुतं महत्॥**[3]

तस्मिन्न गुणे शान्तरसस्योदाहरणमपि एवं द्रष्टव्यम्

**उपकारपरः स्वभावतः सततं सर्वजनस्य सज्जनः।**
**असतामनिशं तथाऽप्यहो गुरुहृद्रोगकरी तदुन्नतिः॥**[4]

वीररसस्तु अस्य काव्यस्य अङ्गीरसः। वीररौद्रबीभत्सभयानकरसेष्वपि ओजगुणस्यैव प्रयोगः भवति प्रधानतया। गाढबन्धत्वमोजः ओजसमासभूयः इति सिद्धान्तानुशीलनेन समासबहुलरचनायाः सौन्दर्यं मनोहारि। वीररसे ओजगुणस्य प्रयोगः श्रीमाघेन एवं कृतः। रावणः स्वमुखेन वीरतायाः वर्णनं करोति।

**प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोऽतिरागाद्दशमं चिकर्तिषुः।**
**अतर्कयद्विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः॥**[5]

वीररसस्यैव दशाननकरिभिः दिग्गजाबूपराजयस्य वर्णनं कविना प्रथमसर्गे एवं कृतम्

---

1. शिशुपालवधम् 16.45
2. शिशुपालवधम् 14.16
3. शिशुपालवधम् 16.39
4. शिशुपालवधम् 16.22
5. शिशुपालवधम् 1.49

**तदीयमातङ्गघटाविघट्टितैः**
**कटस्थलप्रोषितदानवारिभिः।**
**गृहीतदिक्कैरनपुनर्निवर्तिभिश्चिराय**
**याथार्थ्यमलम्भि दिग्गजैः॥**[1]

अपि च विंशे सर्गे

**इतरेतरसंनिकर्षजन्मा गलसंघट्टविकीर्णविस्फुलिङ्गः।**
**पटलानि लिहन्बलाहकानामपरेषु क्षणमज्ज्वलत्कृशानुः॥**[2]

बीभत्सरसवर्णने ओजगुणस्यैव प्राचुर्यं दृश्यते। अष्टादशसर्गे दीप्तजिह्वाः शिवानां रूदनस्य दृश्यमेवम् उपस्थापितम्।

**ओजोभाजां यद्रणे संस्थिता-**
**नामादत्तीव्रं सार्धमङ्केन नूनम्।**
**ज्वालाव्याजादुद्वमन्ती तदन्तस्-**
**तेजस्तारं दीप्तजिह्वा ववाशे॥**[3]

**नैरन्तर्यच्छिन्नदेहान्तरालं दुर्भक्षस्य ज्वालिनावाशितेन।**
**योद्धुर्बाणप्रोतमादीप्यं मांसं पाकापूर्वस्वादमादे शिवाभिः॥**[4]

अपि च

**क्रव्यात्पूगैः पुष्कराण्यानकानां प्रत्याशाभिर्मेदसो दारितानि।**
**आमीलानि प्राणिनः प्रत्यवस्यान्कालो नूनं व्याददावाननानि॥**[5]

रौद्ररसस्य वर्णने ओजगुणस्योदाहरणे अप्रतिमम्। पञ्चदशे सर्गे यदा श्रीमाघः राज्ञा क्रोधान् वर्णयति-

---

1. शिशुपालवधम् 1.64
2. शिशुपालवधम् 20.26
3. शिशुपालवधम् 18.75
4. शिशुपालवधम् 18.76
5. शिशुपालवधम् 18.78

**शितितारकानुमितताम्रनयनमरुणीकृतं क्रुधा।**
**बाणवदनमुददीपि भिये जगतः सकीलमिव सूर्यमण्डलम्।।**[1]

अपि च

**अनिशान्तवैरदहनेन विरहितवतान्तरार्द्रताम्।**
**कोपमरुदभिहतेन भृशं नरकात्मजेन तरुणेव जज्वले।।**[2]

युद्धस्य प्रसङ्गे भयानकरसेन परिपुष्टोऽयमोजगुणः स्ववर्णानपि तथैवाभिव्यनक्ति–

**द्रुतद्रवद्रथचरणक्षतक्षमातलोल्लसद्‌बहुलरजोवगुण्ठितम्।**
**युगक्षयक्षणनिरवग्रहे जगत्पयोधिर्जल इव मग्नमाबभौ।।**[3]

अपि च

**भित्वा घोणामायसेनाधिवक्षः स्थूरीपृष्ठो ग्रार्धपक्षेण विद्धः।**
**शिक्षाहेतोगार्ढरज्ज्वेव बद्धो हर्तुं वक्त्रं नाशकद् दुर्मुखोऽपि।।**[4]

एतेषु पद्येषु ओजगुणस्याभिव्यञ्जका वर्णाः टधरभादयः वर्णाः साक्षान्न केवलं रसस्य परिपोषकतामपितु प्रसङ्गानुकूलतामपि धत्ते।

✦✦✦

1. शिशुपालवधम् 15.48
2. शिशुपालवधम् 15.50
3. शिशुपालवधम् 17.60
4. शिशुपालवधम् 18.22

# माघस्याऽऽधमर्ण्यमौत्तमर्ण्यञ्च

**डॉ. सुरेन्द्रपालसिंहः**
असि.प्रोफेसर, संस्कृत-विभागः
चौधरीमहादेवप्रसादकालेजः,
प्रयागराजः, उत्तरप्रदेश

कवीनां वाचस्पतिसहस्राणां प्रतिभोपभुक्ताऽपि काव्यस्थितिः कदापि क्षीणा न भवति - वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः। निबद्धा सा क्षयं नैति प्रकृतिर्जगतामिव॥[1] अतः पूर्वकविभिः सह संवादोऽनुचितन्नास्ति प्रत्युत स्वाभाविकोऽस्ति। पूर्वकाव्येभ्यो रामणीयकग्रहणेन काव्यवस्तु अधिकतरं चकास्तितराम्। पुनरुक्तिरिव न भाति, यथा शशिच्छायमादाय तन्व्या मुखं शोभतेतरां - आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि। वस्तु भातितरां तन्व्याः शशिच्छायामिवाननम्॥[2] अथ च यथा तैरेव वर्णैरनन्तवाङ्मयस्य पदावली रचिता भवति तथैव पुरातनी वस्तुरचनैव नूतने काव्यवस्तुनि विस्फुरति - अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी। नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति॥[3] शिशुपालवध-स्याऽध्ययनेन सुस्पष्टं भाति यद् ग्रन्थोऽसौ यैस्त्रिभिर्महाकविभिर्विशिष्य-प्रभावितोऽस्ति ते सन्ति कालिदासः भारविः भट्टिश्च। शिशुपालवधस्य पदयोजनायां वस्तुयोजनायां भावनिष्पत्तौ चैषामेवच्छाया यत्र तत्राभासते। क्रमेण द्रष्टुं शक्यते।

पदभावच्छन्दःप्रबन्धयोजनाक्षेत्रे माघः कविकुलगुरुणा भृशं प्रभावितोऽस्ति। यथा रघुवंशे सीतां समुद्रमाहात्म्यं श्रावयता रामेणोक्तं - अमुं युगान्तोचित-

1. ध्वन्यालोकः, 4.10
2. तत्रैव, 4.14
3. तत्रैव, 4.15

योगनिन्द्रः संहृत्य लोकान् पुरुषोऽधिशेते॥[1] अर्थाद् युगान्तकाले योगनिद्रो विष्णुः समस्तलोकान् आत्मनि संहृत्य सागरेऽस्मिन्नेव शेते। शिशुपालवधवर्णने यदा समुद्रो द्वारिकात इन्द्रप्रस्थं गच्छन्तं कृष्णं क्रोडमागतं दृष्टवान् तदा हर्षातिरेकेण उत्तुङ्गतरङ्गबाहू प्रसार्यैवं स्वागतमाचरितवान्–

**तमागतं वीक्ष्य युगान्तबन्धुमुत्सङ्गशय्याशयमम्बुराशिः।**
**प्रत्युज्जगामेव गुरुप्रमोदप्रसारितोत्तुङ्गतरङ्गबाहुः॥[2]**

रघुवंशकाव्ये आकाशगङ्गातरङ्गशीतल ऐरावतमदगन्धिर्वायुः सीताया मुखस्य स्वेदलवान् दूरीकरोति – असौ महेन्द्रद्विपदानगान्धिश्त्रिमार्गगावीचि-विमर्दशीतः। आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान् मुखे ते॥[3] शिशुपालवधे च समुद्रस्याऽनुतटं गच्छतः कृष्णस्य स्वेदलवान् शीतलैलालता-स्फालनाल्लब्धगन्ध आकाशवायुर्दूरीकरोति–उत्सङ्गिताम्भः–कणको नभस्वानु-दन्वतः स्वेदलवान् ममार्ज। तस्यानुवेलं व्रजतोधिवेलमेलालतास्फालनलब्ध-गन्धः॥[4] अत्र भावेन सहैव 'स्वेदलवान्' पदमपि माघेनाऽनुसृतम्।

रघुवंशस्य नवमसर्गे कालिदासेन द्रुतविलम्बितछन्दसि मनोरमं यमकयुगलमाहितम्। योजनाया अस्या आकर्षणेन माघेनापि षष्ठे सर्गे ऋतुवर्णनं यमकयुक्तपदमाधुर्येण सह तेनैव छन्दसा कृतम्। यत्र कुत्र तु पदावलिरपि कालिदासमेवाऽनुकृता। यथा–

| **कालिदासः** | **माघः** |
|---|---|
| 1. ययावनुद्धातसुखेन मार्गम्। (रघु. 2.72) | ययावनुद्धातसुखेन सोऽध्वना॥(12/2) |
| 2. स्वमेव मूत् र्यन्तरमष्टमूर्तिः। (कु.सं. 1.57) | अष्टमूर्तिधरमूर्तिरष्टमी। (14/18) |
| 3. स्मरमते रमतेस्म वधूजनः। (रघु. 9.47) | स्मरमयं रमयन्ति विलासिनः। (6/6) |
| 4. प्रतीपगामुत्तरतोऽस्य गङ्गाम्। (रघू. 16.33) | प्रतीपनाम्नी कुरुतेस्म निम्नगाः। (12/57) |

1. रघुवंशम्, 13.6
2. शिशुपालवधम्, 3.78
3. रघुवंशम्, 13.20
4. शिशुपालवधम्, 3.79

| | |
|---|---|
| 5. यावत् प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तम्। (रघु. 5.71) | व्रजति विषयमक्ष्णामंशुमाली न यावत्तिमिरमखिलमस्तं तावदेवारुणेन॥ (11/25) |
| 6. आकुमारकथोद्घातम्। (रघु. 4.68) | आकुमारमखिलाभिधानवत्। (13/68) |
| 7. स्त्रीणां प्रियालोकफलो हि वेशः। (कुमारसं. 17.22) | कामिनीनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन। (11/33) |

रघुवंशस्य पञ्चमसर्गे प्रभातवर्णनप्रसङ्गे उभयपक्षेण विनीतनिद्रो गजः उत्तिष्ठति (शय्यां जहत्युभयपक्षविनीतनिद्राः स्तम्बेरमा मुखरशृङ्खल-कर्षिणस्ते।)[1] तथैव शिशुपालवधेऽपि एकपक्षेण विनीतनिद्रं गजं गजाधिरोहः पुनः शाययति-

**क्षितितटशयनान्तादुत्थितदान-**
**पङ्कप्लुतबहुलशरीरं शाययत्येष भूयः।**
**मृदुचलदपरान्तोदीरितान्दूनिनादं**
**गजपतिमधिरोहः पक्षकव्यत्ययेन॥**[2]

रघुवंशे इन्दुमत्याः स्वयंवरे मगधेश्वरपरन्तपेन स्वकीयेषु यज्ञेषु निरन्तरम् इन्द्र आहूयते। अतः शची सदैव प्रोषितपतिकैव भवति। तस्मात्कारणादसौ मन्दारपुष्पस्यालङ्करणम् अलकेषु न करोति-

**क्रियाप्रबन्धादमयध्वराणामजस्त्रमाहूतसहस्त्रनेत्रः।**
**शच्याश्चिरं पाण्डुकपोललम्बान् मन्दारशून्यानलकांश्चकार॥**[3]

युधिष्ठिरस्य यज्ञेष्वपि एतादृश्येव दशा नैकदेवाङ्गनामुक्ता-

**तत्र नित्यविहितोपहुतिप्रोषितेषु पतिषु द्युयोषिताम्।**
**गुम्फिता शिरसि वेणयो भवन्नप्रफुल्लसुरपादपस्त्रजः॥**[4]

---

1. रघुवंशम्, 5.72
2. शिशु., 11.7
3. रघु. 6.23
4. शिशु., 14.30

कुमारसम्भवे शङ्करस्य वरयात्राप्रसङ्गे शङ्करं द्रष्टुम्[1] अथ च रघुवंशे राजमार्गे व्रजन्त्यौ अज-इन्दुमत्यौ द्रष्टुं पुराङ्गनानां यादृश्यश्चेष्टाः कालिदासेन वर्णिताः[2] तदाधारेणैव श्रीकृष्णं द्रष्टुम् इन्द्रप्रस्थस्य पुरयोषितानां चेष्टा अपि वर्णिताः।[3] एवमेव यथा इन्दुमत्याः स्वयम्वरे इन्दुमतीं प्रति राज्ञां विविध चेष्टाः जाताः[4] तथैव इन्द्रप्रस्थे श्रीकृष्णं द्रष्ट्वा सुन्दरीणां चेष्टा वर्णिताः।[5]

महाकविभारविना याऽलङ्कृतशैली प्रारब्धा तया युगे तस्मिन् काव्यरचनाया मूल्याधारा एव परिवर्तिताः। किरातार्जुनीयम् एकं स्पृहणीयं स्पर्धनीयञ्च काव्यं जातम्। माघोऽपि तेन प्रभावित आकृष्टश्च जातः। शिशुपालवधस्य रूपरेखैव तेन किरातार्जुनीयमनुरूपा निर्मिता। तस्यादर्श आदरणीयोऽनुकरणीयश्च भारविरेवासीत्। भारवेर्भावं गृहीत्वा माघेन कथं मौलिकतया सज्जीकृत्य प्रस्तूयते इत्यनेन पद्येनाऽलं प्रतिभाति -

**कृतावधानं जितबर्हिणध्वनौ**
**सुरक्तगोपीजनगीतनिःस्वने।**
**इदं जिघत्सामपहाय भूयसीं**
**न सस्यमभ्येति मृगीकदम्बकम्॥**[6]

**अयमेव भावो माघनैवं प्रस्तुतम्-**

**विगतसस्यजिघत्समघट्टयत्कलमगोपवधूर्न मृगव्रजम्।**
**श्रुततदीरितकोमलगीतकध्वनिमिषेऽनिमेषेक्षणमग्रतः॥**[7]

द्वयोः ग्रन्थयोः साम्यमेवं द्रष्टुं शक्यते - द्वयोः प्रारम्भः श्रीशब्देन भवति। किराते प्रतिसर्गमन्तिमश्लोके लक्ष्मीशब्दः प्रयुक्तोऽस्ति शिशुपालवधे

---

1. कुमारसम्भवम्, 7.57-68
2. रघुवंशम्, 7.5-15
3. शिशु. 12.30-38
4. रघु., 6.12-19
5. शिशु., 13.41-48
6. किरातार्जुनीयम्, 4.33
7. शिशु., 6.49

च श्रीशब्दः प्रयुक्तोऽस्ति। किराते तृतीयसर्गे व्यासस्यागमने युधिष्ठिरेण सश्रद्धं सविनयं स्वागतमाचरितं तथैव च नारदस्यागमने श्रीकृष्णेन शिशुपालवधे प्रायस्तैरेव शब्दैर्नारदस्य स्वागतं कृतम्। किराते यथाऽर्जुनस्य प्रस्थानकाले मङ्गलभङ्गभीरुणा द्रौपद्या अश्रुपातभयेन लोचने न निमीलिते[1] तथैव शिशुपालवधे शिशुपालस्य सेनायाः प्रस्थानकाले प्रियतमं युद्धार्थं प्रेषयन्त्या अङ्गनया लोचनजलन्न मुच्यते।[2] किराते चतुर्थसर्गेऽस्ति शरद्वर्णनं तर्हि शिशुपालवधे षष्ठसर्गे षड्ऋतुवर्णनम्। एकत्र पञ्चमसर्गे हिमालयवर्णनं तर्हि अन्यत्र चतुर्थसर्गे रैवतकवर्णनम्। भारविना सप्तमसर्गे शिबिरसन्निवेशवर्णनं कृतं तर्हि अपरेण पञ्चमसर्गे तत्कृतम्। किरातेऽष्टमसर्गे शिशुपालवधे च सप्तमे सर्गेऽस्ति पुष्पावचयवर्णनम्। द्वयोरेवाऽष्टमसर्गे जलक्रीडावर्णनमस्ति। भारविना नवमसर्गे प्रभातं वर्णितं तर्हि माघेन एकादशे सर्गे वर्णितम्। उभयत्र नवमसर्गे सन्ध्यायाश्चन्द्रोदयस्य च वर्णनं कृतम्। किराते नवमे किन्तु शिशुपालवधे दशमे सर्गे सुरतपानगोष्ठी वर्णिता। पूर्वत्र त्रयोदशे सर्गे शिवदूतेनाऽर्जुनस्य वाद-विवादो वर्णितस्तर्हि परत्र षोडशेसर्गे शिशुपालस्य दूतेन सात्यक्यादेर्वादविवादो वर्णितोऽस्ति। भारविना यदि चतुर्दशे सेनासंनाहस्य युद्धस्य च वर्णनं कृतं तर्हि माघेनाऽपि पञ्चदशे सप्तदशेऽष्टदशे च सर्गेषु तथैव कृतम्। एकत्र यदि पञ्चदशे चित्रालङ्कारेण युद्धं वर्णितं तर्हि अन्यत्र एकोनविंशतौ सर्गे कृतम्। किराते हिमालयवर्णने यमकं प्रयुक्तन्तर्हि शिशुपालवधे रैवतकवर्णने प्रयुक्तम्। एवमेव यथाऽर्जुनेन शिवस्तुतिर्वर्णिता तथैव भीष्मेण श्रीकृष्णस्य स्तुतिः कृता।

यदा-कदा प्रतिभाति यन्माघेन किरातार्जुनीयं स्मृतिपथे प्रतिष्ठाप्य काव्यस्य रुपरेखा चिन्तिता। माघेन येषु विषयवस्तुषु भारविरनुसृतस्तेषु सर्वेष्वसावतिशेते।

महाकविर्माघो भट्टिमहाकवेरपि शास्त्रीयनिरूपणपाटवेन प्रभावितो भाति। माघस्य व्याकरणप्रियत्वं व्याकरणप्रयोगप्रदर्शनञ्च भट्टिकाव्येन

---

1. तुषारलेखाकुलितोत्पलाभे पर्यश्रुणीमङ्गलभङ्गभीरुः।
   अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे॥ किरात. 3.66
2. न मुमोच लोचनजलानि दयितजयमङ्गलैषिणी। शिशुपालवधम्, 15.85

प्रभावितं भाति। यत्र कुत्र तु श्लोकभावा अपि भट्टिकाव्यमनुकृताः प्रतीयन्ते। यथा महाकविना भट्टिनोक्तं-

**क्व स्त्रीविषह्याः करजाः क्व**
**वक्षो दैत्यस्य शैलेन्द्रशिलाविशालम्।**
**संपश्यतैतद् द्युसदां सुनीतं**
**विभेद तैस्तन्नरसिंहमूर्तिः॥**[1]

अर्थात् कामिन्याः कृतेऽपि असहनीया नखाः क्व क्व च शैलेन्द्रशिला इव हिरण्यकशिपोः विशालं वक्षःस्थलम्। किन्तु देवानां विधानन्तु पश्यत, तैरेव नखाग्रैः नृसिंहेन हिरण्यकशिपोर्वक्षःस्थलं छिन्नं कृतम्। एष एव भावो माघस्य श्लोकेऽस्मिन् प्रतिबिम्बितो भवति -

**सटाच्छटाभिन्नघनेन बिभ्रता नृसिंहसैंहीमतनुं तनुं त्वया।**
**समुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः॥**[2]

अर्थात् हे नृसिंह! कामिनीकुचस्पर्शभङ्गुरैः कराग्रैरैव त्वया हिरण्यकशिपोर्वक्षःस्थलं विदीर्णं कृतम्।

परवर्तीकाव्यरचनाशैल्यां माघस्यातङ्कसदृशः प्रभावो जातः। अतएवोच्यते माघेन निघ्नितोत्साहा नोत्सहन्ते प्रदक्रमे।परवर्तिकविभिर्यथाशक्ति माघस्य शैली अनुक्रियते स्म। परवर्तीषु काव्येषु सर्वश्रेष्ठस्थानं नैषधीयचरितस्यास्ति यत् काव्यकल्पनया व्युत्पत्त्या पदलालित्यकारणेन चोत्कृष्टं स्वीक्रियते किन्तु तत्रापि माघस्य च्छायाभासते यत्र तत्र। माघेन प्रेरितः श्रीहर्षः स्वकल्पनाया भव्यप्रासादान् प्रतिष्ठापितवान्। स्यादेतद् यत् श्रीहर्षस्य प्रतिभा ततोऽपि प्रवृद्धा जाता। प्रसङ्गेऽस्मिन् माघं प्रति श्रीहर्षस्यैवाऽधमर्ण्यं चिन्तयामो यतो हि 'प्रधानमल्लनिर्वहणन्यायेन' अन्येषामाधमर्ण्यं स्वत एव स्वीकरिष्यते।

द्वारिकापुर्या वर्णनप्रसङ्गे माघेनासौ निर्मलजलप्रतिबिम्बिता स्वर्गपुर्येवो-त्प्रेक्षिता - अदृश्यतादर्शतलामलेषु च्छायेव या स्वर्जलधेर्जलेषु।[3] श्रीहर्षेणाऽपि

1. भट्टिकाव्यम्, 12.59
2. शिशु., 1.47
3. शिशु., 3.35

कुण्डिनपुरं जलाशये प्रतिबिम्बिता सुरनगरीव मतमथ च जलयुक्तपरिखा जलाशयस्य प्रतिबिम्बात् प्रथगंशो मतः-

**विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या।**
**परिखाकपटस्फुटस्फुरत् प्रतिबिम्बानवलम्बिताम्बुनि।।**[1]

रात्रिकाले शुभचन्द्रिकाया धवलस्फटिकनिर्मिता द्वारिकाया सौधराजिः पृथक् न प्रतिभाति। अतः सौधमारुह्य सुन्दर्यो गगनगता देवाङ्गना इव प्रतीयन्ते स्म -

**स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फटिकसौधपङ्क्तीः।**
**आरुह्य नार्यः क्षणदासु यस्यां नभोगता देव्य इव व्यराजन्।।**[2]

एवमेव कुण्डिनपुरस्यापि सुन्दरी गगनचुम्बिनः सौधशिखरात् प्राणेश्वरस्य क्रीडागृहं गच्छन्ती साक्षादप्सरा एव प्रतीयते स्म -

**स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं**
**पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी।**
**साक्षादप्सरसो विमानकलितव्योमान एवाभवद्**
**यन्न प्राप निमेषमभ्रतरसा यान्ती रसादध्वनि।।**[3]

यादवरमणीनां शरीरसौष्ठवं वर्णयता माघेनैकावल्या रुचिरप्रयोगः कृतः। ताः सुन्दर्यः सौन्दर्येणाऽलङ्कृताः सौन्दर्यं यौवनागमेन यौवनागमः मदनविलासेन मदनविलासश्च प्रियसङ्गमजन्यहर्षेणाऽलङ्कृतः -

**चारुता वपुरभूषयदासां तामनूननवयौवनयोगः।**
**तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः।।**[4]

दमयन्त्याः सौन्दर्यवर्णनप्रसङ्गे श्रीहर्षेणाप्येतादृशा एव भावा व्यक्ताः- प्रथमं तावद् ब्रह्मणैवैषा लोकोत्तरा निर्मिता, यौवनेन पुनस्तस्याप्युपरि नीता मदनेन च पुनर्विभ्रमकलां शिक्षयित्वा अवर्णनीयैव कृता -

---

1. नैषधीयचरितम्, 2.79
2. शिशु., 3.43
3. नैषधीयचरितम्, 2.104
4. शिशु., 10.33

**सृष्टातिविश्वा विधिनैव तावत्तस्यापि नीतोपरि यौवनेन।**
**वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्पथपारमेव।।**[1]

युधिष्ठिरस्य राजसूययज्ञे भीष्मेण श्रीकृष्णस्य कूर्मवराहाद्यवताराणां महिमा गीता[2] तथैव नैषधेऽपि नलेन मध्याह्नार्चनप्रसङ्गे विष्णोरवताराणां स्तुतिर्गीता।[3]

युधिष्ठिरस्य यज्ञे कृष्णस्य प्रथमपूजनात् क्रुद्धेन शिशुपालेन कृष्णं प्रति यादृशानि कटुवचनानि उक्तानि तानि माघसदृशकृष्णभक्तास्याऽसह्यान्यासन्। अतस्तादृशानि वचनानि श्लेषेणाऽलङ्कृत्य तेषु अपरस्यार्थस्यापि सम्भावना माघेनोत्पादिता[4]। पुनः षोडशेसर्गे युद्धसन्नद्धशिशुपालस्य दूतेन प्रेषितः सन्देशः प्रियमप्रियं वोभयविधमर्थमावहति[5]। माघेन युद्धवर्णन-प्रसङ्गेऽर्थत्रययुतः श्लोको रचितः[6]। त्रयोदशे सर्गे श्लिष्टरचनां विधातुं श्रीहर्ष एतादृशेभ्यः स्थलेभ्य एव प्रेरितो जातः। येनाऽनेनाऽर्थपञ्चकयुता अपि श्लोका रचिताः।

रैवतकपर्वते रमणीभिः सह गायतां सिद्धानां स्वरस्य विशेषणं माघेन 'भाविक' इति दत्तम्-प्रगीयते सिद्धगणैश्च योषितामुदारमन्ते कलभाविक-स्वरैः।[7]

श्रीहर्षेणापि प्रभातवर्णनं कुर्वतां वैतालिकानां पदानां विशेषणं 'भाविक' इत्येव दत्तम् - श्रुतिमधुपदस्रग्वैदग्धीविभावितभाविकस्फुटरसभृशाभ्यक्ता वैतालिकैर्जगिरे गिरः[8]।

एवमेव इन्द्रप्रस्थं प्राप्य भीमार्जुनयोर्मध्यगतः कृष्णस्तथा भाति यथा द्वयोः ग्रहयोर्मध्यगतश्चन्द्रो दुरुधराख्यं योगं प्राप्य भवति -

1. नैषधीयचरितम्, 7.107
2. शिशु., 14.71-86
3. नैषधीयच., 21.55-93
4. शिशु., 15.1-34
5. शिशु., 16.2-34
6. शिशु., 19.116
7. शिशु., 4.23
8. नैषधीयचरितम्, 19.1

**पवनात्मजेन्द्रसुतमध्यवर्तिना**
**नितरामरोचि रुचिरेण चक्रिणा।**
**दधतेव योगमुभयग्रहान्तर-**
**स्थितिकारितं दुरुधराख्यमिन्दुना।।**[3]

एतदनुरूपमेव नैषधीयचरिते श्रीहर्षेणोक्तं यत् कर्णकुण्डलयोर्मध्यगतो दमयन्त्या मुखचन्द्रो निश्चितं दौरुधरीं स्थितिमाप्नोति –

**अवादि भैमी परिधाप्य कुण्डले**
**वयस्ययाभ्यामभितः समन्वयः।**
**त्वदाननेन्दोः प्रियकामजन्मनि**
**श्रयत्ययं दौरुधरीं धुरं ध्रुवम्।।**[4]

कालिदासभारविभट्टीनां कवितायाः प्रभावो माघस्य वर्णनेषु बहुत्र दृश्यतेऽतः पूर्वकवीननुकरणस्य दोषारोपणं माघे क्रियते किन्तु दोषारोपणमिदं नोचितं भाति। वस्तुतः साहित्यविकासे आधमर्ण्यौत्तमर्ण्ययोः महत्त्वपूर्णं योगदानं भवति। पूर्ववर्तिभ्यः प्राप्तस्थाने स्थित्वैव जनोऽग्रे पदं स्थापयति। अत एवोक्तं चलत्येकेनपादेन तिष्ठत्येकेन बुद्धिमान्। साहित्यसन्दर्भेपि शाश्वतं सत्यमिदं तथ्यम्। स्थितस्य पादस्य आधारो भवति पूर्ववर्त्त्युपजीव्यं साहित्यम्। नैपुण्यस्य हेतोः लोकशास्त्रकाव्याद्यवेक्षणमनिवार्यम्। काव्यरचनायाः प्रारम्भिकस्तरे कविः पूर्ववर्तिनां कवीनां कृतीरध्येति। अनन्तरं रचनाकाले तस्य यत्किञ्चित्प्रभावो भवत्येव। एष एवास्ति उपजीव्योपजीवकभावः।

वस्तुतो जीवनस्योत्कटमभिलाषमुद्घाटयता माघेनोक्तं – सुकविकीर्ति-दुराशयाऽदः काव्यं व्यधत्त शिशुपालवधाऽभिधानम्। अत्र तेन 'सुकविकीर्ति-दुराशा' इति पदेन अभिलाषः प्रकटितः। वयमनुमातुं शक्नुमो यत् तात्कालिकसाहित्यिकवातावरणे सुकविकीर्तिपूर्त्यर्थं माघेनात्यधिकः श्रमः कृतः स्यात्। नूतनकविकीर्तिः राजसभाविराजिकवीनां कृपादृष्टेरधीना भवति

1. शिशुपालवधम्, 13.22
2. नैषधीयचरितम्, 15.42

स्म। शूद्रकेण तु एतादृशी राजसभा हिंस्रजन्तुभरितः समुद्र एवोक्तः।[1] अतः पूर्ववर्तिनो भारवेर्वर्णनसदृशानि वर्णनानि चित्रयित्वा ततोऽग्रे गत्वा काव्यकौशल-प्रदर्शनादतिरिच्य माघस्य भिन्नमार्गो नाऽऽसीत्। तर्हि पूर्ववर्तिनां कवीनां वर्णनच्छायाऽऽश्चर्यजनिका नाऽस्ति। साहित्ये भावप्रस्तुतेर्नवीनदृष्टिकोण उत वा विवेचनस्य नावीन्यमेव मौलिकतेत्युच्यते। भावसाम्येन प्रभावग्रहण-मात्रेणैव वा मौलिकता न नश्यति। अतो माघकविः भावपरिपन्थी तु नैव वक्तुं शक्यते। तेन सादृश्यवादः स्वीकृतः। पूर्ववर्तिकाव्यानां वस्तुशिल्पसादृश्यं स्वीकृत्य मौलिकतया व्युत्पन्नतया च स्वस्य काव्यं तेन मण्डितम्।

✦✦✦

1. चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्ख्याकुलं।
   नीतिक्षुण्णतटञ्च राजकरणं हिंस्रैः समुद्रायते॥

# शिशुपालवधे महाकविमाघपाण्डित्यम्

**डॉ. सुभाषरतूड़ी**
पूर्वशोधच्छात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली– 110016

संस्कृतसाहित्यपाण्डित्यमयशैल्याश्चरमोत्कर्षो श्रीमाघे दृश्यते। कालिदासस्योपमाभागीरथी, भारवेरर्थगुरूतायमुना, दण्डिना हर्षस्य वा पदलालित्य–सरस्वती–तीर्थराजप्रयाग सदृशे, सकलकलादक्षे कविराजेऽत्र तीर्थराजः विराजते, अत एव कविवैशिष्ट्यवोधिनीसूक्तिरेषा "माघे सन्ति त्रयो गुणाः" इति गुणत्रयवासभूमित्वमस्य बोधयति।

माघे कालिदासवद्, उपमावैशिष्ट्यं मा भूत किन्तु तस्य कमनीयोप–मालङ्कृतिभिः अलङ्कृता कविना कामिनी विभ्राजत एव एवमेव भारविवन्माघे केवलमर्थगौरवमपि, माघस्य शब्दशय्या तु प्रसिद्धतया, नात्र मनागपि शब्दक्रमविपर्ययो विधातुं शक्यते। अत एव मर्मज्ञस्य धर्मपालस्य मणितिरेषा सर्वथा सत्यतानुप्राणिता प्रकाशते संस्कृतवाङ्मये–

**उमायाम्–**

**दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रन्मरीचिरोचिषम्।**
**विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रतंतीततीरिव।।**[1]

**माघेन निघ्निनहोत्साहा नोत्सहन्ते पदक्रमे।**
**स्मरन्तो भारवे रवेः कवयो कपयो यथा।।**

---

1. शिशु. 1.5

**रमणीयोपमानां प्राचूर्ये तथा शिशुपालवधे-**

अभूतोपमायाम्- पीतोपवीतो धारिणः गौराङ्गस्य नारदस्य आभा कथं भातीति वर्णयन् शरदि आकाशे विद्युदिव चकास्तीति कथयति यथा,

**कृपोपवीतं हिमशुभ्रमुच्चकैघनं घनान्ते तडितां गणैरिव।**[1]

**प्रतिपदोपमायाम्-**

**स तप्तकार्तस्वरभास्वराम्बरः**
**कठोरताराधिपलाञ्छनच्छविः।**
**विदिद्युते वाडवजातवेदसः**
**शिलाभिराश्लिष्ट इवाम्भसां निधिः॥**[2]

अत्र समुद्रोपमः हरि वाडवाग्नितुल्यश्च सुवर्णाम्वरेण इति प्रतिपादयति,

**कल्पितोपमायाम्-**

**स काञ्चने यत्र मुनेरनुज्ञया**
**नवाम्बुदाश्यामवपुर्न्यविक्षत।**
**जिगाय जम्बूजनितश्रियः श्रियं**
**सुमेरूशृङ्गस्य तदा तदासनम्॥**[3]

**राजनीतिनिरूपणे उपमाच्छटा यथा-**

**उतिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**
**समौ हि शिष्टैराम्नातो वर्त्स्यन्तावामयः स च॥**[4]

शत्रुस्तुवर्धमानो नोपेक्षयं यतो वर्धमानो रोगशत्रुश्च तुल्यवेव हानिप्रदौ। अनेकशः सूक्तयः माघस्य अर्थगौरवं परिपोषयन्ति यथा-

1. महीयांसः प्रकृत्या मितभाषिणः
2. सर्वः स्वार्थं समीहते

---

1. शिशु. 1.7
2. निधिः 1.20
3. शिशु. 1.19
4. शिशु. 2.10

3. अनुज्झिहतार्थ संबन्धः प्रबन्धो दुरूदाहरः

4. वृहत्सहायं कार्यान्तं क्षोदीयानपि गच्छति।

5. शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।

माघेन काव्यारम्भ एव स्वीयं पदसाहित्यं प्रकटितम्, किञ्च पदलालित्ये पद्यमिदं सुप्रसिद्धं राजते।

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।**[1]

माघकवेः पदलालित्यस्यैकमन्यमुदाहरणं दृश्यताम्,

**अनुप्रासयमकालङ्कारयोजनायां यथा-**

**नवपलाशपलाशवनपुरः स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोहरै।।**

अत्रापि शब्दशय्यां भासते भगवती भारती, अत एव 'माघेतेव च माघेन कम्पः कस्य न जायते' इति सूक्ति प्रसिद्धः।

पदयोजनायां, प्रबन्धनिर्वाहे, वस्तुचित्रणे, भावाङ्कने, यथासम्भवञ्चाऽऽदर्शन्य प्रस्तुतिकरणेऽपि ते परमप्रवीणा आसन्। दिश्यस्यां तर्हि सः कविकुलगुरूकालिदासवत् स्वीकर्तुं शक्यते।

महाकविर्माघस्य पर्यवेक्षणमतीवानुपं वर्तते, रसानामलङ्काराणां, छन्दसां च प्रयोगे स कुशलः शिल्पी वर्तते। तस्य प्रशंसायां कविराजशेखरेणोचितमेवोक्तम्-

**कृत्स्नप्रबोधकृद्वाणी भारवेरिव भारवेः।**
**माघेनेव च माघेन कम्पः कस्य न जायते।।**

शिशुपालवधमहाकाव्ये सर्वेषामेव रसानां साधिकारं परिपोषरतेन च सहृदयपरितोषं विदधता महाकविमाघेन प्राधान्येन वीरो रसस्तदङ्गतया च सर्वेऽन्ये रसाः यथास्थानं विन्यस्ताः रैवतकवर्णनम्, सूर्यास्तादिवर्णनम्,

---

1. शिशु. 6.20

सागरवर्णनमित्यादिस्थलानि प्रकृति प्रियतामस्य प्रतिपादयन्ति, नवसर्ग गतेमाघे नवशब्दो न विद्यते भोजादिप्रशंसित परमप्रसिद्धं पद्यमेकं निदर्शनीक्रियते–

**कुमुदवनमपश्रि श्रीमदम्भोजषण्डं**
**त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।**
**उदयमहिमरश्मिर्याति शीतांशुरस्तं**
**हतविधिलसितानां हा विचित्रो विपाकः॥**[1]

माघकविः प्रत्येकं वर्णने स्वभाविकत्वं पूर्णतया प्रदर्शितं, एतैरेव स्वाभाविकैर्वर्णनः कवेः पर्यवेक्षणशक्तेः पूर्णपरिचयः समुपलभ्यते, कस्यापि वस्तुनो विस्तरेण वर्णनस्य प्रतिभाऽपि माघे विशेषतोऽवलोक्यते एकस्मिन् समग्रे सर्गे श्रीकृष्णस्य भगवतो यात्रायां वर्णनं पूर्णं जातम्, यद् यथार्थत्वेन पूर्णमस्ति।

रैवतकं परितो दृष्टिः निक्षिपन्तु, कविना तद् कीदृशविशालहस्तीरूपेण प्रदर्शितम्। तथाहि–

**उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥**[2]

रैवतकपर्वतस्य प्रातःकालीनायाः सुषमायाः वर्णनमस्ति, रज्जुभिरिवोपर्युन्नताभिः रश्मिभिर्युक्तो भगवान् भास्करो रैवतकमेकत उदयति, अन्यतश्च चन्द्रोऽस्तं याति, अतः प्रतीयते यद् रैवतको गिरिरयं तादृशगजेन्द्रवच्छोभते, य उभयतो घण्टाद्वयेन वेष्टितोऽस्ति। महाकवेर्माघस्य कल्पनयैतयैव मुग्धाः भूत्वा प्राचीना रसमलोचकाः महाकविं माघम् घण्टामाघं इत्यभिधया "घण्टाकवि" नाम्ना वा कथयामासुः।

## व्याकरणज्ञानम्

साहित्यार्णव-पारगामी-पुराणनिगमागमविलक्षणविचक्षणमहाकविः माघस्य व्याकरणशास्त्रपाडित्यस्य विलक्षणप्रतिभा सर्वातिशायिनी अस्ति, अर्थस्य कुशलाभिव्यक्ती प्रदर्शनाय तस्य पार्श्वे व्यापकः शब्दभाण्डारस्य

---

1. शिशु. 11.64
2. शिशु.व. 4.20

प्रयोगः कविः महावैयाकरणत्वं रूपे अभिव्यक्तं कृतः। शब्दशास्त्रीय-चमत्कारपदे मनीषिणः हृदयस्य हठात् आह्लादितः करोति।

महाकविः पाणिनीप्रणीत व्याकरणशास्त्रस्य नीरसता सरस सुबोध-भाषायां प्रस्तुतौति,

**जाज्वल्यमाना जगतः शान्तये समुपेयुषी।**
**व्यद्योतिष्ट सभावेद्यामसौ नरशिखत्रयी।।**[1]

उपर्युक्तपद्ये जाज्वल्यमाना समुपयेषी व्यद्योतिष्ठ इत्यादयः शब्दानां प्रयोगेण महाकविः वैयाकरणपक्षसम्मुखीभवति, संस्कृतभाषायाम् व्याकरणपक्षे-अत्र ज्वल धातोः दीप्तर्थकः धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति पाणिनीसूत्रेण यद ततः लट् शतृ शानच् प्रथमा समानाधिकरणे इति सूत्रेण शानच् प्रत्यये द्वित्वे अभ्यासकार्ये स्त्रीत्वविवक्षायां टापि जाज्वल्यमानेति रूपं निष्पद्यते।

उपेयुषीत्यत्र उप पूर्वादिणो भाषायामपि भूतमात्रे लिङ्ग वा तस्य च नित्य क्वसुरीति भाषायामपि नाननूचान श्चेतिः पाणिनी सूत्रेण निपात्यते, उगित्वान् ङीषि वसो सम्प्रसारणमिति सूत्रेण सम्प्रसारेण उपेयुषीतिः शब्दः साधुः।

स्वतः स्पष्टं प्रस्तुतशब्दानां प्रयोगः व्याकरणशास्त्रज्ञ विद्धांनेव करोतु।

महाकविमाघस्य वहुश्रुतत्वपक्षं प्रस्तुत कृतम् आचार्यक्षेमेन्द्रः औचित्यविचारचर्चानामकग्रन्थे तत्त्वौचित्यस्य प्रत्युदाहरणरूपे माघप्रणीत इदं पद्यम् उद्भित, यत्र माघस्य महावैयाकरण पक्षस्य प्रति प्रबल रूपेण दृष्टिगोचरी भवन्ति।

**वुभुक्षितैर्व्याकरणं न भुज्यते,**
**पिपासितैः काव्यरसो न पीयते।**
**न विद्यया केनचिदुद्धृतं कुलं**
**हिरण्यमेवार्जय निसपत्य कला।।**[2]

1. शिशु.पा. 2.3
2. पा. 3.2.9

कविः शब्दविद्या (व्याकरण) समानमेव, महर्षिपतञ्जलि अष्टाध्यायी सूत्रेण स्वरचितभाष्ये "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" व्याकरणशास्त्रस्य प्रयोजनं नियुक्तकरोति, सापरस्परा आह्निकनाम्नेन ज्ञायते।

अनुत्सूत्रपदन्यास सद्वृत्तिसत्तिवेधनगुणयुक्तऽपि व्याकरणपठितुं प्रवृत्तिं न भवति, तस्मिन्नेव प्रकारेण राजनीतिः गुप्तचराणां विना नैव चलितुं शक्नोति, कवि रचनायाम् व्याकरणभाषस्य नीतिशास्त्रस्य परस्परतुलनात्मक-दृष्टिरूपेण व्याकरणस्य पक्षं चित्राङ्कितं भवति।

**अनुत्सूत्रपदन्यासा सद्वृत्तिः।**[1]

उपर्युक्त श्लोके अनुत्सूत्रपदन्यास, सद्वृति, सन्निबन्धन अपस्पशा च शब्दानां प्रयोगकृत्य कविः विलक्षणवैयाकरणस्य ज्ञानस्य परिचयं दत्तः।

कविवरभट्टिः व्याकरणस्य महत्त्वम् सिद्ध्यति-यथा अन्धः मानवस्य हस्ते दर्पणः व्यर्थमेव तादृशैव व्याकरणस्य ज्ञानेन विना काव्यज्ञानमपूर्णमेव,

**दीपतुल्यप्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।**
**हस्तादर्श इवान्धाता भवेद् व्याकरणदृते।।**[2]

महाकविमाघस्य अमरकृतिः शिशुपालवधमहाकाव्यं व्याकरणस्य नूतनातिनूतनप्रयोगेषु विभूषित-व्याकरणसम्मतचतुर्धा शब्दप्रवृत्तया उदाहरणं द्रष्ट्व्यम्-

**असंपादयतः कंश्चिदर्थं जातिक्रियागुणैः।**
**यदृच्छाशब्दवत् पुंसः संज्ञायै जन्म केवलम्।।**[3]

नारदश्रीकृष्णसम्वादे मोक्षस्य आधार श्रीधामेव कविः स्वव्याकरण-पाण्डित्यस्य प्रदर्शयति।

**उपेयुषो मोक्षपक्षं मनस्विनस्त्वमग्रभूभिर्निपायसंश्रया।**[4]

---

1. शिशु.पा. 2.112
2. भट्टि.का. 2.1
3. शिशु.पा. 2.47
4. शिशु.पा. 1.32

उपेयुषः क्रियापदम् इण् गतौ इति धातुः प्रयोगः कृतः, अत्राऽस्मिन् स्थाने धैर्यशालिन पुरुषाः मोक्षस्वरूपस्य मार्गप्राप्तवन्त अन्ये न, अर्थात् धैर्यन्तः पुरूषाः सांसारिकसुखमध्येऽपि मोक्षरूपी मार्गेव स्वीकृतवन्तः। यज्ञे द्रौपदी वर्णने कविः स्वव्याकरणपाण्डित्यस्य प्रदर्शयति–

वृद्धदर्शमयकाञ्चिदामया दीक्षितानि यजमान। यज्ञक्रिया वर्णने सुप् तिङस्य विभक्तीनां, त्रिषु वचनेषु त्रिषु लिङ्गेषु उल्लेखयति–

**नाञ्जसा निगदितुं विभक्तिभिर्व्यक्तिभिश्च।**[1]

व्याकरणशास्त्रस्य ऊहप्रयोजनस्य मुख्योद्देश्यम् अभिव्यक्तं करोति। कविः लकारप्रयोगस्य लक्ष्यं विहितं स्वव्याकरणपाण्डित्यदर्शनं,

**केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।**
**धातवः सृजतिसृदंशास्तयः स्तौतिरत्र विपरीतकारकः॥**

श्रीकृष्णस्य विषये सृज्–हृञ् शास् धातूनां कर्तृवाच्ये प्रयुक्तं भवति (यथा कृष्णः सृजति, संहरति, शास्ति) न तु कर्मवाच्ये कश्चित् कृष्णं सृजति संहरति, शास्ति, स्तु धातुः विपरीतकारके कर्मप्रत्ययान्ते प्रयुक्तो भवति (जनः स्तौति– कृष्णः स्तूयते) उक्तपद्ये कर्तृवाचकः, कर्मवाचकः, उभयात्मकपक्षयो उल्लेखं कृतः।

**साहित्यशास्त्रीयपक्षः–**

महाकविमाघः काव्यशास्त्रस्य पारङ्गतविद्वान आसीत्, सः विभिन्नकाव्यशास्त्रीय गुण, रस, छन्दभाषाया सार्धम् शब्दं अर्थं भावश्च सम्यक् निरूपयति, कविः महाकाव्ये गुणीभूतव्यङ्ग्य ध्वनिकाव्यं, चित्रकाव्यञ्च सफलं प्रयोगं प्रदर्शयते।

कविवर माघस्य काव्य लोकोत्तराह्लादजकः सहृदयः संवेद्य सरल सरस मङ्गलकारी एवाऽस्ति। रसस्य अस्तित्वमानिवार्यरूपेणमेवोक्तम्–

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा।**
**रसस्यैकस्य भूयांसकस्तथा नेतुर्महाभृतः॥**[2]

---

1. शिशु.पा. 14.23
2. शिशु. 2.87

कविः रैवतक पर्वतस्य सन्दर्भे काव्यस्य रमणीयार्थकं प्रतिपादयति, यथा–

**दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान।**
**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।।**[1]

कविसम्राटः माघः स्वमहाकाव्ये शब्दशक्त्यः (अभिधा, लक्षणा, व्यञ्जनादि) सम्यक् प्रयोगम् अकरोत्, माघकाव्ये अनेकेषु स्थलेषु लाक्षणिकप्रयोग दृष्टिगोचराः भवन्ति। यथा उदाहरणे कामिनीनां जलक्रीडा विहारादि वर्णने "गन्धा" शब्दस्य प्रयोगः लाक्षणिकं भवति, यथा गन्धस्य वाची शब्द द्रव्यवचने लाक्षणिकं पुल्लिङ्गत्व एव।

**गन्धस्तु सौरभे योगे गन्धके गर्वलेशयाः।**
**स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृतिः।।**[2]

रैवतकपर्वतस्य वर्णनोपक्रमे कविः औषधीनां सन्दर्भे सरोपालक्षणायाः यः उदाहरण प्रकटितः, तेन पद्येन महाकविमाघस्य प्रगाढपाण्डित्यस्य परिचयम् उद्घाटितम्।

**आसादितस्य तमसा नियतेर्नियोगादाकाङ्क्षतः पुनरपक्रमेण कालम्।**
**पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरनभिभूतममूर्वहन्ति।।**[3]

कविः एकाक्षर द्वयक्षरं व पद्यस्य निर्माण कृत्वा स्वप्रौढपाण्डित्यस्य परिचयम् अददत्–उदाहरणे द्रष्टव्यम्–

**नीलेनानालनलिननिलीनोल्लनालिना।**
**ललनालालनेनालं लीलालोलेन लालिना।**[4]

अत्र 'न' 'ल' उभयो वर्णयो प्रयोगं भवति।

---

1. शिशु.पा. 4.17
2. शब्दानुशासनम्
3. शिशु. 4.34
4. शिशु. 19.84

**दाददो दुद्ददुद्दादी दादादो दूददीददोः।**
**दुद्दादं दददे दुद्दे ददाददददोऽददः॥**[1]

माघकृतशब्दस्य प्रयोगं सूक्ष्मनिरीक्षणं सर्वत्र चारूता प्रथम श्लोकेव प्रारम्भेव दृश्यते।

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥**[2]

✦✦✦

1. शिशु. 19.114
2. शिशु. 1.1

# शिशुपालवधे भौगोलिकस्थानानि

**डॉ. अरविन्दकुमारः**

सहाचार्यः, साहित्यविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रिय–

संस्कृतविद्यापीठम्, नई दिल्ली–16

महाकविश्रीमाघप्रणीतं शिशुपालवधमहाकाव्यमस्ति। तत् विंशति–सर्गात्मकम् अस्ति। तृतीयसर्गे सप्ततिसंख्यातः द्व्याशीतियावत् श्लोके समुद्रस्य वर्णम् अस्ति। चतुर्थसर्गे प्रथमश्लोकतः अष्टषष्ठीश्लोकं यावत् रैवतकपर्वतस्य वर्णनमस्ति। सप्तम सर्गे चतुर्विंशति श्लोकतः एकत्रिंशत् श्लोकं यावत् उपवनमनोहारिणिवर्णनमस्ति। द्वादश सर्गे सप्तषष्ठीश्लोकादारभ्य सप्तति श्लोकं यावत् यमुनायाः वर्णनमस्ति।

## समुद्रस्य वर्णनम्

भगवतः श्रीकृष्णस्य राजधानी सुवर्णमयी द्वारिकानगरी अस्ति सा च समुद्रं विकीर्णं कृत्वा ऊपरि निर्गच्छति वडवानलमिव तत्र ज्वाला शोभायमाना आसीत्। तत्र आपणेषु बहुमूल्यानि रत्नानि संहृत्य विद्यमानाः आसन्। तस्य अट्टालिका परकोटौ अत्यधिकमुन्नतमत्यन्तं सुवर्णमयी सदृशमासीत्। तस्योपरि विभिन्नं चित्रं निर्मितं विद्यते तथाहि सज्जीकृतमिव शोभायमानम् आसीत्। स्त्रियः अप्सरसमिव यथा सुन्दरं प्रतीयन्ते तथैव मानरहितं भूत्वा निरन्तरताः कामोत्कण्ठिताः आसन्। भगवतः श्रीकृष्णस्य स्वर्णमय्यां द्वारिकानगर्यां पश्यन् अपि यदा बहिर्निर्गच्छति फेनादिकं कोलाहलं च तरङ्गमेवं गाम्भीशं ध्वनिं प्रस्फुटति, तथा च मृगी सदृशं भ्रमोत्पन्नमकुर्वत्। एवञ्च तत्र शस्यश्यामलपरिपूर्णवनादिसमूहः तस्य द्वारिकानगरस्य शोभां वर्धयामास। इत्थमपि तत्र प्रतीयमानमासीत् यत् तटादिषु मुक्तामाणिक्यादितत्त्वं सर्वत्र विकीर्णमासीत्। शीतलमन्दसुगन्धसम्वलितपवनसंयोगेन तस्य उपभोगेन

नैसर्गिकानां दूरं सञ्जातम्। सैनिकाः समुद्रस्य तटे निजनिर्मितवासं निर्माय लवङ्गानां पुष्पानां कर्णाभूषणं धारयित्वा सानन्दं नारिकेलजलं पीतवन्तः।

**तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः**
**प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता।**
**परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-**
**श्चिरविगतश्रियो जलनिधेश्च तदाभवदन्तरं महत्॥**[1]

## रैवतकपर्वतस्य वर्णनम्

भगवन् श्रीकृष्णः बृहत् शिलानामुपरि उत्तिष्ठमानात् मेघात् सूर्यमार्गमवरोधनाय समुद्यतं विन्ध्यपर्वतमिव रैवतकपर्वतमपश्यत्। भगवन्तं श्रीकृष्णं उत्कण्ठितं मुदितञ्च दृष्ट्वा कृष्णचन्द्रस्य सारथिदारुकः रैवतक-पर्वतस्य वर्णनं तदा कृतवान् आसीत्। पूर्वस्यां दिशि सूर्यस्य उदयः पश्चिमायां दिशि न चन्द्रमायाः अस्तकाले पार्श्वद्वये लम्बमानं घण्टाद्वयं गजमिव रैवतकपर्वतः राराजते। अयं स्वर्णमयः भूमियुक्तः रैवतकपर्वतः तस्य शिखरात् पतनशीलायाः झरनायाः उपरि श्रृङ्खलन् जलबिन्दुभ्यः स्वर्गीयदेवाङ्गानानां शरीराणां शीतलं करोति। तत्र निरझरात्मकजलेषु एकपार्श्वे स्फटिकं अपरतः नीलमणिः विद्यते, तेषां कान्तितः इदं प्रकाशमानं भवति यत् गङ्गायमुनयोः सङ्गमनमिव तादृशः जलराशयः राजते तत्रेदमपि प्रस्फुटितं भवति एकपार्श्वे सुवर्णमयी अपरतः रजतमयी या भित्तिः विद्यते तत्र भित्या ज्ञायते पर्वतः भस्मोद्धूलितः नेत्राभ्यां अनलकणं निर्गलितं विद्यते, तादृशं तत्त्वं महेश्वरमिव सततं प्रतीतं भवति। पुष्पितेन विकसितेन चम्पकेन पिङ्गलवर्णकनकमयसंयुक्तभित्या सुमेरुतुल्योऽयं पर्वतः विद्यते तेन पर्वतेन अयं भारतवर्षः इलावृत्तमिव राराजते। अत्र पर्वते कम्बलमृगाः विचरन्ति नार्या सह सिद्धाः भ्रमणं कुर्वन्ति रात्रौ औषधयः स्वप्रकाशेन प्रकाशिताः भवन्ति। पुष्पितान् कदम्बान् कम्प्यमान सन् सुमनोहरः सुमधुरः वायुः वाति। अत्र दारिद्रनाशकरत्नानां आकरजं विद्यते। तत्र किन्नरानां विहारस्थलमासीत्। चमरीगावः विशालकाययुक्ताः गजाश्च विचरन्ति स्म।

---

1. शिशुपालवधम् 3.82

इयं च विभिन्नोपभोगयुक्ता वीरभोग्या वसुन्धरा भवति। तथा सत्यपि अयं पर्वतः इह जगतितले प्रसिद्धरूपेण विराजते। अत्र मैत्रादि चतुर्णां वृत्तीणां ज्ञाता, अविद्यादिपञ्चक्लेशं परित्यज्य सबीजयोगं सम्प्राप्य प्रकृतिपुरुषयोः भेदतत्त्वं ज्ञात्वा तं प्रतिरोधनाय समाध्यवस्थायां बहवः साधकाः सिद्धापुरुषाश्च सततं निमज्जिताः सन्ति निवसन्ति च। एतादृशः परमश्रेष्ठः रैवतकपर्वतो भवति तस्य पर्वतस्योपरि उड्डीयमानाः श्यामलवर्णयुक्ताः मेघाः जनानां कल्याणाय अभ्युत्थानाय च सततं उत्तिष्ठमानं सन्तीति मन्यते अनेन प्रकारेण ज्ञायते यत् अस्य रैवतकपर्वतस्य इदमेव वैशिष्ट्यं इह वसुधायां सततं राराजते। तथा चोक्तम्–

**अनुकृतशिखरौघश्रीभिरभ्यागतेऽसौ**
**त्वयि सरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः।**
**द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलं**
**हलधरपरिधानश्यामलैरम्बुवाहैः॥**[1]

**उपवनवर्णनम्**

भगवान् श्रीकृष्णः यादवाश्च स्वस्वभार्यया सह उपवनभ्रमणाय शिविरात् गच्छन्ति। यादवभार्यया नद्याः समीपं गत्वा तत्र स्थितानां जनानां मनोऽनुकूलान् लक्ष्यान् वेधनेषु समर्थाः ये कामधनुषटङ्कारस्य सन्देहाः सन्ति तान् उत्पाद्य कर्णमधुरसारसपक्षीणां कलरवश्रवणे ध्वनिं समर्थाः आसन्। उत्कण्ठितचञ्चरीसमूहाः भगवान् श्रीकृष्णस्य भार्यान् आहूय यत् ध्वनिं उत्पादितवन्तः उपवनानां पंक्तिभिः नवपल्लवाङ्गुलीमाध्यमेन आगमने सूचना प्रदत्ता। उपवनस्य पवनार्धविकसितकलिभिः क्षुब्धभ्रमराणाम् उपवेशानाघाताद् आघातेन पतन् पुष्पितकेसरपादपानां परागं गोपभार्यायै काठकसमानमिव पुष्पकलिं विकसितवान्। तथा चाह–

**उपवनपवनानुपातदक्षैरलिरलाभि यदङ्गनाजनस्य।**
**परिमलविषयस्तदुन्नतानामनुगमने खलु सम्पदोऽग्रतःस्थाः॥**[2]

---

1. शिशुपालवधम् 4.68
2. शिशुपालवधम् 7.27

उपवने पवनस्य अनुगमनाय चातुर्यमस्ति अर्थात् वायोः सामर्थ्यात् आकाशे उड्डीयमानाः विचरन्तः भ्रमराः गोपभार्यासु विद्यमानानि यानि जनाकर्षकसौरभरूपवस्तूनि तानि भोग्यपदार्थरूपेण संप्राप्य तत्र अग्रजान् अनुगमनाय सम्पत्तयः अग्रे विद्यमानाः सन्तीति अर्थात् अग्रजानां अनुसरणेऽपि अनायासाने भोग्यविषयाः सम्प्राप्यन्ते। सुमनस् इत्यस्य अयमेव अभिप्रायः विद्यते यद् इदं पुष्पं भवति यत् विकसनात् यतः तस्य मनः सुन्दरसुप्रसन्नं न आसीत्। किन्तु यदा तं पुष्पं भगवतः श्रीकृष्णस्य भार्याः स्वहस्ते गृहीतवत्यः तदा विशेषशोभासम्पन्नाः सञ्जाताः वस्तुतः समीचीनां मनोयुक्ताः एव प्रसन्नचितसम्पन्नाः भवन्ति इति लोके दृश्यते। अत एव सुमनस् इत्यस्य अवयवार्थः सार्थको भवति। केवलं संज्ञारूपेण सुमनस इति ख्यायते।

**मुदितमधुभुजो भुजेन शाखाश्चलित**
**विशृङ्खलशङ्खकं धुवत्याः।**
**तरुरतिशयितापराङ्गनायाः शिरसि**
**मुदेव मुमोच पुष्पवर्षम्॥**[1]

अभिप्रायस्तु पुष्पसुगन्धेन सुगन्धिताः हर्षिताः द्विरेफाः एकस्यां शाखायामुपविश्य अङ्गनासु विद्यमानं तत्त्वं पराजित्य हस्तधारितकङ्गनझङ्कारेण ज्ञायते खलु यत् मस्तकस्योपरि विद्यमानानानि पुष्पाणि अधो सम्पतन्ति एवञ्च तत्र इदमपि भासते गोपीहस्तकङ्गनझङ्काररवेण वृक्षाणां कम्पनं भवति, तेन कम्पने भवति, तेन कम्पनेन मधुरशब्देन मन्यते वृक्षे अवस्थितानां पुष्पाणां वृष्टिर्भवति।

**या धर्मभानोस्तयापि शीतलैः**
**स्वसा यमस्यापि जनस्य जीवनैः।**
**कृष्णापि शुद्धैरधिकं विधातृभि-**
**र्विहन्तुंमहांसि जलैः पटीयसी॥**[2]

---

1. शिशुपालवधम् 7.30
2. शिशुपालवधम् 12.67

**यमुनावर्णनम्**

यमुनानदी उष्णकिरणाः यथा अभवन् सूर्यस्य तनूजापि शीतलमस्ति यमराजस्य स्वसा भूत्वापि सर्वं जीवनं अर्थात् प्राणभूतकृष्णवर्णं समवाप्य शुचिं सम्पाद्यमानः जलराशिः पापक्षये पापक्षालने वा समर्थो भवति हिमपिण्डमिव शुभ्रवर्णः मेघः द्रवीभूत नीलमण्यात्मकं प्रस्तरमिव यथा यमुनायाः कृष्णवर्णविशिष्टं जलं पीत्वा यथा अनुरक्तो भवति तथैव शीघ्रघर्षणात् अञ्जनमिव कृष्णवर्णमुपजायते।

यदि शास्त्रात् हेतु अर्थात् अनुमानं प्रबलमस्ति तर्हि यमुना एव समुद्रं पूर्णं कर्तुं शक्नोति, न तु यदि गंगा समुद्रं पूरयितुं शक्नोति चेत् तर्हि समुद्रजलं गंगाप्रवाहतः भस्मदहिते सति शंकरस्य कण्ठमिव कृष्णवर्णविशेषः कथं सम्भवति अर्थात् तच्च न कदापि सम्भवतीति कविनां आशयः विद्यते। एतादृशं भौगोलिकं तत्त्वं सम्प्राप्यते खलु माघकाव्ये।

एतच्च यदि शास्त्रात् हेतु अर्थात् अनुमानं प्रबलमस्ति तर्हि यमुना एव समुद्रं पूर्णं कर्तुं शक्नोति, न तु गङ्ग यदि गङ्ग समुद्रं पूरयितुं शक्नोति चेत् तर्हि समुद्रजलं गङ्गाप्रवाहतः भस्मरहिते सति शङ्करस्य कण्ठमिव कृष्णवर्णविशेषः कथं सम्भवति, अर्थात् तत्त्वं न कदापि सम्भवतीति कवीनामाशयः विद्यते। एतादृशं भौगोलिकं तत्त्वं सम्प्राप्यते खलु माघकाव्ये एवञ्च माघकाव्यमनुशीलनेन इदमपि प्राप्यते यत् भारतीयसभ्यतायाः या भौगोलिकीदशा विद्यते तस्याः स्वरूपमपि कविः स्वकीयलेखनीबलेन अत्र उपस्थापितवान्।

**अभ्युद्यतस्य क्रमितुं जवेन**
**गां तमालनीला नितरां घृतायति।**
**सीमेव सा तस्य पुरः क्षणं बभौ**
**बलाम्बुराशेर्महतो महापगा।।**[1]

तमालं इव कृष्णवर्णः सम्पूज्यमाना इयं विशायकामविशिष्ट यमुना नदी स्वीयया तीव्रगत्या पृथीवीम् अतिक्रमयितुं शक्नोति, तथापि सेनारूपस्य समुद्रस्य सम्मुखे किञ्चित्कालं यावत् भारतीयसीमासदृशं शोभते।

1. शिशुपालवधम् 12.70

# शिशुपालवधे राजधर्मः

**डॉ. अनिलकुमारः**
सहायकाचार्यः, साहित्यविभागः
रघुनाथकीर्तिपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः,
देवप्रयागः उत्तराखण्डः

राज् (दीप्तौ) धातोः, किञ्च रञ्ज् (रागे)धातो राजन् इति शब्दस्य निष्पत्तिः, अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम्, अन्यच्च प्रवृत्तिनिमित्तमिति न्यायाच्छोधालेखे राजशब्दस्यान्वयः प्रवृत्तिनिमित्तं रञ्ज् धातोर्विद्यते, प्रमाणत्वेनात्र निरुक्तकारस्य वचनम्-**राजा राजते**[1], महाभारते व्यासस्य- **रञ्जितांश्च प्रजा सर्वास्तेन राजेति शब्द्यते**[2], भवभूतेः- **आराधनाय लोकानाम्**[3] एवम्भूतस्य जनस्य धर्म एव राजधर्मः। धर्मशब्दस्य प्रयोगोऽत्र राजा प्रकृतिरञ्जनात् अर्थात् प्रकृतिः प्रजाः, रञ्जनाद्रक्षणात्, प्रमाणञ्चात्र विष्णुधर्मसूत्रम्- **अथ राजधर्माः। प्रजापरिपालनमिति**[4]। कालिदासस्तु-**भो भोस्तपस्विनः! असावत्र भवान् वर्णाश्रमाणां रक्षिता**[5], **षष्ठाशंवृत्तेरपि धर्म एषः**[6] इत्यनेन वर्णाश्रमव्यवस्थापकः, भारविश्च-**श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिम्**[7], वशिष्ठधर्मसूत्रम्- **राजा शास्ता दुरात्मानाम्**[8],

---

1. नि. 2.3.1
2. म.भा.शा. 59.125
3. उ.रा. 1.12
4. वि.ध.सू. 3.1-2
5. अ.शा. अंक 5, पुरोहितस्योक्तिः
6. अ.शा. अंक 5.3
7. कि. 1.1
8. व.ध.सू. 3.95

विष्णुधर्मसूत्रम्- **स्वधर्ममपालयन्नादण्ड्यो नामास्ति राज्ञः**[1] एवं राजधर्मः परिभाषितो विभिन्नैर्ग्रन्थकारैः। शिशुपालवधे राजधर्मोऽयं विषयो विस्तरेणाव-लोकयितुं शक्यते द्वितीये सर्गे तद्यथा वर्धमानः शत्रुः नोपेक्षणीयः स्वहितमिच्छता राज्ञा-

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**
**समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च।।**[2]

तादृशोऽरिः नीतिज्ञैर्व्याधिसमम्प्रोक्तः। नृपस्य यो गुणः सर्वश्रेष्ठस्तस्मिन् विषये-**'महीयांसः प्रकृत्या मितभाषिणः'**[3] इत्यनेन सङ्केतितः। अल्पत्वे वाचोऽर्थगौरवो भाष्यभूतो भवति यथोक्तम्-

**संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः।**
**सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे।।**[4]

पक्षविपक्षयोश्चिन्तनं विधाय तस्य वाक्प्रसरति चेत्-

**विरोधिवचसो मूकान् वागीशानपि कुर्वते।**
**जडानप्यनुलोमर्थान् प्रवाचः कृतिनां गिरः।।**[5]

स्वामिना बुद्धेः फलमनाग्रहः इति न्यायेन शास्त्रानुकूलवचनं प्रतिकूल-सत्वेऽपि ग्राह्यम्-

**षड्गुणाः शक्तयस्तिस्त्रः सिद्धयश्चोदयास्त्रयः।**
**ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्।।**[6]

अत्र मल्लिनाथः स्वटीकायामाह-ग्रन्थानौशनसादीनधीत्य पठित्वा गुणाः सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्या षट्। शक्तयः प्रभुत्वमन्त्रोत्-

---

1. वि.ध.सू. 3.94
2. शिशु. 2.10
3. शिशु. 2.13
4. शिशु. 2.24
5. शिशु. 2.25
6. शिशु. 2.26

साहाख्यातिस्र:। सिद्धय: पूर्वोक्तशक्तित्रयसाध्या: पुरुषार्थलाभात्मिका:। ताश्च तिस्र: प्रभुसिद्धिर्मन्त्रसिद्धिरुत्साहसिद्धिश्चेति। उदया वृद्धिक्षयस्थानानि छत्रिन्यायेनोदय उच्यन्ते। तत्र वृद्धिक्षयौ स्वशक्तिसिद्धयो: पूर्वावस्थादुपच-यापचयौ स्थानं, ते च त्रय इति। कर्त्तव्याकर्त्तव्ययोर्ज्ञानं विना नैव लक्ष्यसिद्धिरत:-

**अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा।**
**निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम्॥**[1]

महीभृतां पञ्चस्कन्धं विहायान्यो मन्त्रो नास्ति-

**सर्वकार्यशरीरेषु मुक्त्वाऽऽङ्गस्कन्धपञ्चकम्।**
**सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्॥**[2]

के च तत्र पञ्चस्कन्धा इति टीकायां टीकते मल्लिनाथ:- कर्मणामारम्भोपाय:, परुषद्रव्यसम्पत्, देशकालविभाग:, विपत्तिप्रतीकार:, कार्यसिद्धिश्चेति पञ्चाङ्गानि। रूपवेदनाविज्ञानसंज्ञासंस्कारा: पञ्चस्कन्धा:। तत्र विषयप्रपञ्चो रूपस्कन्ध:, तज्ज्ञानप्रपञ्चो वेदनास्कन्ध:, आलयविज्ञान-सन्तानो विज्ञानस्कन्ध:, नामप्रपञ्च: संज्ञास्कन्ध:, वासनाप्रपञ्च: संस्कार-स्कन्धश्च। मन्त्रे एव राज्ञा कदापि नाश्रितव्यमन्यथा तद्भेदे कार्यहानि:-

**मन्त्रो योध इवाधीर: सर्वाङ्गै: संवृतैरपि।**
**चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया।**[3]

नीतिभिज्ञत्वेऽपि कार्ये विलम्बोऽनुचित एव-

**आत्मोदय: परज्यानिर्द्वयं नीतिरितीयती।**
**तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रजायते॥**[4]

स्वोन्नति: परस्य हानिश्चेति नीतिद्वयमाश्रित्य राज्ञा स्वकर्त्तव्यं विधातव्यम्। सर्वसम्पन्नत्वादपि महात्मनां तृप्तियोगो नैवोचित:-

---

1. शिशु. 2.27
2. शिशु. 2.28
3. शिशु. 2.29
4. शिशु. 2.30

**तृप्तियोगः परेणापि महिम्ना न महीयसाम्।**
**पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः॥**[1]

यथा रविः सम्पूर्णमन्धकारं परिसमाप्य स्वोदयमिच्छति तथैव मानिनोऽपि समूलघातमघ्नन्त परान्नोद्यन्ति। शत्रुमखिलीकृत्य प्रतिष्ठा दुर्लभा भवति। यावदेकोऽपि रिपुर्ध्रियते तावत्सुखं कुतोऽतस्तेषां विनाशो नूनमेव कर्त्तव्यमित्युदाहरति ग्रन्थकारः-

**ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम्।**
**पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम्॥**[2]

कार्येण ज्ञायते मित्राणि शत्रवस्तथेति सिद्धान्तो राज्ञे महदुपकारकः-

**सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः।**
**स्याताममित्रौ मित्रे च सहजप्राकृतावपि॥**[3]

तयोश्शत्रुमित्रयोः सहजप्राकृतयोः कृत्रिमः शत्रुश्शत्रुरेव, मित्रं च मित्रमेवेति। तत्रापि कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ न च प्राकृताविति टीकायां सङ्केतयति मल्लिनाथः। तयोर्ज्ञानं कथं स्यादित्यस्मिन् विषये-

**उपकर्त्राऽरिणा सन्धिर्न मित्रेणापकारिणा।**
**उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः॥**[4]

स्त्रिय एव बद्धमूलस्य महद्वैरतरोः मूलं विद्यते रामायणमहाभारते चात्र सामान्यप्रमाणे। पापानां कथा राज्ञोऽश्रयसेऽलम्। सरोषेऽरौ वैरं विधाय यो नर उदासते स स्वविनाशस्य पल्यङ्कं शेते-

**विधाय वैरं सामर्षे नरोऽरौ य उदासते।**
**प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्॥**[5]

1. शिशु. 2.31
2. शिशु. 2.35
3. शिशु. 2.36
4. शिशु. 2.37
5. शिशु. 2.42

एकोऽप्यपराधः शत्रूणामसह्य किमुत यत्र समवायोऽतः–

**मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी।**
**क्रियासमभिहारेण विराध्यन्तं क्षमेत कः॥**[1]

अतः क्षमाशीलत्वेऽपि शत्रूणामपराधो विरोधो वा कदापि नैव क्षन्तव्यः। यद्यपि क्षमा वीराणाम्भूषणन्तथापि तदुचितपात्राय शोभते न तु सर्वेभ्यः–

**अन्यदा भूषणं पुंसां क्षमा लज्जेव योषितः।**
**पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥**[2]

अवमानने सन्तुष्टाज्जनाद् यद्रजः पादेनाहतं मूर्धानमधिरोहति तच्छ्रेष्ठम्, न तु अवमानिनो जनस्य सङ्गः–

**पादाहतं यदुत्थाय मूर्धानमधिरोहति।**
**स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः॥**[3]

अद्रौ तुङ्गता, सिन्धावगाधता च, परस्परमन्योऽन्यस्य गुणस्याभावः परञ्च मनस्विनामुभयोरेव प्रभावस्तस्मात्तेऽलङ्घनीयाः।

**तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता।**
**अलङ्घनीयताहेतुरुभयं तन्मनस्विनि॥**[4]

फलं तुल्यापराधत्वेऽपि ग्रासावसरे सूर्यचन्द्रयोरुदाहरणे प्रमाणे। किञ्च दूरस्थेऽपि तेजस्वीजनस्तेजस्विमध्य एव गण्यते–

**तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते।**
**पञ्चमः पञ्चतपसस्तपनो जातवेदसाम्॥**[5]

---

1. शिशु. 2.43
2. शिशु. 2.44
3. शिशु. 2.46
4. शिशु. 2.48
5. शिशु. 2.51

शत्रूणां विनाश एव कीर्तिविस्तारस्य कारणम् अतस्तेषां मूर्धसु पादमकृत्वा राज्ञः कीर्तिः कथं स्वर्गपर्यन्तं गन्तुं शक्नोति–

**अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषाम्।**
**कथङ्कारमनालम्बा कीर्तिर्द्यामधिरोहति॥[1]**

यथा मनुना दण्डस्य महत्त्वं प्रतिपादितं तथैवात्रापि माघेन सङ्केतितम्–

**चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया।**
**स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति॥[2]**

केचिज्जनाः स्वस्य शक्त्युपचये यानमाहुः अपरे च शत्रोर्व्यसने। अत्र मल्लिनाथो टीकायां सङ्केतयति विषयेऽस्मिन् कामन्दकस्य मनोश्च मते तद्यथा– प्रायेण सन्तो व्यसने रिपूणां यातव्यमित्येव समादिशन्ति। तथा विपक्षे व्यसनानपेक्षी क्षमो द्विषन्तं मुदितः प्रतीयात् इति कामन्दके, मनुस्मृतौ च– 'तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः'[3] इति। राज्ञोऽक्लेशेन यथा विजयलाभो भवेत् तस्मिन् विषये माघो भणति–

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।**
**फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि॥[4]**

विपदि शत्रावाक्रमणो मानिनां कृते लज्जाकरः, परञ्चोपचितगात्रे शत्रौ सम्मानजनकः। अतो राज्ञा विपत्तौ शत्रावाक्रमणो नैव कर्त्तव्यः, अपितु समृद्धिसम्पन्ने एवोचितः। सर्वदा शास्त्रविहितमाचरणमाचरणीयम् उच्छृङ्खलमन्यद् बलम्, शास्त्रनियन्त्रितञ्चान्यत्, तयोः साम्यं कदापि नैव इत्येव तेजस्तिमिराभ्यां प्रस्तौति–

**अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम्।**
**सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः॥[5]**

शास्त्रोचितं वचनं दुर्लभम्, स्वेच्छया त्वसङ्गतमेव तद्यथा–

---

1. शिशु. 2.52
2. शिशु. 2.54
3. शिशु. 7.1.83
4. शिशु. 2.59
5. शिशु. 2.62

**बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते।**
**अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः॥**[1]

कुशलवक्तारोऽतिसुकुमाराक्षरामर्थगुर्वी पटीमिव प्रसारयन्ति। शास्त्ररक्षणाय स्मरणाय च शास्त्रार्थः, न तु विवादाय–

**विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः।**
**हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा॥**[2]

मन्त्रोत्साहावुभावपि ग्राह्यौ तौ जिगीषोरात्मसम्पदः, प्रभुशक्तेश्च मूलम्। ताभ्यां परस्परं किं प्रयोजनमिति जिज्ञासते चेत्–

**सोपधानां धियं धीराः स्थेयसी खट्वयन्ति ये।**
**तत्रानिशं निषण्णास्ते जानते जातु न श्रमम्॥**[3]

अज्ञा अल्पमेवारम्भन्ते व्यग्राश्च भवन्ति परञ्च कृतधियस्तु महारम्भा निराकुलाश्च तिष्ठन्ति। कदापि राज्ञा प्रमादो न कर्त्तव्यः, यतोऽर्थास्तथैव नश्यन्ति, यथा नोपशयस्थोऽपि शयालुर्व्याधो मृगान् हन्ति–

**उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः।**
**हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान्॥**[4]

यथोत्साहस्तथैव प्रज्ञापि आवश्यकी यस्मिन् विषये–

**उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि।**
**जिगीषुरेको दिनकृदादित्येष्विव कल्पते॥**[5]

अत्र टीकायां राजानस्तु–अरिमित्रमरेर्मित्रं मित्रामित्रमतः परम्। तथारिमित्रमित्रं च विजिगीषोः पुरस्सराः॥ पञ्चेति शेषः। पार्ष्णिग्राहास्ततः पश्चादाक्रन्दस्तदनन्तरम्। आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः॥ इति। लोकसम्बन्धेऽपि राजा कीदृशो भवेत्तत्–

1. शिशु. 2.73
2. शिशु. 2.75
3. शिशु. 2.77
4. शिशु. 2.80
5. शिशु. 2.81

**बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृत्तिकञ्चुकः।**
**चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः॥**[1]

एवम्भूतः पार्थिवः कोऽपि पुरुषोऽन्य एवायम्। लोकविलक्षणः पुमान्नित्यर्थः। अतो राज्ञा बुद्ध्यादिसम्पन्नेन भवितव्यमेतदेवाप्रमत्तत्वम्, अन्यथा स्वरूपहानिः स्यादिति मल्लिनाथः। यथा कविना नैको गुणः काव्ये प्रयुज्यतेऽपितु सर्वेषामोजःप्रसादमाधुर्याणां प्रयोगं सो विदधाति तथैव कालज्ञस्य राज्ञस्तेजः क्षमा वा नैकोऽपितु उभौ साम्यभावेन तिष्ठतः यथोक्तम्–

**तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः।**
**नैकमोजः प्रसादो वा रसभावविदः कवेः॥**[2]

अवसरे एव क्रोध उचितः स चासाध्यरोगमिव शत्रुभ्यो भवति यथोक्तम्–

**कृतापचारोऽपि परैरनाविष्कृतविक्रियः।**
**असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा॥**[3]

क्रोधयुक्तत्वादपि क्षमागुणोऽप्यावश्यकः, यथा प्रदीपे शैत्यरूपं तैलमग्रे च तेजोमयी ज्वाला शोभते ताभ्यामेव तस्य सौन्दर्यमपि वर्द्धते तथैव राजनि क्षमातेजसोः साम्यभावोऽप्यावश्यकः। कदापि देवपौरुषयोरेकस्यैवाश्रयः नैव कर्त्तव्यो यथा सत्काव्यं कुर्वन् कविः शब्दार्थावपेक्षते तथैवोभावाश्रणीयौ राज्ञा। यथोक्तम्–

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥**[4]

अर्थात् द्वयं पौरुषं दैवं चापेक्षते। यथा भावेभ्यो रसस्य निष्पत्तिः तथैवैतेभ्यः सर्वेभ्यो गुणेभ्यो महीभृतः पूर्णता सञ्जायते। राज्ञा स्वराष्ट्रस्य परराष्ट्रस्य च चिन्तनमहर्निशं कर्त्तव्यं तेनैव स स्वशत्रूणामुपरि प्रभुत्वं

---

1. शिशु. 2.82
2. शिशु. 2.83
3. शिशु. 2.84
4. शिशु. 2.86

स्थापयितुं समर्थः–

**तन्त्रावापविदा योगैर्मण्डलान्यधिष्ठिता।**
**सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः॥**[1]

अत्र टीकायां स्पष्टयति मल्लिनाथः– तन्त्रावापौ स्वपरराष्ट्रचिन्तनम्, मण्डलानि स्वपरराष्ट्राणीति। फलनिष्पत्तौ मन्त्रपूर्वक एवोत्साह फलति तद्विपरीतस्तु छिन्नमूलो वृक्ष इव शुष्यतीति प्रतिपादयन्नाह–

**करप्रचेयामुत्तुङ्गः प्रभुशक्तिं प्रथीयसीम्।**
**प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः॥**[2]

प्रज्ञोत्साहमण्डलज्ञानवतो राज्ञः सर्वे नृपतयस्तथैव परिवारतां यान्ति यथोच्चस्वरमुख्यस्वराभ्यामन्ये स्वरा एकतानतामाप्नुवन्ति। सर्वसामर्थ्यसम्पन्नस्य नृपस्य क्रियाशून्यत्वेऽपि सर्वाणि प्रयोजनानि तथैव तस्य गुणताम्भजन्ते यथा सर्वे शब्दा आकाशस्य–

**अप्यनारम्भमाणस्य विभोरुत्पादिताः परैः।**
**व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः॥**[3]

यथैकेन मुख्येन रत्नेन सम्पूर्णा माला सुशोभते तथैव तेजोवृद्धि-प्रयत्नशीलेन गुणेन युक्तो नृपः नायकायते।

**षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षो रसायनम्।**
**भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च॥**[4]

क्षमावसरे क्षमाशीलः, युद्धावसरे उत्साहसम्पन्नो नृपो वृद्धिमाप्नोति तद्विपरीतस्तु क्षयसम्पदो निदानं भवति–

**स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम्।**
**अयथाबलमारम्भो निदानं क्षयसम्पदः॥**[5]

1. शिशु. 2.88
2. शिशु. 2.89
3. शिशु. 2.91
4. शिशु. 2.93
5. शिशु. 2.94

कोऽपि शत्रुरल्पो नैव ज्ञातव्यो यथा महाभारते– 'न च शत्रुरवज्ञेयो दुर्बलोऽपि बलीयसा, स्वल्पोऽपि दहत्यग्निर्विषमल्पं हिनस्ति च।' तथैवात्रापि कविना सङ्केतितम्–

**मा वेदि यदसावेको जेतव्यश्चेदिराडिति।**
**राजयक्ष्मेव रोगाणां समूहः स महीभृताम्।।**[1]

यथा नगापगा अम्भोधिमवाप्य तथैव भवन्ति, तथैव क्षुद्रशत्रुरपि स्वसमूहमवाप्य विशालतां भजते, अतस्तत्सम्यक् ज्ञानमावश्यकम्–

**बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।**
**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा।।**[2]

निग्रहसमर्था ये भवन्ति ते शत्रूनपि अनुगृह्णन्ति यथा निम्नगाभिस्सह नगा अपि अब्धिमाप्नुवन्ति–

**महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि।**
**सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः।।**[3]

चिरादपि बलिनोऽरिषु बलात्कारस्तस्य सिद्धये एव भवति। यद्यपि शत्रूणां वधोऽपि स्वर्गस्य कारणं तथापि देवप्रीतये धर्मो यदि स्यात्तदा तत्कर्त्तव्यम्। पूर्वं धर्मस्याचरणमेव राज्ञेऽमृतं ततः परमन्यद् द्रव्यविशेषम्। महीभृतां बुद्धिस्तीक्ष्णा परञ्च शत्रोर्मर्मच्छेदिनी नैव, कर्म प्रतापवत् परञ्च शान्तम्, मनः सोष्म परञ्च परसन्तापि न, वाग्मिनो वागेका सत्यमिति एवम्भूतः कोऽपि नृपः श्रेष्ठः। शत्रोर्ज्ञानं कथं केनोपायेन च कर्त्तव्यमित्य-पेक्षायामाह–

**कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम्।**
**विदाङ्कुर्वन्तु महतस्तलं विद्विषदम्भसः।।**[4]

---

1. शिशु. 2.96
2. शिशु. 2.100
3. शिशु. 2.104
4. शिशु. 2.111

अर्थात् अम्भस इव शत्रोः कृततीर्थस्य सुप्रवेशत्वात् प्रागन्तः प्रविश्य परीक्षणीयः। राजनीतेः स्वरूपं किं कथञ्च तत्राचरणीयमिति सुस्पष्टं प्रतिपादितमत्र–

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा॥**[1]

तस्माच्चारणप्रेषणमावश्यकम्, तद्रहितस्य राज्ञोऽन्धप्रायत्वादिति। न केवलं राज्ञा गुप्तचरमुखेन वृतान्तज्ञानमावश्यकमपितूपजापादिमन्त्राणां ज्ञानमप्यावश्यकम्–

**अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः।**
**भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः॥**[3]

अर्थात् महीभृता स्वशत्रोः पक्षे कथं विघटनं स्यादित्यस्य ज्ञानमपि गुप्तचरैस्सह कर्त्तव्यम्। चारचक्षूषां राज्ञे किं महत्त्वमित्यप्यनेन प्रतीयते, यतोहि स्वामिनः कार्यसिद्धिरेव तेषां प्रयोजनम्। एवं राजनीतेः सर्वेषां पक्षाणां चिन्तनमत्र विधाय राज्ञे तेषां समुचितरीत्या पालनं कर्त्तव्यमिति निर्दिष्टं माघेन।

✦✦✦

1. शिशु. 2.112
2. शिशु. 2.113

# शिशुपालवधमहाकाव्ये रसविचारः

**डॉ. शक्तिशरणशर्मा**
पूर्वशोधच्छात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–16

संस्कृतसाहित्यममन्दानन्दसन्दोहजनकत्वेन वैदिककालादारभ्य अद्या-वधिरविच्छिन्नरूपेण अतितरामस्यां जगत्यां विलसति। विज्ञानमयं वैदिकसाहित्यं ज्ञानविज्ञानयोरुभयोरद्वितीयं रत्नं वरीवर्तते। कालव्यालमुखग्रासत्वात् मानवस्य परावाग्भ्यः पलायनं बभूव। वैदिकं सर्वमपि ज्ञानविज्ञानं परावाच्येव निहितं विद्यते। रसोऽपि तस्यैव परावाचोऽनुसरणमस्ति, यतोहि वेदेष्वपि रसशब्दस्य प्रयोगः प्राप्यते। "परिदाय रसं दुहे"[1], "सोम इन्द्रियो रसः"[2], "धनञ्जयः पर्वते कर्तव्यो सो विप्रः कविकाव्यम्"[3] एवं प्रकारेण रासशब्दः ऋग्वेदस्य अनेकेषु मण्डलेषु दृष्टिपथमायाति।

रसस्यानन्दरूपेण सर्वैरपि काव्यास्वादवेतृभिः व्याख्यानं भिन्न-भिन्नत्वेन प्रस्तूयते। अथ च तैत्तिरीयोपनिषदि रसस्य तादृशमेव स्वरूपं निर्दिश्यते– "रसं ह्येवायं लब्ध्वानन्दी भवति"[4], अन्यच्च– "रसो वै सः"[5] इति।

महाभाष्येऽपि अनेकेष्वाह्निकेषु रसविषयकं किमपि तत्त्वं परिलक्ष्यते– "ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं रसः"[6], "अनेन नूनं वेदानां कृतं

1. ऋ. 1.105.2
2. ऋ 8.3.20
3. ऋ. 9.84.5
4. तै. उ. 2.7
5. तै. उ. 2.7
6. महा. भा. 12.240.9

स्यात्"[1], "यष्टव्यं पशुभिरमुख्यैरथो बीजैः रसैरिति"[2] इति। अनया चिरपरम्परया अतिवाहितः रसशब्दः काव्येषु स्वकीयं प्रसिद्धव्यवहारं दर्शयतः परावाचमेवानुसरति। यतो हि रसः कुत्रापि वाच्यत्वेन नावतिष्ठति।

रसविषयं विदधाना काव्यशास्त्रस्य प्रारम्भमेव जायते। काव्यस्याङ्ग-भूतेऽस्मिन् काव्यशास्त्रे काव्यशास्त्रवेतृभिः रसस्यैव प्राधान्यं भणितम्। भरतमुनिना नाट्यशास्त्रस्य रसाध्याये रसस्यास्वादविषये बृहद्रूपेण प्रशस्यते। अथ च तस्मिन्नेवाध्याये रससूत्रमपि विश्वतो मुखत्वेनोपस्थापितम्- "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"[3] इति। नाट्यशास्त्रस्य षष्ठाध्याये, तथा च सप्तमाध्याये रसस्येव विस्तृतं विवृतित्वमभिलक्षितमस्ति।

"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इत्युक्त्याधारेण कथं तैः सुधियैः कविभिः परसहस्राणि महाकाव्यानि विरचितानि। अस्याः जिज्ञासायाः निरासः हि काव्यस्यास्वादयोग्यतयैव भवति। काव्यस्य अनेकानि प्रयोजनानि निर्दिष्टानि सन्ति। तेषु सर्वेष्वेव प्रयोजनेषु काव्यस्य चमत्कारजनकता-वच्छेदकत्वमथवा चमत्कारत्ववत्वमेव काव्यत्वमिति रूपेणैव पर्यवसानं प्राप्यते। उक्तमपि लोचने काव्यस्यात्मतत्त्वस्य निष्पत्तिरेव कवेः मुख्यो व्यापारः- "रसबन्ध एव मुख्यः कविव्यापारविषयः"[4] इति। अस्यैव रसस्य प्राधान्यमङ्गीकुर्वन्नाचार्यभरतेनाऽपि निगदितं यत् "नहि रसादृते कश्चिदर्थः प्रवर्तते" इति कालिदासस्य मालविकाग्निमित्रमिति नाटके उक्तम्- "आनन्दानि हृदयैकरसायनानि"[5], "प्रसरति रसो निर्वृत्तिघनः"[6] इति।

एवं प्रकारेण लक्ष्ये रसस्यानन्दरूपेण प्रसिद्धव्यवहारत्वाद्रसस्यानन्दघन-रूपमप्यभिलक्ष्यते। सर्वप्रथमं काव्यशास्त्रजगति रसं काव्यस्यात्मत्वेनोन्-

1. महा. भा. 12.367.67
2. महा.भा. 14.91.21
3. ना.शा. 6
4. लोचने पृ. 363
5. उ.रा. 6.8
6. उ.रा. 6.11

मुक्तोद्घोषेणोद्घोषितमाचार्येणानन्दवर्धनेन यत्–

**काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**

काव्यस्य रस एव जीवनाधायकं तत्त्वं नास्ति लेशोऽपि सन्देहः विषयेऽस्मिन्। काव्ये रसस्येव साररूपत्वात् सहृदयानां हृदयमाह्लादकतामेति। रसस्तु तथाभूतं किमपि तत्त्वं यः प्राणाभावपत्रपुटकेष्वपि सहृदयहृदयं द्रवति। कथमेतादृशमानन्दमभिव्यनक्त्यस्मिन् विषये केचन काव्यास्वादवेत्तारः कारणत्वेन अलङ्कारान्, एके गुणान्, अपरे रीतिः, परे ध्वनितत्त्वमन्ये च औचित्यं काव्ये सन्निवेशवशात् रसास्वादयोग्यतामेति।

वस्तुतस्तु परमं सत्यमिदं यत् काव्ये यदि रसानुगुणं वर्णानां पदानां विषयस्य वक्तृणाञ्च प्रयोगः स्यात्तर्हि काव्यस्य उत्कर्षः जायते। तथाभूतमनुपमं महाकविमाघविरचितं शिशुपालवधमहाकाव्यमपि पदवाक्यप्रमाणादिभिः परिपूरितं विद्यते। महाकविमाघः शिशुपालवधमहाकाव्यस्याङ्गीरसः वीररसमकारि तथा च अङ्गरसानामपि समावेशः अङ्गीरसपरत्वेनैव रूरूचिरे। महाकवेस्तु प्रसिद्धेयं प्रशस्तिः यत्- "माघे सन्ति त्रयो गुणाः" इति। महाकविना स्वकीये महाकाव्ये ओजस्विताया उत्कर्षप्रकर्षश्च चारुत्वेन कृतः। यद्यपि माघकाव्यमत्यन्तं पाण्डित्यमपेक्षते। उक्तमपि केनचित् प्रशस्तौ "मेघे माघे च गतं वयः" इति। तदपि किञ्चिदत्र रसविषयमवलम्ब्य प्रकाश्यते। तस्य महाकाव्यस्य विश्रुतटीकाकारेण मल्लिनाथेन अपि महाकाव्येऽस्मिन् अङ्गीरसरूपेण वीररस एव अङ्गीकृतः। तथाहि–

**नेताऽस्मिन् यदुनन्दनः सभगवान्वीरः प्रधानो रसः**
**शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना।**
**इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं**
**धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात्॥**[1]

नात्र सन्देहः यत् शिशुपालवधमहाकाव्यस्य अङ्गीरसः वीरसोऽस्ति। यतोहि कविना स्वप्रतिभाऽभया अस्य महाकाव्यस्य नायकत्वेन जगत्

---

1. मल्लिनाथः

कण्टकान्तकः भगवान् श्रीकृष्णः तथा च प्रतिनायकत्वेन जगत्कण्टकः शिशुपालः स्वीकृतः। अनयोः द्वयोः युद्धवर्णनं कुर्वन् कविः महाकाव्यस्य नायकस्य वीरत्वमत्यन्तं चारूत्वेन अकार्षीत्।

**कटुनापि चैद्यवचनेन विकृतिमगमन्न माधवः।**
**सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते॥**[1]

कविः श्लोकेऽस्मिन् भगवतः श्रीकृष्णस्य वीरत्वमुपवर्णयति यत् शिशुपालस्य कटुवचनश्रवणादनन्तरमपि भगवतः क्रोधः न सञ्जातः। सत्यनियतवचसं सुजनं वचसा कः जनाश्चलयितुमीशते। कविः सर्वप्रथमं प्रथमसर्गे शिशुपालस्य पूर्वजन्मनः वृत्तान्तमुपस्थापयन् नारदमुखेन श्रीकृष्णं प्रति वीररसानुरूपाणि वचांस्युपन्यस्यन्ति। तद्यथा–

**सताच्छटाभिन्नघनेन विभ्रता नृसिंह सैंहीमतनुं तनुं त्वया।**
**स मुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः॥**[2]

नाट्यशास्त्रे उत्साहस्य लक्षणम्–"किञ्चिदार्जिजीषुः", साहित्यशास्त्रिभिः वीररसस्थायिभावमुत्साहस्य लक्षणं कृतं यत् – "पराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः"[3] इति। उत्साहस्थायिभाव- स्योक्तलक्षणानुसारेण कविना उक्तश्लोके नायकस्य पराक्रमः प्रदर्शितः। उत्साहस्थायी- भावात्मकवीररसस्य पण्डितराजजगन्नाथेन चत्वारो भेदाः स्वीकृताः। तद्यथा– "वीरश्चतुर्धा दानदयायुद्धधर्मैस्तदुपाधेरुत्साहस्य चतुर्विधत्वात्" इति लक्षणानुसारेण लक्ष्यानुवृत्तिः स्यात्तर्हि शिशुपालवधमहाकाव्यस्य नायके चतुर्विधवीरत्वं घटते यथा–

**दर्शनानुपदमेव कामतः स्वं वनीयकजनेऽधिगच्छति।**
**प्रार्थनार्थरहितं तदाभवद्दीयतामिति वचोऽतिसर्जने॥**[4]

एतेषु श्लोकेषु युधिष्ठिरस्य दानवीरत्वं कविना उपस्थापितमस्ति।

---

1. शि.व. 15.40
2. शिशु. 1.47
3. रसगङ्गाधरः 1
4. शि.व. 14.48

**युद्धवीरः–** युद्धवीरस्तु महाकाव्यस्य बृहत्तमे अंशे विद्यमानत्वात् महाकाव्यं सहृदयानां कृते उत्साहोत्सृजकरूपेण समुल्लसति। कानिचिदु- दाहरणानि उत्कर्षतां भजन्ति। यथा शिशुपालवधे प्रतिनायकगतवीररसं प्रतिपादयितुं शिशुपालस्य दूतः तस्य पराक्रमस्य वर्णनं करोति। तद्यथा–

**न तदद्भुतमस्य यन्मुखं युधि**
**पश्यन्ति भिया न शत्रवः।**
**द्रवतां ननु पृष्ठमीक्षते वदनं**
**सोऽपि न जातु विद्विषाम्॥**[1]

युद्धवर्णनप्रसङ्गे वीरस्थाय्युत्साहस्यातिरमणीयं चित्रं कविरभिव्यनक्ति–

**उद्यन्नादं धन्विभिर्निष्ठुराणि**
**स्थूलान्युच्चैर्मण्डलत्वं दधन्ति।**
**आस्फाल्यन्ते कार्मुकाणि स्म**
**कामं हस्त्यारोहैः कुञ्जराणां शिरांसि॥**[2]

नायकगतयुद्धवीरप्रतिपादनादनन्तरं प्रतिनायकगतस्य युद्धवीरस्यापि कविरतिसुन्दरं वर्णनं विदधाति। यथा–

**अनुसन्ततिपातिनः पटुत्वं**
**दधतः शुद्धिभृतो गृहीतपक्षाः।**
**वदनादिव वादिनोऽथ शब्दाः**
**क्षितिभर्तुर्धनुषः शराः प्रसस्रुः॥**[3]

कविः चेदिराजशिशुपालस्य पराक्रमं श्लोकेऽस्मिन् अवतरति। अनेन प्रकारेणास्य महाकाव्यस्याङ्गीरसस्य प्रस्तुतिकरणादनन्तरमङ्गरसानां विचारः प्रस्तूयते। यतोहि महाकाव्यस्य लक्षणविधातृभिरेतदुच्यते यत्–

---

1. शि.व. 16.60
2. शि.व. 18.9
3. शि.व. 20.11

**शृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते।**
**अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।।**[1]

अङ्गरसानां प्रयोगः काव्येषु अङ्गीरसपरत्व नैव भवेदिति विषये आनन्दवर्धनाचार्येण ध्वन्यालोके लिखितम् – "विवक्षा तत्परत्वेन नाऽङ्गीत्वेन कदाचन"[2] इति। शिशुपालवधमहाकाव्ये अङ्गरसेष्वपि शृङ्गारः प्राधान्यं धत्ते। कविना चतुर्थसर्गादारभ्य एकादशसर्गपर्यन्तं संयोगशृङ्गारस्यैवोत्कर्षरूपेण वर्णनं कृतम्। एतेषु सर्गेषु कविः रैवतकपर्वतः, षड् ऋतवः, यादवानां यादवस्त्रीणां च विविधाः केलयः, सन्ध्यायाः, चन्द्रोदयस्य, प्रभातादीनां च वर्णनं वर्णयति। त्रयोदशसर्गेऽपि कविः संयोगशृङ्गारस्य वर्णनं वर्णयति। एतेष्वालम्बनत्वेन नायकाः नायिकाश्च, उद्दीपनरूपेण रैवतकः, षड् ऋतवः, सन्ध्या, चन्द्रोदयादीनां कविना वर्णनं कृतम्। चतुर्थसर्गे रैवतकवर्णनप्रसङ्गे किन्नराणां चुम्बनालिङ्गनादीनां वर्णनं कुर्वन् कवेरुक्तिरियं यत्–

**बिम्बोष्ठं बहु मनुते तुरङ्गवक्त्रश्-**
**चुम्बन्तं मुखमिह किन्नरं प्रियायाः।**
**श्लिष्यन्तं मुहुरितरोऽपिं तं निजस्त्री**
**मुतुङ्गस्तनभरभङ्गभीरुमध्याम्।।**[3]

एवमेव पञ्चमषष्ठसप्तमे च सर्गे विभिन्ननायिकानां कविरत्यन्तं रञ्जकं चित्रं प्रस्तौति। यथा–

**प्रस्वेदवारिसविशेषविषक्तमङ्गे**
**कूर्पासकं क्षतनखक्षतमुत्क्षिपन्ती।**
**आविर्भवद्घनपयोधरबाहुमूला**
**शातोदरी युवदृशां क्षणमुत्सवोऽभूत्।।**[4]

अष्टमसर्गेऽपि कविना नायिकायाः मुग्धतायाः वर्णनं स्वकलेवरेण लिखिति–

---

1. सा.द. 6.32
2. ध्व.लो.
3. शि.व. 4.38
4. शि.व. 5.23

**तिष्ठन्तं पयसि पुमांसमंसमात्रे**
**तद्घ्नं तदवयती किलात्मनोऽपि।**
**अभ्येतुं सुतनुरभीरियेष मौग्ध्यादाश्लेषि**
**द्रुतममुना निमज्जतीति।।**[1]

महाकविमाघः शृङ्गाररसस्य यादृशं वर्णनं करोति तादृशेन वर्णनेनेतद् स्पष्टं जायते यत् कवेः शृङ्गारकाव्यवर्णनेऽपि दक्षता आसीत्। महाकविः सर्गेषु कदाचित् सन्ध्या चन्द्रोदयादीनां कस्मिश्चित् रते औत्सुक्तमपरस्मिन् मदाख्यसञ्चारिभावस्य, अन्यस्मिन् यादवाङ्गनानां बाह्याऽभ्यन्तरसुरतादीनाञ्च रञ्जकं चित्रमवतरति।

**शिशुपालवधमहाकाव्ये हास्यरसः–** हास्यवर्णनप्रसङ्गे आलम्बनोद्दीपनयोरेव उपन्यासः क्रियते। शिशुपालवधे केषुचित् स्थलेषु हास्यरसस्य प्रसङ्गः प्राप्यते। त्रयोदशसर्गे यदा श्रीकृष्ण इन्द्रप्रस्थं प्रति समायाताः तदा तेषां दर्शनोत्सुकायाः स्त्रियः वर्णनम्–

**रभसेन हारपददत्तकाञ्चयः**
**प्रतिमूर्धजं निहितकर्णपूरकाः।**
**परिवर्तिताम्बरयुगाः समापतन्वलयी-**
**कृतश्रवणपूरकाः स्त्रियः।।**[2]

कविना कृष्णदर्शनोत्सुकनायिकानां वर्णनं कृतम्। ताभिः यदा श्रुतं यत् श्रीकृष्णः समागच्छति तदा दर्शनार्थमत्यन्तोत्सुक्यात् विपरीतालंकारादीनां न्यासः कृतः। तन्न्यासः हासकारक आसीत्।

**रौद्ररसवर्णनम्–** महाकविमाघस्य महाकाव्ये अङ्गरसरूपेण रौद्ररसस्योत्कर्षः सप्तदशसर्गादारभ्यं विंशसर्गपर्यन्तं प्रतिपदमङ्गीरसस्यैव परिपोषतां भजते। अत्रोदाहरणद्वयं प्रस्तूयते–

**आधावन्तः सम्मुखं धारिताना-**
**मन्यरन्ये तीक्ष्णकौक्षेयकाणाम्।**

---

1. शि.व. 8.21
2. शि.व. 13.32

**वक्षः पीठैरात्सरोरात्मनैव क्रोधे-**
**नान्धाः प्राविशन्पुष्कराणि।।**[1]

**धृतप्रत्यग्रशृङ्गाररसरागैरपि द्विषैः।**
**सरोषसंभ्रमैर्बभ्रे रौद्र एव रणे रसः।।**[2]

**अद्भुतरसस्योदाहरणम्–**

**द्विधा त्रिधा चतुर्धा च तमेकमपि शत्रवः।**
**पश्यन्तः स्पर्धया सद्यः स्वयं पञ्चत्वमाययुः।।**[3]

श्लोकेऽस्मिन् भगवतः अद्भुतस्वरूपं युद्धभूमौ महाकविना उपवर्णितम्।

**वीभत्सरसस्योदाहरणम्–**

**विदलत्पुष्कराकीर्णाः पतच्छङ्खकुलाकुलाः।**
**तरत्पत्ररथा नद्यः प्रासर्पन्रक्तवारिजाः।।**[4]

अस्मिन् श्लोके कविना बीभत्सरसस्य रसपोषकत्वेनोपवर्णनमुपवर्णितम्।

**उपसंहारः–** महाकविमाघविरचिते शिशुपालवधमहाकाव्ये रसस्याङ्गाङ्गित्वमद्वितीयं वर्तते। यतोहि कविना वीरसस्याङ्गीत्वादप्यस्मिन् महाकाव्ये शृंगाररसस्य वर्णनमष्टसर्गषु अतिसुरम्यत्वेन विस्तारितमस्ति। कविमाघः हृदयाभिव्यक्तेरनुपमं चित्रं स्वकीये महाकाव्ये पाण्डित्यावगाह्यत्वेनावतरति। कविः रसाभिव्यक्त्यपेक्ष्ययैव गुणरीत्यलङ्गारादीनां चयनं कृत्वैव महाकाव्यमद्वितीयोल्लासरूपेण सहृदयानामामोदायोल्लसति। महाकविना महाकाव्यस्वरूपानुरूपमेव महाकाव्यमिदं विरचितम्। महाकाव्येऽस्मिन् वीरोऽङ्गीरसः मुख्यसहायकरसरूपेण शृङ्गारः तथा यथावसरमन्येऽप्यङ्गरसाः महाकाव्यस्योत्कर्षाधानाय अहमहमिकया प्रसृताः भवन्ति। एतस्मात् महाकाव्यमिदं सहृदयहृदयावर्जकत्वमवधारयतीति ॥शम्॥

---

1. शि.व. 18.17
2. शि.व. 19.37
3. शि.व. 19.117
4. शि.व. 19.77

# महाकविमाघस्य स्थान-कालविचारः

**डॉ. संजू शर्मा**
पूर्वशोधच्छात्रा, साहित्यविभागस्य
श्रीलालबहादुरशास्त्रीराष्ट्रिय-
संस्कृतविश्वविद्यालयः, नवदेहली-16

**सरस्वत्याः लक्ष्म्याश्च वरदपुत्रः महाकविमाघः।**

विश्वकविकुलगणनायां महाकविमाघं को न जानाति यद्यपि महाकवि-कालिदासम् उपमायै भजते महाकविदण्डिनम् पदलालित्याय भजन्ते, किन्तु यदा वयं एकस्मिन्नेव स्थले उपमार्थगौरवपदलालित्यस्य यदि दर्शनकामनां कुर्मः तर्हि वयं कश्चित् कविम् अन्वेष्यामः तदा तु महाकविमाघस्य नाम सम्मुखे आगमिष्यति लोके कथयति- **"माघे सन्ति त्रयो गुणाः"** इति। बहुषु कविषु तु एकैकं गुणमस्ति। किन्तु अनेकेषां गुणानामधिपतिः कविरयं महत्वपूर्णं स्थानं लभते कविलोके।

अतः मम मतानुसारेण त्रयाणां गुणानामधिपतिः कविरयं सर्वोत्कृष्टः। यस्य पार्श्वे सर्वं मिलति। तस्य लोके बहुमहत्वम्। महत् सौभागस्य विषयोऽयम् वर्तते यत् राजस्थानधरा मरूधराऽस्ति। किन्तु अस्यां रूक्षां धरायां महाकविमाघः सहसा कवयः जनि लब्ध्वा धरायाम् रससञ्चारणं कृतवन्तः। इति प्रदेशस्यास्य महद् सौभाग्यम्।

राजस्थानप्रदेशस्य **"जालौरमण्डलान्तर्गते"** भीनमाल **"नगरे कवेरस्य जन्म"** अभवत्। कवेरस्य जन्मना तत्रत्या धरा धन्याः सञ्जाता सरस्वत्याः लक्ष्म्याश्च स्वाभाविकं वैरभावं भवति। किन्तु अस्मिन् माघकविविषये उक्तिरियमसत्या सञ्जाता। कविरयं लक्ष्म्याः सरस्वत्याश्च वदरपुत्र आसीत्। लक्ष्म्या सरस्वत्याश्च समरूपेण अस्योपरि कृपादृष्टि आसीत्। ईदृशाः कवयः संसारे अल्पमात्रायामेव सन्ति। येषु समभावेन कृपादृष्टिः स्यात्

महालक्ष्म्याः सरस्वत्याश्च। यादृक् कविरयं विद्वान् आसीत् तादृक् एव बहुस्वर्णमुद्रायुक्तः धनाढ्यः दानशीलश्च आसीत्।

कवेरस्य काव्यशास्त्रीयच्छटा सम्पूर्णे कविमण्डले राराजते। कवेरस्य मेधाः बहु-आयामी वर्तते। जगति विद्यमानाः सर्वे महत्त्वपूर्णाः विषयाः अस्य स्मृतिपटले सन्ति। न कोऽपि विषयो वर्तते यत् अस्य स्मृतिपटले नैव समागच्छति। अयं महाकविः सर्वेषु विषयेष्वेव पारंगतोऽस्ति अस्य मेधा दर्शने, घोटकशास्त्रे, व्याकरणे, ज्योतिषे, राजनीतौ, गायन-विद्यायां, वेदशास्त्रे, अर्थविद्यायां, पाकविज्ञाने नीतिशास्त्रे, धर्मशास्त्रे पौराणिकज्ञाने वेदवेदाङ्गे लोकव्यवहारज्ञाने च तीव्रगत्या धावति लोकमङ्गलञ्च तनोति।

न कोऽपि इदृशो विद्वान् भवेत् यः माघरचनां वीक्ष्य परमानन्दस्य अनुभवं कुर्वन् किञ्चित् नवज्ञानविज्ञानं स्वहृद्देशे न धारयते। बहवः विद्वांसः अतीव स्वकीयस्य समयस्य समर्पणं महाकविमाघस्य रचनानां अध्ययने अन्वेषणे आनन्दप्रापणे च कुर्वन्ति। अतः जगति उक्तेरस्या जन्म अभवत् **"मेघे माघे गतं वयः"** इति।

महाकविमाघस्य वैदुष्याप्रतिमम् यथा लक्ष्म्याः सुदृष्ट्या अयम् कविः धनाढयोऽस्ति तथैव शाब्दकोषविषयेऽपि कविरयं परमसमृद्धोऽस्ति अयं स्वकीयं शिशुपालवधमहाकाव्ये नव सर्वाषां रचनावेलायां कस्यापि शब्दस्य प्रयोगं द्विवारं नैव कृतवान्। इति माघस्य वैशिष्ट्यमस्ति।

शास्त्रेषु पारंगतानां पण्डितानां नैव नौन्यं वर्तते। जगति काव्यजगति वा वयं दृष्टिं पातयामः तर्हि अनेकेषां विदुषां दर्शनं भवति। तेषां रचनादर्शनेन अत्यन्तानन्दस्य प्राप्ति र्भवति। इदृक् विद्वत्सु महाकवि-मुरारेर्नाम अतिशयेन भजते। किन्तु मुरारिकविमहोदयानां मर्मस्थलीयज्ञानस्य प्राप्तिः तावदपूर्णा अस्ति यावत् महाकविमाघस्य ज्ञानम् नास्ति। अतः विद्वद्भिः उक्तिरियमाविष्कृता यत्॥ **"मुरादिपदचिन्ताश्चेत् तदा माघे रतिं कुरू।"**

यदा महाकविमाघविषयकं पुष्टं ज्ञानं भवति तदा महारचनाकार-मुरारिविषयकं ज्ञानम् अतिसौकर्येण न प्राप्तं भवितुमर्हति। अतः महाकवि-माघस्य एतद् दृष्ट्यापि बहुमहत्वमस्ति।

महाकविभारविमहोदयानामपि शास्त्रेषु बहुमहत्त्वपूर्णं स्थानमस्ति। लोके अर्थगौरवाय एतेषां प्रसिद्धिरस्ति। वास्तविकरूपेण कविना अनेन अर्थगौरवस्य भाण्डागारं प्रपूरितम् यथा **"हितं मनोहारि च दुर्लभं वचः" "हितान्न यः सशृणुते सः किम्प्रभुः"**

इत्यादयः उक्तयः निश्चित् रूपेण लोकमङ्गलं कुर्वन्ति। किन्तु महाकविमाघस्य यदा प्राक्कट्यमभवत् तदा तेषां चमत्कृततां द्वितीय-स्थानमाप्नोति। **"जनाः कथयन्ति-तावत् भा भारवेर्भाति यावत् माघस्य नोदयः"** उदयानन्तरं सर्वेषां कविनां द्युतिनौन्यं भवति एतत् दृष्ट्यापि महाकविमाघस्य बहुमहत्त्वपूर्णस्थानमस्ति कविजगति।

स्वकीयरचनया स्वकीयजन्मना च विश्वस्य महदुपकृतम् महाकवि-माघेन अनेकेसां कविनां तु बहुग्रंथरचनानन्तरमपि उच्चस्थानं नैव प्राप्तं भवति। अयं कविः मात्र एकेन शिशुपालवधमहाकाव्येन अमरतां लेभिरे। एतादृक्कविनां कार्यशैलीमनुसृत्य एता उक्तिः चरितार्था अभवत्।

**जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः।**
**नास्ति तेषां यशः का जरामरणं भयम्॥** इति

शिशुपालवधमहाकाव्ये विंशतिसर्गाः विद्यमानाः सन्ति। येषां कवेरस्य ज्ञानस्य भाण्डागारं स्थापितम् अस्ति। महाकाव्ये 1645 संख्यकाः श्लोकाः सन्ति। अनेकेसां रूपकश्लोकानामपि सन्निवेशः अस्मिन् महाकाव्ये विद्यते। एतैः श्लोकैः अस्य कवेः प्रसिद्धिः कविलोके विश्वे च प्राचुर्येण प्रसारिता अभवत्।

यथा–

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यम् माघे सन्ति त्रयो गुणाः॥**

संसारे विद्वांसः त्रिगुणपुञ्जस्वरूपे महाकविमाघस्य स्मरणं कुर्वन्ति। जनान् एकस्मिन् जने एव एतादृशाः गुणाः मिलन्ति तु व्याख्यातॄणां श्रोतृणां जनानां कृते बहुलाभं सञ्जायते। ईहङ् महाकवि माघः संसारस्य बहु उपकारं करोति। यदा एकस्थले एव बहवः स्तुतिप्राप्तिर्भवति तर्हि पाठकानां

कृते बहुलाभ: भवति, ते अनेकस्थलानां पठनस्य स्थाने एकस्मिन् स्थाने एक बहुआयामानां पठनं बहुविषयानां च दर्शनं कृत्वा स्वकीयां ज्ञानसाधनां विवर्धयितुं शक्नुवन्ति। एतत् सर्वं महाकविमाघरचनायां सिद्धं भवति। महाकविमाघ: भावपक्षस्य कलापक्षस्य च उभयपक्षयो: कविऽस्ति कविशिरोमणि माघकवि: भारवि: कविमुररीकृत्य तान् हृदये स्थानं प्रदाय स्वकीयकाव्यसाधनां करोति। स: उत्तरोत्तरं उच्चस्तरीयरचनाकरणेन परमं वैशिष्टयम् प्राप्नोति। भावपक्षत अपि अस्य कलापक्ष: उच्चस्तरीयोऽस्ति। अयं ज्ञानस्य गूढतत्त्वं प्रकटनेऽपि सिद्धहस्तो कवि: पदे पदे अस्य रचनासु माधुर्यप्रकटनं भवति। माधुर्ये अस्य चमत्कार: सर्वविदित: विविधानां अलङ्काराणां प्रयोगेष्वपि अयं कवि: सिद्धहस्त: प्रतीयते उपमा उत्प्रेक्षा अनन्वय-काव्यलिङ्ग-यमक-समासोक्ते तुल्ययोगितादीनां अलङ्काराणा माघीयाच्छटा सर्वत्र दरीदृश्यते।

व्याकरणज्ञानस्य प्रगाढता अस्य कवे पदे पदे दरीदृश्यते। उच्चस्तरीय-व्याकरणनियमानां प्रकटनं विविधस्थलेषु अस्य कृतिषु विद्यते येषां दर्शनेन पाठका: विद्वांस चमत्कृता: भवन्ति। महाकविभारविद्वारा विकसितां रचना-शैलीं अयमपि कवि: न जहाति तस्मिन् पथि चलित्वा स: स्वकवित्वं उच्चस्तरीयं निर्माति।

साहित्ये भट्टिकवे: व्याकरणपरकप्रयोगा: प्रसिद्धा: सन्ति तस्य महाकाव्ये पदे पदे श्लोके श्लोके च व्याकरणस्य नियमानामुपस्थितिपरकता दरीदृश्यते। अवैयाकरणे नैव: महाकाव्ये साफल्यमधिगम्यते। तादृशी कला-साधनाप्रवृत्ति: महाकविमाघस्य लेखिन्यामपि विद्यमाना अस्ति। अत: कविरयम् कलापक्षे महाकाव्ये महाकविमाघ: अतिशेते। व्याकरणशास्त्रे अस्य निपुणता सर्वविदिता एव। विविधछन्दप्रयोगेषु अपि अयं कविसिद्धहस्तश्च वर्तते यमक-उत्प्रेक्षा-प्रयोगेषु अपि अयं दक्ष: कोमलकान्तपदानां प्रयोगकरणेऽपि अयं प्रकाण्डपण्डित: वर्तते। शास्त्रीयतथ्यप्रकटनेऽपि कविवरोऽयम् दक्ष: वर्तते।

यदा नारदमहाभागा: आकाशात् अवतरन्ति तस्मिन् समये भगवाननन्दनन्दनयशोदानन्दनपरात्परपरब्रह्म देवकीनन्दनयदुकुलचन्द:,

श्रीकृष्णः सभायाम् उपविश्य तेषां नारदमुनीनां दर्शनं कुर्वन्ति। तस्याम् जर्वलायाम् तेषां दर्शनं सभास्थले सभासदेभ्यः भवति, तत्काले नारदमुनीनां यादृशी दर्शनच्छटा जनेभ्यः प्रतीयते तस्याः अवस्थायाः वर्णनम् महाकविमाघेन अतीव सजीवतया कृतम्। तदा तेषां उपमा समये रश्मिभिः सह तु क्वचित् अग्निना सह सम्पादितं क्वचित्- तेजपुञ्जेन सह तेषां दृश्यम् स्थाप्त्यदेवर्षेः वीणायाः शोभा अपि अत्यधिकरोचकस्वरूपे वर्णिता अस्ति शोभां विलोकयन् इदम् निर्धारितमभवत् यत् आकाशात् अवतरन्त न कोऽपि अन्यो जनः अपितु भगवतो वैकुण्ठेश्वरस्य साक्षात् विष्णोः अभिन्नभक्तप्रेम्णः भक्तेश्च साक्षात् स्वरूपः नारदमुनिरेव अवतरति पृथ्वी मंडले। इत्थं भूतं पापनिवारणाय अवतरिता जगन्निवासः भगवान् श्रीकृष्णः भूमौ पापाचारिणां नृपाणां पापचरणं निवारणाय वासुदेव स अपि अवतारं संग्राह्य समागताः समानधर्मसमानदेहरूपं भगवन्तम् अम्बरात् अवतरन्तं नारदं मुनिः विलोकयामासु। इदृशान् तथ्यान् ज्ञात्वैव अद्य वैज्ञानिकैः गुरूत्वाकर्षणसिद्धान्तानामाविष्काराणि कृतानि न्यूटनादि वैज्ञानिकैः।

गुरुत्वाकर्षणसिद्धान्तः, उत्प्लावलसिद्धान्तश्च तथा अन्ये-अनेकश आधुनिकाः वैज्ञानिकसिद्धान्ताः वैज्ञानिकैः प्रतिष्ठापिताः सन्ति येषां साहायेन पृथिव्यामनेकेषां तथ्यानां ज्ञानं भवति अन्वेषणं च भवति। यथा श्रीमद्भागवत-महापुराणस्य भाषा समाधिभाषा अस्ति तथैव सर्वेषां कविनां भाषा उदाहरणानि अपि रहस्यपूर्णानि सन्ति। येषामध्ययनकरणेन ज्ञानकरणेन न विवेकपूर्ण अध्ययनेन च संसारः विविधविधतत्त्वानामपि अविष्काराणि भवितुमर्हन्ति इति मे मतिः।

व्योमात्-भगवतो नारदस्य पृथिव्योपरि अवतरणस्य चित्रणं एकशब्द-चित्रमिवास्ति। यत्र अत्यधिकदेदीप्यमानतत्त्वस्यावतरणस्य प्रकाशपुञ्जवत् अवतरणस्य विवेचनं एकम् वैज्ञानिकशोधतत्त्वां इव प्रतिभाति मानस-पटले तु इदृशैः तथ्यैः गूढचिन्तनेन वैज्ञानिकतथ्यानां अनेकेषां शोधसाधनानि सम्भवन्ति यदि वैज्ञानिकतामवधार्य कार्यं भवेत्।

यथा उपमाप्रयोगेषु महाकविकालिदासः सिद्धहस्तो वर्तते। तथैव महाकवेरस्य अनेकविध-उपमाः प्रसिद्धाः सन्ति। क्वचित् शास्त्रीयज्ञान-

संबोधिनी उपमास्तु, क्वचित् काव्यगौरवसम्बन्धिनी उपमा: कुत्रचित् नीतिशास्त्र युत् रचना अनेन प्रकारेण विविधविधउपमानां प्रयोगानि महाकवि माघे कृतानि– यथा–

**वर्णे: कतिपयैरेव ग्रथितस्य स्वरैरिव।**
**अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रिता।।**
**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**[1]
**अनन्तर वाङ्मयस्याहो द्वयो विद्वानपेक्षते।।**

भाग्येन पुरुषार्थै: च सह कार्यसिद्धिर्भवति। उभयो सहकारस्य अवश्यकता वर्तते केवलेन एकेन भाग्येन अपि कार्यसिद्धिर्न भवति केवलेन मात्रपरिश्रमेण अपि न कार्यसिद्धिर्भवति। कार्यसिद्धौ द्वयोरेव तथैव एत्कवित्वसिद्धये शब्दार्थयो र्युति: आवश्यकता भवति।

एतत् न केवलेन शब्देन स्व रचना श्रेष्ठत्वं प्राप्तुं शक्नोति न केवलेन अर्थेन रचनाश्रेयं प्राप्तुमर्हति शब्दस्य अर्थस्य च उभयो: दिव्यप्रयोगेण स कवि: स्वकीयरचनोद्देश्यसाफल्यं प्राप्तुं शक्नोति।

इदृशीनाम् उच्चस्तरीयानाम् उपमानां प्रयोग: महाकविमाघेन सम्पादितम्। एकस्मिन् स्थले महाकविमाघ: तुलयति तत् शरीरे उत्पन्नं रोगं तथा लोके उत्पन्नं शत्रु यदा उत्पतिसमये एव नैव निवारणं भवति तु ते दुखदायिनो एव भवन्ति। यथा–

**उत्तिष्ठमानस्तु परो नोपेक्ष्य: पथ्यमिच्छता।**
**समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामय: स च।।**[2]

एकस्मिन् स्थले स: उपमाप्रयोगं करोति यत् यथा लघुवयस्या: बालिका: स्व मातरमन्देति। तथैव प्रात: कालिकी सन्ध्या रात्रीमंनु गच्छति।

**अनुपतति विराकै: पत्रिणां व्याहरन्ती।**
**रजनिमचिर जाता पूर्वसन्ध्यासुतेव।।** इति

एक उपमा वर्तते महाकविमाघस्य इत्थम्–

---

1. शिशु. 2.86
2. शिशु. 2.10

सांख्यशास्त्रानुसारेण पुरुषः उदासीनो अकर्ता च अस्ति। किन्तु बुद्धिद्वारासम्पादितानां फलानामुभोक्ता भवति। तथैव साक्षिमात्रोऽपि भगवान् वासुदेवः श्रीकृष्णः सेनाद्वारा सम्पादितविजयस्य फलभोक्ता भविष्यति।

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।**
**फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।।**[1] इति

उपमायाः माघस्य एकः दिव्यः प्रयोगः दृश्यताम् काचित् रमणी कृष्णदर्शनपरायणा अस्ति। तस्या वदनकमलम् गवाक्षगतमस्ति। अस्या सौन्दर्यस्य श्रेष्ठता दर्शनीया। यथा उदयगिरिकन्दरास्थित चन्द्रमण्डलम् इव वा सुधाशुंमण्डलम् राजते तद्वत् तस्य वदनकमलम् व्यराजत।

**अधिरूह्य मन्दिर गवाक्षमुल्लसत्**
**सुदृशो रराज मुरजिद् विदृथतया।**
**वदनारविन्द मुदयाद्रिकन्दरा**
**विवरोदरस्थितमिवमिन्दुमण्डलम्।।** इति

नारदश्रीकृष्णयोः श्वेतकृष्णच्छटा उपमा–

**रथाङ्गपाणेः पटलेन रोचिषाम्**
**ऋषित्विषः संवालिता विरेजिरे।**
**चलत्पलाशान्तरगोचरास्तरो**
**स्तुषारमूर्तेरिव नक्तमंशवः।।**[2] इति

महाकविभारविकवीष्वपि कविरयं माघकविः स्वकीयमादृर्शरूपेण मत्वाऽपि स्वकीयकाव्यसरणिं निर्धारितं कृत्वा अग्रे अग्रे प्रवृत्तो भवति। स्वकीयाम् काव्यसाधनायाम् यथा भारविः अर्थगौरवस्य चित्रितो कविरस्ति तथैव महाकविमाघोऽपि बहुस्वर्थेषु अर्थगौरवमाप्तवान्। एतेषां काव्येऽपि पदे पदे अर्थगौरवं दृग्गोचरी भवति। महाकविमाघः शास्त्रेषु बहुविधनिष्णातः कविरस्ति, तस्य कल्पनाशक्तिरति उच्चस्तरीया अस्ति। भावानामुत्कर्षः अस्य अप्रतिमोऽस्ति। सूक्ष्मेक्षपदक्षता अस्मिन् कवौ विद्यमाना अस्ति। नीतिकुशलतासिद्धः अयं कविः। अस्य व्यवहारे तु अतीव सजीवता

---

1. शिशु. 2.59
2. शिशु. 2.21

वर्तते। लोकारांधनक्षमता प्राचुर्येण वर्तते माघे। तस्य लोकव्याप्ता अर्थगौरव-प्रधानयुक्ता उक्तयः सर्वत्र प्रसिद्धाः सन्ति साहित्यजगति। यथा भगवान् भास्करः तमसः हन्ता अस्ति तथैव भगवान् कृष्ण एवं राक्षसान् विनाशसक्षमः।

**ऋतेरवेः क्षालयितुं क्षमेतकः**
**क्षपातमस्काण्डमलीमसं नभः॥**

मानहीनस्य जीवनम् निकृष्टम्- कविकृतगुण गौरववर्णनम्-

**पादाहतं यदुत्थाय मूर्धानमधिरोहति।**
**स्वस्थादेवापमानेऽपि देहिनस्तदवरं रजः॥**[1] इति॥

यथा दण्डिकविः पदलालित्यस्य सिद्धहस्त कविरासीत तथैव माघ-कवेरपि पदलालित्य सौष्ठवमुच्चस्तरीयमस्ति। एषां पदानां कौमार्यम् अतीव उच्चस्तरीयम् भवति। वर्णनमाधुर्यऽमपि कवेरस्य प्रसिद्धिङ्गतः। अस्य कवेः भाषायां संगीतमयता विद्यते। कविना अनेन यथा भावानामुत्पत्तिर्भवति तदवदेव प्रयोगकरणे कविरयं सिद्धहस्तो वर्तते। भाषायामारोहा-रोहक्रमस्य सफल-प्रयोगकर्तृत्वे माघकवेः प्रसिद्धिमस्ति। भाषायां संगीतमयत्वस्य उपस्थापकता माघे पूर्णतः प्राप्यते अतः अस्य कवे उच्चस्तरीय पदलालित्यम् सुप्रसिद्धमस्ति। यथा-

**मधुरया मधुबोधितमाधवी-**
**मधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरून्मद-**
**ध्वनिभृता निभृताक्षरमुज्जगे॥**[2]
**वदनसौरभलोभपरिभ्रमद्-**
**भ्रमरसंग्रमसंभृतशोभया।**
**चलितया विदधे कलमेखला-**
**कलकलोऽलकलोलदृशान्मया॥**[3] इति॥

*ईदृशमुच्चस्तरीयं महाकविमाघस्य कवित्वमस्ति॥ शुभम्॥*

---

1. शिशु. 2.46
2. शिशु. 6.20
3. शिशु. 6.14

# शिशुपालवधमहाकाव्ये रीतिविचारः

**डॉ. तोषी शर्मा**

पूर्वशोधच्छात्रा, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः नवदेहली–16

"रीतिरात्मा काव्यस्येति" वचनमुद्घोष्य काव्यशास्त्रसंसारे वामन एव सर्वप्रथमाचार्यः बभूव। यः काव्ये रीतीनां महत्त्वं प्रतिपादयन् सविशदं-सुस्पष्टं-सुपरिष्कृतम् तामेव काव्यात्मतत्त्वं प्रतिपादितवान्। रीतिस्वरूपं निरूपयता वामनेनोक्तं यत् –

**विशिष्टपदरचना रीतिः।**

**विशेषो गुणात्मा।।**[1]

अत्र विशेषपदस्याभिप्रायः गुणैः सह सम्बन्धः। काव्यशोभायाः कर्तारो गुणाः काव्यस्य नित्यधर्माः वर्तन्ते। काव्यशोभासम्पादनं विना काव्यरचना न प्रवर्तते। साहित्यशास्त्रे रीतिपदं तु योगः, योगो नाम गुणैः सह योगः इति साहित्यशास्त्रीणां मतम्। वस्तुतः अतिप्राचीनरीतिपदस्य निर्वचनं "रीङ् गतौ" धातुद्वारा निष्पद्यते, यस्यार्थः गमनं मार्गो वा। एवं प्रकारेण रीतिपदं साहित्यशास्त्रे साहित्ये वा विभिन्नमार्गान् सूचयन्ति। ऋग्वेदे रीतिपदप्रयोगः बहुधा बभूव –

**महीवरीतिः शवसासरत पृथक्।**[2]

**वातेवाजुर्या नद्येव रीतिः।।**[3]

---

1. का.अ.सू.वृ. 1.2.7-8
2. ऋग्वेद 1.28.14
3. ऋग्वेद 2.39.15

वामनात् पूर्वं भामहेन दण्डिना च एषा सङ्केतिता परञ्च उभावपि रीतिपदमप्रयुज्य मार्गशब्दस्य प्रयोगं चक्रतुः। आदौ भरतेन नाट्यशास्त्रे प्रवृत्तीति पदप्रयोगः निर्दिष्टः। वस्तुतः प्राचीनकाले भौगोलिकदृष्ट्या विभिन्नप्रदेशेषु निवसन्तो मनीषिणः निजप्रदेशप्रचलितासु सुप्रसिद्धासु शैलीषु काव्यानि निबबन्धुः। यथा–

गौडप्रदेशे लेखकाः समासबहुलायां गौडीशैल्यां विदर्भवासिनश्च समासरहितायां वैदर्भीशैल्यां काव्यानि रचयन्ति स्म। यद्यपि दण्डि-भामह-रुद्रट-राजशेखरादय आलङ्कारिकसमीक्षकाः भिन्न-भिन्नरूपेण रीतिं स्वीकुर्वन्ति व्याख्यायन्ति च। तथापि रीतितत्त्वस्य साङ्गोपाङ्गविवेचनं वामनेनैव कृतम्। अनेन रीतिः काव्यात्मा इति प्रतिपादिता। रीतेः वैशिष्ट्यसन्दर्भे वामनेनोक्तं यत्–

**एतासु तिसृषु रीतिषु रेखास्विव**
**चित्रं काव्यं प्रतिष्ठितमिति।**[1]

वामनात् परमाप्यन्याचार्यैः रीतिलक्षणं निरूपणं वा क्रियते। आनन्दवर्धनः रीतये संघटना इति सम्बोधनेन बोधयति।

अपरशब्देषु वामनस्य पदरचना अथ च आनन्दवर्धनस्य घटनाशब्दस्तु पर्याय एव। आनन्दवर्धनस्य सिद्धान्तानुसारेण रीतिः रसाश्रयी भवति। आनन्दवर्धनस्य रीतिः रसरूपसौन्दर्यस्य साधनमस्ति तथा आनन्दवर्धनाचार्यः स्वमतस्य व्याख्यानं कुर्वन् लिखति यत्–

**असमासा समासेन मध्यमेन च भूषिता।**
**तथा दीर्घसमासेति त्रिधा संघटनोदिता।।**[2]

अपि च–

**गुणानाश्रित्य तिष्ठन्ती, माधुर्यादीन् व्यनक्ति सा।**
**रसान् तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः।**[3]

---

1. काव्यालङ्कारसूत्रवृत्तिः 1.2.13
2. ध्वन्यालोकः 3.5
3. ध्वन्यालोकः 3.6

अनेन स्पष्टं यत् रीतेः स्वरूपोद्घाटने तस्याः पदविषयत्वं कदाचित् पदशय्यारूपेण कस्मिश्चित् पदसंघटनारूपेण अथ च केषुचित् रसोपकर्त्रीरूपेण विश्लेषणं क्रियते। वस्तुतः आचार्यवामनाभिमतं रीतेः स्वरूपम् उक्तान् सर्वानपि स्वरूपान् साररूपेण प्रदर्शयति। यतोहि वामनाचार्येण तत्तद्देशानुकूल-पदशय्यायाः नामकरणमपि विहितमस्ति। तन्मतानुसारेण रीतिः काव्यस्यात्मेति वर्तते।

वामनाभिमतं रीतेः स्वरूपम् अनेन प्रकारेण ख्यायते—

**विदर्भादिषु दृष्टत्वात् तत् समाख्या।**[1]

वामनाचार्येण तिसृणां रीतीनां स्वरूपं गुणभेदाद् भेदमाह—

**समग्रगुणा वैदर्भी।**[2]

वैदर्भीरीतेः पश्चात् गौडीरीतेः लक्षणं क्रियते—

**ओजः कान्तिमती गौडीया।**[3]

तदनन्तरं पाञ्चालीरीतेः लक्षणमित्थमकरोत्—

**माधुर्यसौकुमार्योपपन्ना पाञ्चाली।**[4]

साधनस्य एकमात्रोद्देश्यः साध्यप्राप्त्यैव भवति। अपरशब्देषु कथयितुं शक्नुमः यत् यावत् लक्षणं लक्ष्यसिद्धेः दिशि प्रवृत्तं न भवति तावत् तल्लक्षणं पूर्णसाफल्यं न साधयितुं शक्नोति। माघविरचितविंशतिसर्गयुतं लक्ष्यग्रन्थशिशुपालवधमहाकाव्यमाधारीकृत्य आचार्यवामनस्य तिसृणां रीतीनां लक्षणानां साफल्यपूर्णप्रयोगे किञ्चित् प्रस्तूयते। सर्वप्रथमं "घण्टा" उपाधिविभूषिते महाकविमाघविरचितशिशुपालवधमहाकाव्ये रसोपकर्त्तृत्वेन वैदर्भीरीतेः प्रकाशनाय कानिचितोदहारणानि सम्मुखी क्रियते।

---

1. काव्यालङ्कारसूत्रवृत्तिः 1.2.10
2. काव्यालङ्कारसूत्रवृत्तिः 1.2.11
3. काव्यालङ्कारसूत्रवृत्तिः 1.2.12
4. काव्यालङ्कारसूत्रवृत्तिः 1.2.13

**वैदर्भीरीते उदाहरणानि–**

**विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः।**
**कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव॥**[1]

कृष्णनारदसम्भाषणनाम्नः प्रथमसर्गस्य श्लोकेऽस्मिन् वसुधाया-मागच्छन्नारदमुनेः शोभायाः विहङ्गराज्ञा शुभ्रहिमेन च सह सादृश्यमकरोत्। तत्सादृश्यं पदशय्यायां माधुर्यव्यञ्जकवर्णानां प्रयोगेण चारुत्वमाप्नोति, यतोहि रचनायां "ङ्ग-ङ्ग, रकाराः, ण्, न्त-न्त," इत्येतेषां वर्णानामावृत्त्या एव अतिशयमाधुर्येण अर्थमभिव्यनक्त्यत्र।

**कपाटविस्तीर्णमनोरमोरः-**
**स्थलस्थितश्रीललनस्य तस्य।**
**आनन्दिताशेषजना बभूव**
**सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः॥**[2]

अस्य महाकाव्यस्य पुरीप्रस्थानमितितृतीयसर्गे इन्द्रप्रस्थं प्रति गच्छन्तं श्रीकृष्णस्य अनुपमश्रियाः कान्तालक्ष्म्याश्च युगपदेव कृतवर्णनेन सहृदयेषु आनन्दानुभूतिः जायते। यतः श्लोकेऽस्मिन् पदविन्यासे वर्गाणामन्त्यवर्णाः "(ङ, ञ, ण, न, म) तथा रकार इति माधुर्ययुक्तवर्णानां साहचर्येण सा आनन्दानुभूतिः बारम्बारं प्रस्फुटा भवति। वस्तुतः माधवस्य श्रियं वक्तुम् एते माधुर्यव्यञ्जकवर्णा अत्याकर्षकाः प्रतीयन्तेऽत्र।"

**राजीवराजीवशलोलभृङ्गं**
**मुष्णन्तमुष्णं ततिभिस्तरूणाम्।**
**कान्तालकान्ता ललनाः सुराणां**
**रक्षोभिरक्षोभितमुद्वहन्तम्॥**[3]

रैवतकवर्णननाम्नः चतुर्थे सर्गे भगवान्श्रीकृष्णः विचित्रधातुभिः सह तं रैवतकगिरिं ददर्श। महाकविमाघः भगवतः नेत्राभ्यां दृष्टं रैवतकगिरेः

1. शि.व.म. 1.7
2. शि.व.म. 3.13
3. शि.व.म. 4.9

अलौकिकसौन्दर्यवर्णनमकरोत्। यमकालंकारयुक्तश्लोकोऽयं समग्रगुणा-वैदर्भीरीतेः माधुर्यव्यञ्जकवर्णानां साहचर्येण अत्यधिकप्रीतिकर अभवत्। श्लोके "न्त- म्त, ण्" इत्यनयोः बारम्बारमावृत्तिः तथा "ङ्ग- रकारस्य" बहुधासञ्चयत्वात्, अपरशब्देषु पदशय्यायामस्याम् एते माधुर्ययुक्तवर्णाः रैवतकगिरेः कान्तिं कान्तयितुम् अत्यन्तं साहाय्यं प्रददति।

**रतिरभसविलासाभ्यासतान्तं न**
**यावन्नयनयुगममीलत्तावदेवाहतोऽसौ।**
**रजनिविरतिशंसी कामिनीनां**
**भविष्यद्विरहविहितनिद्राभङ्गमुच्चैर्मृदङ्गः।।**[1]

प्रभातवर्णननाम्न एकादशसर्गस्य अस्मिन् श्लोके प्रभाते कामीजनानां दशा दृश्यते। प्रातःकाले ते विरहशङ्कया कथं सन्तप्ताः भवन्ति? तेषां कामीजनानां दशामिदृश्याधारीकृत्य वैदर्भीरीतेः माधुर्याभिव्यञ्जकवर्ण-समुच्चयसाहाय्ये अर्थ अभिषिक्तः भवति। यथा पूर्वार्द्धे तवर्गस्यान्तवर्णः नकारेण सह तवर्गस्य प्रथमवर्णः संयुक्तः तथा उत्तरार्द्धे रकाराः, कवर्गस्य अन्त्यवर्णः ड.कारेण सह कवर्गस्थगकारः सम्मिलित अस्ति। एतेषां वर्णानामावृत्ति अतिशयमाधुर्यपूर्वकम् अर्थमभिव्यनक्ति।

**विकचकमलगन्धैरन्धयन्भृङ्गमालाः,**
**सुरभितमकरन्दं मन्दमावाति वातः।**
**प्रमदमदनमाद्यद्यौवनोद्दामरामा,**
**रमणरभसखेदस्वेदविच्छेददक्षः।।**[2]

असौ श्लोकः एकादशसर्गत उद्धृतमस्ति, प्रभातकालीनानिलस्य मन्दत्वं, शीतलत्वं, विकसितकमलयुक्तसुरभिमत्र द्योतयति। कवि अतिमाधुर्ययुतवर्णाः प्रयोजयति। प्रथमचरणमैव "न्ध- न्ध, ङ्ग" इति, द्वितीयचरणे "न्द-न्द" इत्यनयो आवृत्तिः, तृतीयचतुर्थचरणयो अन्त्यवर्णौ

---

1. शि.व.म. 11.2
2. शि.व.म. 11.19

"म-न" तथा रेफस्यावृत्तिः रसानुगुणत्वात् पदशय्यायां प्रयोगेण चमत्कारितां धत्ते। एते माधुर्यव्यञ्जकवर्णा अर्थे नूतनचमत्कृतिं जनयन्ति।

**गौडीरीते उदाहरणानि-**

**बृहच्छिलानिष्ठुरकण्ठघट्टनाद्वि-**
**कीर्णलोलाग्निकणं सुरद्विषः।**
**जगत्प्रभोरप्रसहिष्णु वैष्णवं न**
**चक्रमस्याक्रमताधिकंधरम्॥**[1]

कृष्णनारदसम्भाष्णे प्रथमसर्गे नारदमुनिः भगवन्तं श्रीकृष्णं रक्षवंश श्रृंखलायाम् उत्पन्नस्य असहिष्णुदशाननस्य विषयमबोधयत्। कविमाघेन रावणवर्णनं सुन्दरोदाहरणेन प्रस्तूयते। पद्ये गौडीरीतेः वर्णानां साहचर्येण अर्थः पौनः पुन्येन देदीप्यमानं भवति। वर्गस्य प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः तथा रकारः- शल्प्रत्याहारः प्रचुरमात्रायां सन्ति। यथा (ह-च-छ-ठ-ध-ट्ट-भ-स-ध-ष) इत्येतेषां गौडीरीतेः वर्णानां प्राचुर्येण ओजोगुणाभिव्यक्तिः जायतेति।

**यतः स भर्ता जगतां जगाम**
**धर्त्रा धरित्र्याः फणिना ततोऽधः।**
**पहाभराभुग्नशिरःसहस्र-**
**साहायकव्यग्रभुजं प्रसस्त्रे॥**[2]

असौ श्लोकः भगवतः श्रीकृष्णस्य पुरीप्रस्थानयात्रां कविः वर्णयति। भगवान् येन पन्था अगच्छत्, तदा धरित्र्याः धर्तुः शेषनागस्य सहस्रफणाः भगवतः भारेण विनम्राः संजाताः। सौन्दर्ययुक्तवर्णनमिदं ओजयुक्तवर्णेषु विरच्यते। अतिशयसमासपदावलौ निम्नवर्णानां प्रयोगो यथा - "स-ध-त्र-र-फ-त-ज-ग-म-ह-स्त्र-ग-प्र-स्त्रे।" कद्रुपुत्रशेषनागस्य स्थिति एभिः वर्णैः वीररसानुगुणमेव प्रतीयते, एषां वर्णानां प्रयोगेण अर्थः बारम्बारं चित्तं स्पृशति।

---

1. शि.व.म. 1.54
2. शि.व.म. 3.25

**क्वचिल्लसद्घननिकुरम्बकर्बुरः**
**क्वचिद्धिरण्मयकणपुञ्जपिञ्जरः।**
**क्वचिच्छरच्छशधरखण्डपाण्डुरः**
**खुरक्षतक्षितितलरेणपुरुद्ययौ।।**[1]

पद्यमिदं यदुवंशक्षोभनाम्नः सर्गात् अवतरितमस्ति। शिशुपालस्य प्रेषितदूतसम्वादेन यदुवंशसभायां क्षोभः जातः। क्षितितलस्य रेणुः विभिन्नस्थानेषु विभिन्नप्रकारेण मण्डिता बभूव। तस्याः रेणुवर्णनार्थं कविना ओजव्यंजकवर्णानां प्रयोगः कृतः। येषां वर्णानां समुच्चयेन साहायेन च अर्थः प्रस्फुटत्यत्र। "ल-द-घ-र-द्ध" वर्णानां तथा उत्तरार्द्धे "च्छ-श-ध-र-ख-ड-क्ष" एतेषां वर्णानामावृत्तिः श्लोके विद्यमानं ओजवर्णनमभिव्यनक्ति।

**द्रुतद्रवद्रथचरणक्षतक्षमातलोल्लसद्बहुलरजोवगुण्ठितम्।**
**युगक्षयक्षणनिरवग्रहे जगत्पयोनिधेर्जल इव मग्नमाबभौ।।**[2]

श्लोकेऽस्मिन् सघनरजस्य सादृश्यं प्रलयकालेन सह क्रियते। श्लोकपठनेनैव समासबहुलागौडीरीते उत्कर्षः प्रतीयते। ओजवर्णानामावृत्तिः पुनः पुनः भवति। शिशुपालकृष्णयोः युद्धकाले ओजगुणयुक्ताः श्लोका अथ च अङ्गीरसवीरत्वात् महाकाव्यस्य सौन्दर्यमतिशेति। ओजव्यञ्जकवर्णाः पूर्वार्द्धे बहुत्र प्रयुज्यन्ते। "द्र-त-थ-च-ण-क्ष-ल-ल्ल-स-द-ब-ह-ज-ग-ठ" तथोत्तरार्द्धे य-ग-क्ष-थ-ध-ल-भेत्येतेषां वर्णानां रसानुकूलमावृत्तिः श्लोके वर्णितस्य स्थायीभावस्य दीप्ततामावहति।

**जनिताशनिशब्दशङ्कमुच्चैर्धनुरास्फालितमध्वनन्नृपेण।**
**चपलानिलचोद्यमानकल्पक्षयकालाग्निशिखानिभस्फुरज्ज्यम्।।**[3]

शिशुपालवधाख्यान्तिमसर्गस्य पद्यमिदं चेदिराजशिशुपालस्य धनुषः भीषणशब्दः सम्पातविद्युद्वदेवासीत्। ओजव्यञ्जकवर्णैः समासान्वितेन च वर्णनेन गौडीरीतेः द्योतकत्वमेव। समासबहुलरचनायां ओजव्यञ्जकवर्णाः

1. शि.व.म. 17.56
2. शि.व.म. 17.60
3. शि.व.म. 20.7

यथा– "त-द-ध-श-ष-फ-ख-ग-भ" वर्णाः तथा समासाडम्बरत्वेन युद्धवर्णनप्रसङ्गः दीप्तमतामेति।

**पाञ्चालीरीते उदाहरणानि–**

**सुरभिणि श्वसिते तधतस्तृषं नवसुधामधुरे च तवाधरे।**
**अलमलेरिव गन्धरसावमू मम न सौमनसौ मनसो मुदे।।**[1]

अस्मिन् ऋतुवर्णननामषष्ठसर्गे एकः रसिकः स्वप्रियतमाया अनुपमसौन्दर्येण मुग्धमधुकराणां सहैव भावध्वनित्वेन स्वदशाम् अनेन श्लोकेन बोधयति। अत्र पूर्वार्द्धे गौडीरीतेः व्यञ्जकवर्णा अङ्गनायाः लावण्यं द्योतयन्ति। यथा- शल्प्रत्याहारः (श-स-ष), रकारस्य (भ-ध-च) इत्येतेषां वर्णानामावृत्त्या गौडीरीतिः प्रस्फुटा भवति। तथैवोत्तरार्द्धे वर्गाणामन्त्यवर्णाः "म-न" इत्यनयोः बारम्बारं दर्शनमेव वैदर्भीरीतिमत्र अभिव्यनक्ति। अतः द्वयोः गौडीवैदर्भीरीत्योः वर्णसंयोगत्वादेव पाञ्चालीरीतेः सौन्दर्यछटां श्लोकेऽस्मिन् किरति।

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।**[2]

यमकानुप्रासालंकारयुक्तश्लोकोऽयं वसन्तऋतो आगमनत्वात् मधुकराङ्गनया कृतं मदयुतमन्दध्वनिं वर्णयति। पाञ्चालीरीतेः सुप्रसिद्धश्लोक असौ प्रथमद्वितीयचरणयोः गौडीव्यञ्जकसमासबाहुल्येन तथा तृतीयचतुर्थचरणयो वैदर्भीव्यञ्जकाल्पवृत्तिसद्भावादत्र पाञ्चालीरीतिः प्रतिपदमभिनवचमत्कारं जनयति।

**गजकदम्बकमेचकमुच्चकैर्नभसि वीक्ष्य नवाम्बुदमम्बरे।**
**अभिससार न वल्लभमङ्गना न चकमे च कमेकरसं रहः।।**[3]

वर्षाऋतुमुररीकृत्य माघकृत्य श्लोकेऽस्मिन् पाञ्चालीरीतिः सहज-भावेनैव द्रष्टुं शक्नुमः। यतोहि पद्यस्य प्रथमद्वितीयपादयोः कवर्गपवर्गयोः

1. शि.व.म. 6.12
2. शि.व.म. 6.20
3. शि.व.म. 6.26

वर्गाणामन्त्यवर्णानां च प्रयोगः प्रीतिकरः वर्तते। तृतीयचतुर्थयोः "स-ह-भ-च-क-र" इत्येतेषामुक्तवर्णानां साहचर्येण क्रमशः वैदर्भीगौडीरीती द्योतयतः। एतयोः रीत्योः सम्मेलनात् महाकविना पाञ्चालीरीतिरेव अभिलष्यतेऽत्र। एतेषां वर्णानां साह्येन श्रावणमासस्य नवाम्बुनां माध्यमेनैव महाकविमाघेन प्रकृतिचित्रणस्य अनुपमातुलनीयोदाहरणमत्र विरच्यते।

**उपसंहारः–**

वामनाचार्येण काव्यस्यात्मा रीति इति कथिता। रीतिमुररीकृत्य अनेकै आचार्यैः स्वव्याख्यानमकुरुत। तेषु आचार्येषु आनन्दवर्धनमतानुसारं रीतिः रसाश्रयी - रसोपकर्त्री भवति। माघकृतशिशुपालवधमहाकाव्येऽपि रीतिप्रयोगः सकलरचनायां सरसार्थेन काव्यस्वादकान् नन्दन्ति। गुणानुरूपमेवप्रयुक्तपद-शय्यासाह्येन प्रतिसर्गं चमत्कारिकार्थ अवभासते। येन सहृदयेभ्यः पाठकेभ्यः विद्वद्भ्यश्च कृतिरियम् आह्लादकारी प्रीतिकरा च सम्प्रतीयते। वक्तु औचित्यानुरूपं कविमाघेन पदशय्यां परिकल्प्य, प्रतिपदं ललितार्थः प्रतन्यते।

✦✦✦

# शिशुपालवधमहाकाव्ये वर्णितं प्रकृतिचित्रणम्

**डॉ. स्वाति**

पूर्वशोधच्छात्रा, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–110016

आधुनिकयुगे भौतिकता स्वचरमोत्कर्षे विराजते। अस्मिन् भौतिकजगति जनाः कार्येभ्यः विरक्तो भूत्वा हृदयाह्लादकारकाणि तत्त्वानि लोके अन्विष्यन्ति। यद्यपि अन्यासु भाषासु अपि भूयिष्ठं साहित्यम् उपलभ्यते हृदयं चाह्लादयति। परं क्षेत्रेऽस्मिन् यत् स्थानं संस्कृतसाहित्यस्य वर्तते तदन्यत्र दुर्लभसंसारस्य प्राचीनतमभाषासु संस्कृतभाषेयमग्रणीभूता वर्तते। अस्यां भाषायां सर्वेषां विषयाणां विवेचनमस्ति। संस्कृतसाहित्यस्य काव्यधारा प्राचीनकालादेव प्रवर्तिताऽस्ति। तत्र भास–कालिदास–दण्डि–भारवि–माघ–भूवभूत्यादयो महाकवः वर्तन्ते। संस्कृतकाव्यानां वैशिष्ट्यं न केवलं भारते अपितु समग्रसंसारे अस्ति।

संस्कृतसाहित्येऽनेके महाकवयोऽभूवन्। तेषु केचन् एव महाकवयः महाकाव्यानि विरच्य अस्मिन् जगति यशो अर्जितवन्तः। प्राचीनसाहित्ये वाल्मीकि–व्यास–कालिदास–अश्वघोष–भारवि–माघ–श्रीहर्षादयः महाकवयः सन्ति। तत्र प्राचीनसाहित्ये वाल्मीकिरामायण–महाभारत–बुद्धचरित–रघुवंश–किरातार्जुनीय शिशुपालवध–नैषधीयचरितानि च महाकाव्यानि सुप्रसिद्धितानि सन्ति।

सर्वसंस्कृतकवीनाम् अग्रणीः माघो शिशुपालवधमहाकाव्यस्य कर्ताऽसीत्। सा कृतिः प्रसिद्धा शिशुपालवधमिति अस्माकं समक्षमुप–

लब्धास्ति। काव्यसम्पत्तिदृष्ट्या महाकविमाघविरचितस्य शिशुपालवधस्य विशिष्टं स्थानमस्ति। अस्य महाकाव्यस्य कथावस्तु महाभारतस्य सभापर्वतः संगृहीतम्। महाकाव्येऽस्मिन् मुख्यतः द्वारिकानाथश्रीकृष्णचेदिराजशिशुपालयोर्मध्ये युद्धं तथा शिशुपालस्य वधो वर्णितोऽस्ति। अस्मिन् महाकाव्ये विंशतिसर्गाः सन्ति।

**महाकाव्ये प्रकृतिचित्रणम्-**

भारतीयसंस्कृतिः प्राकृतिकानुरागस्य प्रकृतिसंरक्षणस्य च चिरन्तनधारा वर्तते। यत्र प्रकृतिविषयकानैके बिन्दवः स्पष्टतया अवलोक्यन्ते। संस्कृतकाव्य-महाकाव्यानि रसप्रधानानि वर्तन्ते परञ्च तत्र विषयवस्तु-वर्णनानामपि बाहुल्यमस्ति। संस्कृतकवीनां वैशिष्ट्यमस्ति यत् साधारणमपि कथानकं स्वकल्पनया, स्वप्रतिभया, स्वदृष्ट्या, अक्षरविन्यासेन च विशिष्टं हृदयावर्जकञ्च प्रतिपादयन्ति, यस्य प्रभावः पाठकानां श्रोतृणां चोपरि स्पष्टतयाऽवलोक्यते। मनुष्याणां प्रकृत्या सह स्वाभाविकसम्बन्धः खलु। सम्बन्धोऽयमेव भारतीयचिन्तनधारायां पुरुषप्रकृत्या आदिकालाद् प्रभृति प्रतिष्ठितोऽस्ति। मनुष्यः यदिह जगति जायते तदैव स अस्याः प्रकृते अङ्गभूतो भवति। अतः तस्य सौन्दर्यबोधस्तु प्रकृत्या अनुप्रेरितो भवति। अत एव भारतीयकविभिः पुरुषप्रकृत्या आन्तरिकः घनिष्ठश्च सम्बन्धोऽयं स्वस्वकाव्यग्रन्थेषु प्रदर्शितः। ते स्वग्रन्थेषु पुरुषप्रकृत्याः सौन्दर्यपूर्णवर्णनं कदापि न परित्यजन्ति। मनुष्यः प्रकृतिं प्रति संवेदनशीलः वर्तते। अतः प्रकृतिरपि मानवेषु अनुरक्ता भवति। तथ्यमिदं माघविरचिते शिशुपालवधे स्पष्टतया परिलक्ष्यते। कस्यचित् महाकाव्यस्य माध्यमेन सृष्टेः महत्तायाः बोधः यथा नायकस्य उदात्तचरित्ररूपे भवति तथैव सृष्टेः व्यापकतायाः ज्ञानमपि प्रकृतेः विविधदृश्यैः, पदार्थैः, ऐश्वर्यैश्च भवति। नायकस्य जीवनं प्रकृतेः शोभायामेव व्यतीतं भवति। अतः नायकजीवनस्य साङ्गोपाङ्गचित्रणार्थं काव्यग्रन्थेषु प्राकृतिकवर्णनस्य महती आवश्यकता भवति। एतान्येव प्राकृतिकवर्णनानि काव्यशास्त्रे प्रकृतिचित्रणमिति नाम्ना आख्यायन्ते। अथ च एतेषां वर्णनानां काव्यग्रन्थस्य वर्ण्यवस्तुना काव्यशैल्या च घनिष्ठः सम्बन्धो भवति। निखिले संस्कृतवाङ्मये महाकविमाघप्रणीतोऽयं

शिशुपालवधमहाकाव्यग्रन्थः स्वकीयप्रशस्य प्राकृतिकसौन्दर्यवर्णनस्य कृते भूयिष्ठां प्रतिष्ठां भजते। महाकविमाघस्य दृष्ट्या प्रकृतिपुरुषयोः उभयोरेव अस्मिन् जगति समानरूपेण जीवनशक्तिः सततं प्रवहति। अतः मानवीयभावनानां प्रकृतेश्च मध्ये व्यापकसहानुभूतिः विद्यते। महाकाव्ये वन-पर्वत-सर-सरिता-सागर-दिवस-रात्रीणाम् अथ च विविधानां ऋतूणां वर्णनं स्यात्। अत एव महाकाव्येऽस्मिन् प्रकृतेः विविधरूपाणां क्रियाकलापानाञ्च चित्रणे जीवनस्य महत्तायाः व्यापकस्वरूपं स्पष्टं भवति। महाकविना माघेन अत्र प्रकृतेः स्वतन्त्ररूपस्य चित्रणं कृतमस्ति। अस्मिन् महाकाव्ये पर्वतानां-वन्यजीवानां-षड्ऋतूनां-महौषधीनां, कमलिनीनां-नदीनां-रत्नादीनाञ्च वर्णनं कृत्वा महाकविना प्रकृतेः उद्दीपकस्वरूपं दर्शयन् प्रकृतिभावः स्पष्टीकृतः।

**रैवतकपर्वतवर्णनम्-**

महाकाव्ये पर्वतानां सौन्दर्यवर्णनं पाठकानां हृदयमाकर्षयति। रैवतकपर्वतवर्णनप्रसङ्गे माघेन स्वसम्पूर्णप्रकृतिसौन्दर्यसृष्टेः परिचयः दीयते। श्रीकृष्णस्तु मुहुर्मुहुः रैवतकं पश्यति तदा पर्वतोऽयं पुनः पुनः तमाकर्षयति। तयोहि प्रतिक्षणं यत् नवीनत्वं धारयति तदेव रमणीयस्वरूपं धारयति। कविः रैवतकपर्वतं सहस्रशिखरैः युक्तं सिध्यते। कविना रैवतकपर्वतमाध्यमेन सूर्यचन्द्रमसोः तथा आकाशपृथिव्योः अङ्कनं कृत्वा प्रकृतेर्महात्म्यं साध्यते। सार्धमेव एवं सुवर्णमयी-आकारेण सम्पन्नोऽयम् इत्युक्त्वा सामान्यजनानां समक्षे प्रकृतेः शृङ्गाराणां-पर्वतानां-वैशिष्ट्यं प्रदर्श्य तेषां संरक्षणस्य कामना अभिव्यक्ता कृता अस्ति। यथा-

**सहस्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य वितिष्ठमानम्।**
**विलोचनस्थानगतोष्णरश्मिर्निशाकरं साधु हिरण्यगर्भम्।।**[1]

प्रकृतिसौन्दर्यसंवर्धकस्य प्रकृतिसंरक्षणस्य प्रतीकस्य च रैवतकस्य विशालतायाः एवं चारुत्वस्य कमनीया छटा द्रष्टव्या खलु। यथा शिशुपालवधे वर्णितमस्ति-

---

1. शि.व.म.- 4.4

**आच्छादितायतदिगम्बरमुच्चकैर्गामा-**
**क्रम्य संस्थितमुदग्रविशालश‍ृङ्गम्।**
**मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेनमुद्वीक्ष्य**
**को भुवि न विस्मयते नगेशम्।।[1]**

माघः प्रकृतिपक्षे रैवतकपर्वते विकीर्णानां विविधवनलतानां वृक्षाणाम् औषधीनाञ्च उल्लेखं करोति। वनस्पतीन् लताश्च अभिलक्ष्य कविः प्रकृतिसौष्ठवं प्रस्तौति। यथा-

**वनस्पतिस्कन्धनिषण्णबालप्रबालहस्ताः प्रमदा इवात्र।**
**पुष्पेक्षणैर्लम्भितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः।।[2]**

कविः प्रकृतिसंरक्षणमभिलक्ष्य रज्जुवत् प्रसृतिभिः रश्मिभिः युक्तस्य सूर्योदयस्य चन्द्रस्य च अस्तंगतस्य वर्णने रैवतकपर्वतस्य अधो दिशि लम्बमानाभ्यां घण्टाभ्यां गजराजसदृशीं शोभां प्रापणात् कविः स्वयमेव "घण्टामाघः" इत्युपाधिना विभूषितः। प्रकृतिसंरक्षणार्थं संवर्धनार्थञ्च रैवतकपर्वतस्य उपस्थापनकारणात् महाकविः अखिले विश्वे ख्यातिं लब्धवान्।

**उदयति विततोर्ध्वरश्मिरज्जावहिम-**
**रुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टाद्वय-**
**परिवारितवारणेन्द्रलीलाम्।।[3]**

रमणीयेन्द्रनीलमणेः प्रभया नीलजलधारिव्याः नदीनां जलेन शोभां प्राप्य गङ्गायाः शोभां धारयति अर्थात् तीर्थराजप्रयागे गङ्गायमुनयोः सङ्गमसदृशं शोभायमानमस्ति। कविः नदीनां शुद्धत्वं पावनत्वञ्च दर्शयति यत् अस्य पर्वतस्य सौन्दर्यं भूयिष्ठं रमणीयं निर्माति।

**महौषधीनां वर्णनम्-**

अस्माकं वैदिकीपरम्परा कवीनां दृष्टिकोणञ्च इदमस्ति यत् वयं

1. शि.व.म.- 4.19
2. शि.व.म.-4.35
3. शि.व.म.-4.20

वनानां तथा जलस्रोतसंरक्षणार्थं संवर्धनार्थञ्च ध्यानं दध्म:। माघ: बहुमूल्यां औषधिम् दर्शयन् कथयति यत् रैवतकपर्वतेऽस्मिन् असंख्या: बहुमूल्या: उपयोगिन्यश्च औषधय: विद्यन्ते। एतादृश्य औषधय: रात्रिकाले भासमाना: प्रतीयन्ते। रैवतकपर्वते अमृतसंजीवनीव महौषधय: समुत्पद्यन्ते।

**आसादितस्य तमसा नियतेर्नियोगादा-**
**काङ्क्षतः पुनरपक्रमणेन कालम्।**
**पत्युस्त्विषामिह महौषधयः**
**कलत्रस्थानं परैरनभिभूतममूर्वहन्ति।।**[1]

अद्यापि पर्वतेषु अत्युपयोगिन्य औषधय: सन्ति परं विषादस्य विषयोऽयं यत् एतासामौषधीनां ज्ञातार: न्यूना एव सन्ति। अनया प्रकृत्या दुर्लभा: औषधय अपि एतादृशेषु पर्वतेषु उत्पद्यन्ते, परमेतासाम् औषधीनां महात्म्यस्य ज्ञातार: न सन्ति। पर्यावरणसंरक्षणस्य प्रतीकस्वरूपा: जीवनाधारिता इमा औषधय: प्राणिजगत: प्रतिपदमुपकुर्वन्ति। पक्षिणां कर्णप्रिय: कलरव: कदम्बवृक्षाणां सुगन्ध अथ च प्रवाहमानशीतलसुगन्धिपवनस्य महाकविमाघेन अतीव सौन्दर्येण उपदिष्टास्सन्ति–

**विहगाः कदम्बसुरभाविह गाः कलयन्त्यनुक्षणमनेकलयम्।**
**भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः।।**[2]

**ऋतुवर्णनम्–**

माघेन षड् ऋतव अतीवरमणीयतया वर्णिता: सन्ति। षष्ठ सर्गारम्भे एव षड्ऋतुभि: स्वकीयं कार्यसञ्चालनम् अथ च ऋतुनाम् आह्लादिकवर्णनं माघस्य पाण्डित्यमेव वर्धते–

**अथ रिरंसुममुं युगपद्गिरौ कृतयथास्वतरुप्रसवश्रिया।**
**ऋतुगणेन निषेवितुमादधे भुवि पदं विपदन्तकृतं सताम्।।**[3]

---

1. शि.व.म.–4.34
2. शि.व.म.–4.36
3. शि.व.म.–6.1

**वसन्तर्तुवर्णनम्-**

माघः षड्ऋतूणां वर्णनं क्रमशः करोति। सः सर्वप्रथमं वसन्तर्तुं वर्णयन् दिशति यत् श्वेतवर्णस्य कुरवकपुष्पेषु उपविष्टे सति भ्रमराणां शोभा शुभ्रवर्णाश्रयणात् भूयिष्ठं वर्धते अर्थात् श्वेतपुष्पेषु भ्रमराणां कालिमा उद्दीप्ता, तदा ते भ्रमराः श्रीकृष्णभगवत अङ्गनानां कृष्णपुत्तलिकासदृशं शोभन्ते यतोहि तासामङ्गनानां स्वच्छविस्तृतनेत्रयोः लघ्वीकृष्णवर्णीयापुत्तलिका शुभ्रवर्णैर्दीर्घयुक्तकुरवकपुष्पे उपविष्टानां कृष्णवर्णीयलघुभ्रमराणां सदृशमेव आसीत्।

**तुलयति स्म विलोचनतारकाः**
**कुरबकस्तबकव्यतिषङ्गिणि।**
**गुणवदाश्रयलब्धगुणोदये मलि-**
**निमालिनि माधवयोषिताम्।।**[1]

वसन्तर्तोः आगमने वृक्षेषु नवपल्लवाः लतासु च सुगन्धितानि पुष्पाणि विकसितानि। एतादृशे आकर्षके वासन्तीवातावरणे शीतलमन्दसुगन्धवायुः प्रयाति। अस्याम् ऋतौ प्रायः दिवसाः मनोहराः, सन्ध्याः सुखदाः, रमणीयाः मणिमेखलाः, चन्द्रमसः कुमुदिन्यः, मदमत्तरमणीनाम् आम्रवृक्षाणाञ्च सुन्दरप्राकृतिकवर्णनं माघेन उपस्थापितम्। माघः वसन्तर्तौ एव विकसितं चम्पापुष्पं रक्तपल्लवञ्च क्रमशः मदनाग्नि अथ च विदीर्णविरहीहृदयस्य मास अशोकस्य वर्णनम् अद्वितीयमस्ति।

**ग्रीष्मर्तोः वर्णनम्–**

ग्रीष्मर्तोः शिरीषपुष्पपरागकान्तिः सूर्याश्वानां हरितवर्णीयरोगाणां समानतां भजते। नवमल्लिकानां सुगन्धस्य चिरस्थायि कर्ता ग्रीष्मर्तुः समागतवान्। स्वध्वनिसम्पत्या मेघश्रेणिः उन्मते सति अनृत्यन्–

**जलदपङ्क्तिरनर्तयदुन्मदं**
**कलविलापिकलापिकदम्बकम्।**

1. शि.व.म.– 6.4

**कृतसमार्जनमर्दलमण्डलध्व-**
**निजया निजया स्वनसम्पदा।।**[1]

**वर्षर्तोः वर्णनम्-**

वर्षर्तोः आगमनेन चतुर्दिक्षु हरिता आभा वितन्यते। वसुन्धरेयं हरितवस्त्राणि धारयित्वा एवं प्रतीयते यत् हरितक्रान्तेः सन्देशं ददाति। वर्षर्तौ तडागाः पयपूरिताः भवन्ति। नद्यः ध्वनिं कुर्वत्यः वहन्ति, वृक्षाः वर्धन्ते। पशुपक्षिणाङ्कृते अयम् ऋतुः उत्तमः खलु। पर्वतेषु बहुमूल्या औषधयः उत्पद्यन्ते तथा च वन्यजीवानाम् अभिवृद्धिर्जायते। माघः वर्णयन् कथयति यत्- वर्षाकाले वायौ प्रवहति सति विरक्तोऽपि कः जनः न चञ्चलायते? प्रतीयते यत् भ्रमराणां सत्यवचनानि कथने सति नवपल्लवाः नृत्यन्ति।

**विगतरागगुणोऽपि जनो न**
**कश्चलति वाति पयोदनभस्वति।**
**अभिहितेऽलिभिरेवमिवोच्चकै-**
**रननृते ननृते नवपल्लवैः।।**[2]

**शरदर्तुवर्णनम्-**

वर्षर्तोः पश्चात् महाकविमाघः शरदर्तुं वर्णयति। शरदर्तौ पक्षिणां समूहस्य कलरवः कुमुदिनीभिः रात्र्यः मालतीपुष्पैः उपवनानि पुष्पभारेण नतैः वृक्षैश्च वनप्रदेशादयः उज्ज्वलाः सन्ति। मेघाः जलरहिताः अतः शुभ्राः दृश्यन्ते, नभः नीलवर्णीयं वर्तते। एवं शरदृतोः चन्द्ररश्मयः निर्मलाः सन्ति। मयूराः हंसाश्च ध्वनिं कुर्वन्ति। नीररक्षणे रताः गोपकन्याः मनोहराणि गीतानि प्रगाय ऋतोः स्वागतम् अकुर्वन्।

**विगतसस्यजिघत्समघट्टयत्कलमगोपवधूर्न मृगव्रजम्।**
**श्रुततदीरितकोमलगीतकध्वनिमिषेऽनिमिषेक्षणमग्रतः।।**[3]

---

1. शि.व.म.-6.31
2. शि.व.म.-6.39
3. शि.व.म.-6.49

**हेमन्तर्तोः वर्णनम्-**

हेमन्तर्तोः प्राकृतिकं सौन्दर्यं समृद्धं भवति। अस्याम् ऋतौ सरोवराणां शोभा सहसैव हृदयमाकर्षयति। तडागेषु नीलकमलानि सुशोभन्ते। सागराणां जलमपि स्वच्छं भवति। कविर्माघः कथयति यत् हेमन्तर्तोः आगमने सरोवराणामगाधं जलं स्थिरं भवति। यासु नदीषु गजोऽपि निमज्जति तामपि अगाधं नदीं हिममयीं कुर्वती इयं हेमन्तर्तुः विरहिणीनां सन्तापं वर्धयति।

**गजपतिद्वयसीरपि हैमनस्तुहिनयन् सरितः पृषतां पतिः।**
**सलिलसन्ततिमध्वगयोषितामतनुगतातनुतापकृतं दृशाम्।।**[1]

**शिशि-ऋतोः वर्णनम्-**

हेमन्तर्तोः वर्णनानन्तरं कविः शिशिरऋतोः माहात्म्यं प्रकटयन् कथयति यत् शिशिर-ऋतौ नीवाराः पक्वाः भवन्ति, क्रौञ्चपक्षिणाञ्च निनादः श्रूयते। काले प्रबले सति बलवन्त अपि असमर्थाः भवन्ति। कविना वर्णितं यत् शिशिर-ऋतौ माघमासे मन्दरश्मियुक्तः सूर्यः निस्तेजकारणात् हिमं विनष्टुं कदापि न प्रभवति। एतान् भावानधिकृत्य कविः अर्थगौरवमाध्यमेन स्ववचनानि उद्धरति-

**अभिषिषेणयिषुं भुवनानि यः**
**स्मरमिवाख्यत लोध्ररजश्चयः।**
**क्षुभितसैन्यपरागविपाण्डुरद्युतिरयं**
**तिरयन्नुदभूद्दिशः।।**[2]

**नदीनां वर्णनम्-**

माघकाव्ये प्रकृते अनुपमसौन्दर्यं दृश्यते। यत् रैवतकपर्वते प्रवाहमानाः नद्यः सागरेषु मिलितुं समतलभूमौ प्रवहन्ति तथा च पक्षिणः अत्र मधुरं कलरवः कुर्वन्ति। माघः नदीः रैवतकस्य पुत्रीरूपेण स्वीकुर्वन् कथयति यत् स्वयं रैवतकोऽपि पृथग्गम्यमानाभ्यः ताभ्यः नदीरूपिणीपुत्रिभ्यः रुदति। कविरत्र रैवतकपर्वतमाध्यमेन जलप्रदातृणां नदीनां वैशिष्ट्यं प्रदर्श्य

1. शि.व.म.-6.55
2. शि.व.म.-6.64

जलसंरक्षणार्थम् अथ च तां प्रत्यास्था प्रगाढत्वं, जलस्य शुचितायाश्च भावं प्रकटयति।

**अपशङ्कमङ्कपरिवर्तनोचिता-**
**श्चलिताः पुरः पतिमुपैतुमात्मजाः।**
**अनुरोदितीव करुणेन पत्रिणां**
**विरुतेन वत्सलतयैष निम्नगाः॥**[1]

**सूर्यास्तवर्णनम्-**

स्वतेजसमूहात् समुत्पन्नमतिशयतीव्रसन्तापं न सोढमानः सूर्यः पश्चिमदिशि विद्यमाने समुद्रजले पिपतिषया अस्तांचलसमारोढुं धावन्निव प्रतीयते। सूर्यावस्थायाः वर्णनमनेन पद्येन द्योत्यते-

**विरलातपच्छविरनुष्णवपुः परितो विपाण्डु दधदभ्रशिरः।**
**अभवद् गदतः परिणतिं शिथिलः परिमन्दसूर्यनयनो दिवसः॥**[2]

**चन्द्रोदयवर्णनम्-**

शुभ्रवर्णयुतया कुमुदिन्या व्याप्तोदयांचलात् निलीयमान अथ च शैनः शैनः विलासपूर्वकं कृतहाससदृशः चन्द्रोऽयं सुशोभते पूर्वदिशि। एतत् वर्णयितुं कविना एक श्लोकः प्रस्तूयते अत्र-

**विशदप्रभापरिगतं विबभावुदयाचलव्यवहितेन्दुवपुः।**
**मुखमप्रकाशदशनं शनकैः सविलासहासमिव शक्रदिशः॥**[3]

**प्रभातवर्णनम्-**

महाकाव्यपरम्परायामनुसरन् महाकविमाघ एकादशे सर्गे प्रभातवेलायाः हृदयावर्जकं मनोरमं वर्णनं प्रस्तौति। माघस्य प्रभातकालीनवर्णनं विस्तरेण सप्तषष्टितमे श्लोके अत्यधिकालङ्कृतशैल्या प्रस्तूयते। माघः वर्णयति यत् सर्वतः प्रभातवेलायां नीलोत्पलानि विकसन्ति येषु भ्रमराः गुञ्जन्ति

---

1. शि.व.म.-4.47
2. शि.व.म.-9.3
3. शि.व.म.-9.26

स्म। सर्वत्रैव शीतलमन्दसुगन्धितवायु वाति। चन्द्रमसः कान्तिरपि क्षीयते स्म। काव्यं रचयितुं माघः प्रातःकालं सर्वोत्तमं कथयति यत्-

**क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगानु-**
**दधिमहति राज्ये काव्यवद्दुर्विगाहे।**
**गहनमपररात्रप्राप्तबुद्धिप्रसादाः कवय**
**इव महीपतिश्चन्तयन्त्यर्थजातम्।।**[1]

**उपसंहार**- संस्कृतसाहित्यधारा वैदिककालादेव अवाधगत्या प्रवहति। प्रकृतिपुरुषयोः रागात्मकसम्बन्धोऽयं संस्कृतसाहित्ये संस्थापितं नात्र संशीतिलेशः। भारतीयचिन्तने प्रकृत्या सह घनिष्ठः सम्बधोऽयम् आदिकालादेव प्रतिष्ठितोऽस्ति। शिशुपालवधमहाकाव्येऽपि महाकविमाघेन प्राकृतिकचित्रणं स्वप्रतिभाकौशलेन विस्तरेण वर्णितमस्ति। कविरत्र नदी-पर्वत-सागर-षड् ऋतवः-जलविहारः-प्रभातः-सूर्योदयः-चन्द्रोदयेत्यादीनाम् आह्लादपूर्णवर्णनं करोति। वर्तमानकाले प्राकृतिकवस्तूनां वनानाम् उपवनानां नदीनां पर्वतादीनां संरक्षणं नितान्तावश्यकं वर्तते। यतोहि एतेषामभावे मनुष्यः भूयोभूयानां समस्यानां साक्षात्करोति। नदीनां, वनानां, सरोवराणां, वृक्षाणां, पुष्पाणां, पर्वतादीनाञ्च संरक्षणं कृत्वा मनुष्यं स्वकीयं जीवनं सफलं सार्थकञ्च सेद्धुं शक्नोति। संस्कृतसाहित्ये विद्यमानाः कथानकाः शिशुपालवधमहाकाव्ये वर्णितं प्राकृतिकचित्रणञ्च सन्देशमेव प्रेषयन्ति यत् सर्वेषां सुखाय, कल्याणाय, आरोग्याय, शान्त्यै च प्राकृतिकसम्पत्तेः संरक्षणमतीव आवश्यकमस्ति।

✦✦✦

---

1. शि.व.म.-11.6

# शिशुपालवधे सामाजिकमूल्यानां विवेचनम्

**डॉ. नरेन्द्रकुमारः**
पूर्वशोधछात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः नवदेहली–110016

"शिशुपालवध" महाकाव्यस्य नाम्ना ज्ञायते यत् शिशुपालस्य आतङ्कात् समस्तत्रिलोकस्य रक्षणमेवास्य काव्यस्य प्रमुखोद्देश्यमासीत्। महाकाव्यस्य मङ्गलाचरणे "जगत् शासितुम्" इति पदेन दुष्टानां निग्रहः एवञ्च लोक-कल्याणस्य मानवमूल्यस्य वर्णनं कृतमस्ति।

पुनः ब्रह्मणा प्रजाकल्याणाय वेदराशेः अक्षयनिधि भूतस्य स्वमानस-पुत्रदेवर्षिनारदस्य यत् सत्पात्रत्वं दानस्य च यत् महत्त्वं वर्तते तस्य वर्णनमपि प्राप्यते यथा हि–

**कृतः प्रजाक्षेमकृता प्रजासृता सुपात्रनिक्षेपनिराकुलात्मना।**
**सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसंपदामिव॥**[1]

**देवर्षिनारदस्य वचनमिदमप्यद्वितीयं यत्–**

**प्रवृत्त एव स्वयमुज्झितश्रमः**
**क्रमेण पेष्टुं भुवनद्विषामसि।**[2]

महाकाव्येऽस्मिन् लोककल्याणाय दिव्यशक्तीनां कर्त्तव्यत्वेन चित्रितमस्ति। श्रीकृष्णाय प्रेषितसन्देशमपि लोककल्याण भावनां परिभाषिता

1. शिशु. 1.28
2. तत्रैव 1.40

यथा हि-

**तदिन्द्रसंदिष्टमुपेन्द्र यद्वचः**
**क्षणं मया विश्वजनीनमुच्यते।**
**समस्तकार्येषु गतेन धुर्यता-**
**महिद्विषस्तद्भवता निशम्यताम्।।**[1]

शिशुपालस्य उपद्रवात् लोकत्रयविमुक्तये लोककल्याणशान्तिञ्च प्रतिष्ठापयितुं मानवमूल्यानां रूपैव न अपितु देवतानां परमकर्त्तव्येषु चित्रितमस्ति। "समस्तसरेणाऽसुरिति" अनेन मत्सर अर्थात् रागद्वेषेन युक्तः "असुरः" एवञ्च रागद्वेषादिभावेभ्यः रहितः मानवस्य संज्ञा प्रदत्ता। अत एव अस्य काव्यस्योद्देश्यं समग्रप्रपञ्चे लोककल्याणमेवं शान्तिं स्थापनार्थं स्वीकृतं मानवमूल्यानां पुनः स्मरणमेव। एवं प्रकारेण मङ्गलाचरणे दिव्यशक्तीनां मध्ये ब्रह्मणः नारदरूपेण श्रीहरेः श्रीकृष्णरूपेण एवञ्च शिवस्य आकाशरूपेण स्तवनं कृतमस्ति।

अतः प्रपञ्चमिदमातङ्कमुक्तभवितुं लोककल्याणाय एवं शान्तेः स्थापनार्थं दिव्यशक्तिः मानवदेहं धारयति तथ्योऽयं विष्णोः श्रीकृष्णत्वेन स्वरूपस्वीकरणेन सम्भवति।

सामाजिकमूल्यानि-तामसिकमनोवृत्तेः प्रतीकपुरुषरावणेन देवेन्द्रस्य स्वर्गनारीणामपहरणमेव ताः प्रति कामपुरुषाणां दूषितहिंसकश्च मनोवृत्तेः परिचायकोऽस्ति यथा हि-

**अभीक्ष्णमुष्णैरपि तस्य सोष्मणः,**
**सुरेन्द्रबन्दीश्वसितानिलैर्यथा।**
**सचन्दनाम्भः कणकोमलैस्तथा,**
**वपुर्जलार्द्रापवनैर्न निर्ववौ।।**[2]

भारतीयसमाजे नारीशक्तेः पुरुषार्थस्य च प्रदर्शनं विद्यतेऽत्र, तथ्योऽयं प्राप्यते यत्-

---

1. तत्रैव 1.41
2. शिशु. महा. 1.65

**त्वया विप्रकृतश्चैद्यो रुक्मिणी हरता हरे।**
**बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः॥**[1]

एवं प्रकारेण समाजे नारी पुरुषाणां मध्ये शत्रुतायाः केन्द्रबिन्दुः पुरुषाणां स्वदुर्बलमानसिकतायाः परिचायकोऽस्ति।

**4.1 शिक्षा-**

**गृहानुपैतुं प्रणयादभीप्सवो**
**भवन्ति नापुण्यकृतां मनीषिणः**[2]**।**

पुण्यात्मका, पुण्यात्मानां गृहैव प्रसन्नतामनुभवन्ति।

**गृहीतुमार्यान् परिचर्यया मुहूर्म-**
**हानुभावा हि नितान्तमर्थिनः।**[3]

सज्जनाः श्रेष्ठोत्तमव्यक्तिनां सेवार्थं सर्वदा अभिलषिताः भवन्ति।

**श्रेयसि केन तृप्यते।**[4]

कल्याणादि विषयेषु को वा सन्तुवरः? अर्थात् माङ्गलिकपदार्थानां प्रति तृषा सर्वदैव तिष्ठति।

**ऋते रवेः क्षालयितुं क्षमेत कः**
**क्षपातमस्काण्डमलीमसं नभः।**[5]

तिमिराच्छादितनभं क्षालयितुं सूर्यमतिरिच्य को वा शक्यः? अर्थात् सूर्यरेव तमविभेदकोऽस्ति।

**सतीव योषित्प्रकृतिः सुनिश्चला**
**पुमांसमभ्येति भवान्तरेष्वपि।**[6]

1. तत्रैव 2.38
2. शिशु. महा. 1.14
3. तत्रैव 1.17
4. तत्रैव 1.19
5. तत्रैव 1.38
6. तत्रैव 1.72

यथा पतिव्रता स्त्री जन्मान्तरे पूर्वजन्म न एव पतिमेव प्राप्नोति तथैव सुनिश्चला सुस्थिरा प्रकृतिरपि पूर्वपुरुषं प्राप्नोति।

**सदाभिमानैकधना हि मानिनः।**[1]

धनाढ्यजनानामेकमात्रमेवाभिमानः धनम्।

**निपातनीया हि सतामसाधवः।**[2]

दुर्जनाः सज्जनेभ्यः वध्याः भवन्ति।

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**[3]

हिताभिलाषीजनं वर्धमाणस्य शत्रोः उपेक्षा नैव कर्त्तव्या।

**ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि।**[4]

सारभूततत्त्वं ज्ञात्वाऽपि स्वकर्त्तव्यविषयेषु सन्देहयुक्तं कञ्चनं व्यक्तिं नितान्तं परामर्शस्य परमाश्वयकता भवति।

**महीयांसः प्रकृत्याः मितभाषिणः।**[5]

श्रेष्ठजनाः स्वप्रकृत्यैव अल्पभाषिणः भवन्ति।

**इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम्।**[6]

इन्धनराशिं जाज्वाल्यमानाग्निः सूर्य-तेजसः अतिक्रमणं नैव कर्तुमर्हति।

**तृप्तियोगः परेणापि महिम्ना न महात्मनाम्।**[7]

**सर्वः स्वार्थ समीहते।**[8]

समाजे सर्वेऽपि स्वार्थमिच्छन्ति।

---

1. शिशु. महा. 1.67
2. तत्रैव 2.73
3. तत्रैव 2.10
4. तत्रैव 2.12
5. तत्रैव 2.13
6. तत्रैव 2.23
7. तत्रैव 2.31
8. तत्रैव 2.65

**4.2 व्यावहारिकशिक्षा-**

**आरम्भन्तेऽल्पमेवाज्ञाः कामं व्यग्ना भवन्ति च।**
**महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः॥**[1]

अल्पप्रज्ञावन्तः अल्पमेव कार्यारम्भं कुर्वन्ति पुनः अत्यन्तं व्याकुलाः भवन्ति, अपरस्मिन् पक्षे बुद्धिमन्तः महत्कार्यं कुर्वन्ति पुनश्च निराकुलाः तिष्ठन्ति।

**मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते।**
**प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया॥**[2]

क्षमायुक्ततेजः बलविषयान् भोक्तुं तादृश एव समर्थः भवति यादृशः पात्रस्य तेलादिभ्यो वर्त्तिका तेलं स्वीकर्तुम्।

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।**[3]

विद्वान् शब्दार्थस्योपरि आश्रित सत्कविवत् भाग्यपुरुषार्थयोः आश्रयं स्वीकरोति।

**बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।**
**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥**[4]

क्षुद्रव्यक्तिः बृहत्सहायजनानां सहयोगेन स्वकार्यं साधयति यथा हि उपनद्याः महानदिभिः सम्भूयं सागरं प्राप्नोति।

**चिरादपि बलात्कारो बलिनः सिद्धयेऽरिषु।**
**छन्दानुवृत्तिदुःसाध्या सुहृदो विमनीकृताः॥**[5]

विलम्बने शत्रुपरि कृतप्रहारः बलयुक्तपुरुषाय सिद्धये कल्पयते। परञ्च विमना मित्रानानुकूलव्यवहारेणैव सन्तुष्टाः भवन्ति।

---

1. शिशु. महा. 2.79
2. तत्रैव 2.85
3. तत्रैव 2.86
4. तत्रैव. 2.100
5. शिशु. महा. 2.105

**उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः।**[1]

सम्पूर्णा व्यापि कार्याणि असफलानि भवन्ति अतः प्रमादः सर्वत्याज्यः।

**महात्मनोऽनुगृहन्ति भजमानान् रिपूनपि।**[2]

महात्मनाः शरणागतशत्रुणोपरि अपि अनुग्रहाः कुर्वन्ति।

**तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत्।**
**नोपतापि मनः सोष्म वागेका वाग्मिनः सतः॥**[3]

महापुरुषाणां बुद्धिः तीक्ष्णा भवति। कर्मप्रतापयुक्तः भवन्ति परञ्च शान्त अहिंसकः भवन्ति।

अभिमानिनां मनांसि अपरेषां समृद्धौ मात्स्र्यं युक्तः भवति।

**स्फुटमापदां पदमनात्मवेदिता।**[4]

स्वयपरुषं ज्ञात्वैव कार्यं कर्त्तव्यं मानवैः।

**स्मर्तुमधिगतगुणस्मरणाः पटवो न दोषमखिलं खलूत्तमाः।**[5]

श्रेष्ठजनाः समस्तदोषान् कदापि स्मरणं न कुर्वन्ति।

**तृप्तियोगः परेणापि महिम्ना न महात्मनाम्।**[6]

समृद्धिं प्राप्यमाणानां महात्मननां कदापि सन्तुष्टिं नैव सञ्जायते।

**सुकुमारमहो लघीयसां हृदयं तद्गतमप्रियं यतः।**
**सरसैव समृद्गिरन्त्यमी जरन्त्येव हि तन्मनीषिणः॥**[7]

क्षुद्रव्यक्तिनां हृदयमत्यन्तं लघु भवति। यतो हि एते हृदये स्थितः अप्रियान् शीघ्रमेव वहिर्निष्ठष्यन्ति।

---

1. तत्रैव 2.80
2. तत्रैव 2.104
3. तत्रैव 2.109
4. तत्रैव 15.22
5. तत्रैव 15.43
6. शिशु. महा. 2.31
7. तत्रैव 16.21

**उपकारपरः स्वभावतः सततं सर्वजनस्य सज्जनः।**
**असतामनिशं तथाप्यहो गुरुहृद्रोगकारी तदुन्नतिः।**[1]

सज्जनाः स्वभावेन सर्वदैव परेषां उपकारे तत्पराः भवन्ति। पुनश्च तेषां सज्जनानामुन्नतिः दुर्जनान् सर्वदैव सन्तप्तं करोति।

**परितप्यत एवं नोत्तमः परितप्तोऽप्यपरः सुसंवृतिः।**
**परवृद्धिभिराहितव्यथः स्फुटनिर्भिन्नदुराशयोऽधमः॥**[2]

अन्येषामुन्नतिं दृष्टा उत्तमजनाः सन्तप्ता भवन्ति एव परञ्च मध्यमवर्गाः सन्तप्तो भूत्वा तं स्पष्टरूपेण प्रकाशितं न कुर्वन्ति।

**अनहुङ्कुरुते घनध्वनिं न**
**हि गोमायुरुतानि केसरी।**[3]

पुनश्च–

**परितोषयिता न कश्चन्**
**स्वगतो यस्य गुणोऽस्ति देहिनः।**
**परदोषकथाभिरल्पकः स्वजनं**
**तोषयितुं किलेच्छति॥**[4]

अन्येषां परितोषयितुं स्वहस्ते यदि कश्चन् गुणो नास्ति तर्हि तादृशः जनान्येषां दोषकथने एव सन्तुष्टो जायते।

**नृपः–**

काव्येऽस्मिन् नृपाय आवश्यकमूल्यानां वर्णनं कृतमस्ति। यथा हि–

**बुद्धिशास्त्रः प्रकृत्यङ्गो धनसंवृत्तिकञ्चुकः।**
**चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः॥**[5]

नृपः बुद्धिरूपी शस्त्रज्ञ, प्रकृत्यङ्गसंयुक्तः गोपनीय रूपवान्, गुप्तचररूपी नेत्रयुक्तः एवञ्च शस्त्रोपेक्षया बुद्ध्या एव शत्रुवशी भवेत्।

---

1. तत्रैव 16.22
2. तत्रैव 16.23
3. तत्रैव 16.25
4. शिशु. महा. 16.28
5. तत्रैव 2.82

प्रकृतिर्यथा स्वामी, मन्त्री, मित्रं, कोषः, राष्ट्रं, दुर्गं, बलं, प्रजा इत्यादिनामङ्गानां समूहेन समन्वितः राजा सदैव शत्रुं वशीकुर्यात्। गुप्तचरैः राज्यस्य शत्रुराज्यस्य च वार्ता विज्ञाय नीत्योः निर्धारणीयाः। प्रतिवेशिरूपेण समुपस्थितैः देशैः साकं सामन्वितो राजा कुशलप्रशासकः लोकनायकश्च भवति। भाग्यपुरुषार्थयोः सम्यक् उपयोगः करणीयः।

**तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता।**
**सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः॥**[1]

इत्थं राष्ट्रस्योन्नत्यर्थं सुखसमृद्ध्यर्थञ्च राजनीतिज्ञैः व्यावहारिकनीतीनां परिज्ञानं करणीयम्।

### 4.3 विश्वकल्याणमयी भावना–

नारदमुनिना शिशुपालवधार्थं कृतः श्रीकृष्णं प्रति अनुरोधः विश्व–कल्याणभावनां दर्शयति। शिशुपालं हत्वैव विश्वस्मिन् विश्वे शान्तिः भवितुं शक्नोति। यथा–

**तदेनमुल्लङ्घितशासनं विधे–**
**र्विधेहि कीनाशनिकेतनातिथिम्।**
**शुभेतराचारविपक्त्रिमापदो**
**निपातनीया हि सतामसाधवः॥**[2]

इन्द्रद्वारा विश्वकल्याणभावनया प्रेषितं सन्देशं विज्ञाय श्रीकृष्णादयः सभामण्डले अग्निवत्सुशोभिता बभूवुः।

यथा–

**जाज्वल्यमाना जगतः शान्त्ये समुपेयुषी।**
**व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी॥**[3]

श्रीकृष्णस्य लोककल्याणयुक्तायाः भावनायाः दर्शनम्। यथा–

---

1. तत्रैव 2.88
2. शिशु. महा. 1.73
3. तत्रैव. 2.3

**न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति।**
**यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम्।।**[1]

### 4.4 धार्मिकमूल्यम्-

**यज्ञः**- महाकाव्येऽस्मिन् युधिष्ठिरद्वारा क्रियमाणस्य राजसूययज्ञस्य वर्णनमस्ति। श्रीकृष्णद्वारा अनुमतिं प्राप्य राजा युधिष्ठिरः विश्वजितयज्ञं प्रारब्धवान्।

यथा-

**आननेन शशिनः कलां दधद्दर्शनक्षयितकामविग्रहः।**
**आप्लुतः स विमलैर्जलैरभूदष्टमूर्तिधरमूर्तिरष्टमी।।**[2]

इत्यं यज्ञेऽस्मिन् भूलोकस्थानां समेषां राज्ञां मध्ये स्वोत्कृष्टतां प्राप्यर्थं नैकविधदेवानां वन्दनं क्रियते। कुशनिर्मितां मेखलं धारयन्ती यजमानपत्नी (द्रोपदी) हविष्यपदार्थैः युक्तं होमकर्ताचरति। देवानां आह्वानपूर्वकं तत्तद्देवानां कृते हविप्रदानस्य वर्णनं कृतमस्ति।

यथा-

**शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया।**
**याज्यया यजनकर्मिणोऽत्यजन्द्रव्यजातमपदिश्य देवताम्।।**[3]

देवाः यज्ञेऽस्मिन् हव्यपदार्थानां सेवनं कृत्वा अमरत्वं प्राप्तवन्तः। अन्ते च संकल्पजलेन सह दक्षिणाप्रदानस्य वर्णनमस्ति। इत्थं यज्ञस्य वर्णनं पूर्णतया औचित्ययुक्तं यज्ञः देवताप्रसादार्थं, स्वमनोकामनासिद्ध्यर्थं लोककल्याणार्थं, विश्वशान्त्यर्थञ्च अनिवार्यतः जीवनचर्यायां स्वीकृतमस्ति।

---

1. तत्रैव 2.11
2. शिशु. महा. 14.18
3. तत्रैव 14.20

**4.5 दानम्-**

दानमेका धार्मिकक्रियैव नापितु सामाजिक-दायित्वमस्ति। महाकाव्येस्मिन् राज्ञः युधिष्ठिरेण प्रदत्तस्य दानस्य वर्णनमस्ति। राजा युधिष्ठिरः धर्मतः उपार्जितधनस्य दानं सत्पात्रेभ्यः कर्तुमिच्छति।

यथा-

**स्वापतेयमधिगम्य धर्मतः**
**पर्यपालयमवीवृधं च यत्।**
**तीर्थगामि करवै विधानत-**
**स्तज्जुषस्व जुहुवानि चाऽनले।।**[1]

अनन्तरं राजा युधिष्ठिरेण प्रदत्तस्य दक्षिणादानस्यापि वर्णनमुपलब्धम्-भवति।

यथा-

**दक्षिणीयमवगम्य पंक्तिशः पङ्क्तिपावनस्य द्विजव्रजम्।**
**दक्षिणः क्षितिपतिर्व्यशिश्रणद्दक्षिणा सदसि राजसूयकीः।।**[2]

दानात्पूर्वं संकल्पजलप्रदानस्यापि वर्णनमुपलभ्यते-

**वारिपूर्वखिलासु सत्क्रियालब्धशुद्धिषु धनानि बीजवत्।**
**भावि विभ्रति फलं महद्द्विजक्षेत्रभूमिषु नराधिपोऽवपत्।।**[3]

ब्राह्मणेभ्यः भूमिदानस्य उल्लेखो वर्तते।

**4.6 परमतत्त्वम्-**

भगवान् श्रीकृष्णः हस्तिनापुरगमनसमये रैवतकपर्वतं कदाचिद् ब्रह्मरूपेण, कदाचित् शिवरूपेण, कदाचिच्च रुद्ररूपेण दृष्टवान्। यच्च महाकवेर्माघस्य परमतत्त्वविषयिक्याः आस्थायाः मान्यतायाञ्च संज्ञानं कारयति।

---

1. तत्रैव 14.9
2. शिशु. महा. 14.33
3. तत्रैव 14.34

यथा–

**सहस्त्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य वितिष्ठमानम्।**
**विलोचनस्थानगतोष्णरश्मिनिशाकरं साधु हिरण्यगर्भम्।।**[1]

अनन्तरञ्च–

**क्वचिज्जलापायविपाण्डुराणि धौतोत्तरीयप्रतिमच्छवीनि।**
**अभ्राणि बिभ्राणमुमाङ्गसङ्गविभक्तभस्मानमिव स्मरारिम्।।**[2]

कस्मिश्चित्पर्वतस्य स्थाने वृष्टिः भवति। तदा उत्तरीयान् इव मेघान् धृत्वा भगवान् शिवेव प्रतीयते रैवतकपर्वतः।

**स्कन्धाधिरूढोज्ज्वलनीलकण्ठानुर्वीरुहः श्लिष्टतनूनहीन्द्रैः।**
**प्रनर्तितानेकलताभुजाग्रान् रुद्राननेकानिव धारयन्तम्।।**[3]

इत्थं महाकविमाघः रैवतकपर्वतमुद्दिश्य समेषामपि देववरेण्यानां स्तवनं कृतवानस्ति।

**कवेः दार्शनिकदृष्टिः तस्याः जीवनोपयोगिता–**

देवर्षिनारदस्यागमनात् भगवान् श्रीकृष्णः आनन्दितोऽभवत्। भगवता कृष्णेन उक्तानि वचांसि कवेः दार्शनिकदृष्टिं परिलक्षयन्ति। यथा–

**हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।।**[4]

एतादृशमेव–

**जगत्यपर्याप्तसहस्त्रभानुना न यन्नियन्तुं समभावि भानुना।**
**प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः।।**[5]

---

1. तत्रैव 4.4
2. शिशु. महा. 4.5
3. तत्रैव 4.7
4. तत्रैव 1.26
5. तत्रैव 1.27

देवर्षिनारदः ज्ञानतपोनिधिः मन्यते, यथा सूर्यः, यथा जगतः अन्धकारं नाशयति तथैव नारदः आभ्यन्तरीयमज्ञानं पूर्णतया दूरीकरोति।

यथा–

**कृतः प्रजाक्षेमकृता प्रजासृजा**
**सुपात्रनिक्षेपनिराकुलत्मना।**
**सदोपयोगेऽपि गुरुत्वमक्षयो**
**निधिः श्रुतीनां धनसंपदामिव॥**[1]

ज्ञानेनैव लोकमङ्गलं भवितुं शक्नोति। मोक्षं प्राप्य जीवाः भगवति श्रीकृष्णे एव लीनाः भवन्ति। पितामहभीष्मः यथार्थज्ञानप्राप्त्यर्थं श्रीकृष्णं वन्दनीयपुरुषं संघोषयति। यथा–

**मर्त्यमात्रमवदीधरद्भवान्**
**मैनमानमितदैत्यदानवम्।**
**अंश एष जनताऽतिवर्तिनो**
**वेधसः प्रतिजनं कृतस्थितेः॥**[2]

## 4.7 राजनीतिकमूल्यम्–

श्रीकृष्णः "देवर्षिनारदस्य भूतलागमनं किमर्थमिति" ज्ञानार्थं देवर्षिनारदं प्रति पृच्छति–अनन्तरं देवर्षि नारदः विनम्रभावेन श्रीकृष्णं प्रति कथयति।

**प्रवृत्तैवस्वमुज्झितश्रमः क्रमेण पेष्टुं भुवनद्विषामपि।**[3]

अशुभाचरणे प्रवृत्ताः दुष्टजनाः सज्जनैः हन्तव्याः अतः भवान् ब्रह्मणा निर्मितस्य नियमास्योल्लघनं कुर्वतः शिशुपालस्य वधं करोति। एतादृशं शासनस्य उल्लघनं कुर्वतः जनान् दण्डः देयः इति राजीतिक-मूल्यस्योपस्थापनां करोति। भगवतः कृष्णस्य कथनमिदम्–

**भवद्गिरामवसरप्रदानाय वचांसि नः।**[4]

---

1. शिशु. महा. 1.28
2. तत्रैव 14.59
3. तत्रैव 1.40
4. तत्रैव 2.8

**ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि।।**[1]

परस्परं विरूद्धयोः द्वयोः कार्ययोः एकस्मिन्नेव समये आपतिते सति किं करणीयम्? किमकरणीयमिति विनिश्चयीकरणं राजनीतिकमूल्यमेवोपस्थापयति।

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**[2]

हिताभिलाषिणां जनेन वर्धमानस्य शत्रोः उपेक्षा न करणीयेति राजनीतिकमूल्ये आगच्छति।

**4.8 आचारत्मकं व्यवहारात्मकञ्च मूल्यम्-**

देवर्षिनारदः यदा भूमौ समागतवान् तदा भगवान् श्रीकृष्णः स्वासनादुत्थाय नारदस्य स्वागतं कृवान्।

यथा-

**पतत्पतङ्गप्रतिमस्तपोनिधिः**
**पुरोऽस्य यावन्न भुवि व्यलीयत।**
**गिरेस्तडित्वानिव तावदुच्च-**
**कैर्जवेन पीठादुदतिष्ठदच्युतः।।**[3]

श्रीकृष्णः अनेकेभ्यः तीर्थेभ्यः आनीतैः जलैः देवर्षिनारदस्य चरणौ प्रक्षालितवान् यथा-

**अशेषतीर्थोपहृताः कमण्डलो-**
**र्निधाय पाणावृषिणाऽभ्युरिताः।**
**अघौघविध्वंसविधौ पटीयसीर्नतेन**
**मूर्ध्ना हरिरग्रहीदपः।।**[4]

---

1. तत्रैव 2.12
2. तत्रैव 2.10
3. तत्रैव 1.12
4. तत्रैव 1.18

"अतिथेः आगमनान्तरं तस्य सेवा-शुश्रूषा च कीदृशी कर्त्तव्या" अस्मिन् विषये प्रसङ्गवशात् बहूनि मूल्यविषयकानि तथ्यानि अत्र समुपलभ्यन्ते। इत्थं महाकाव्येऽस्मिन् व्यवहारात्मकमूल्यानां वर्णनं सम्यक्तया कृतमस्ति।

**उपसंहारः—**

वैदिकसाहित्यादारभ्य लौकिकं संस्कृतसाहित्यपर्यन्तं महर्षीणां महाकविनां च साहित्यसर्जनस्य प्रमुखप्रयोजनं मानवमूल्यानां प्रतिष्ठा एवं लोककल्याणमेव आसीत्।

वैदिकसाहित्यं यत्र देवानां प्राकृतिकशक्तिनां च उपासनं कृत्वा विश्वकल्याणस्य कामना करोति। तत्रैव लौकिकसंस्कृतसाहित्यं लोककल्याणार्थम् आसुरि तामसिकशक्तिनाञ्च उपद्रवानां प्रतिकारं कृत्वा जगति शान्तिः सुरक्षाणाञ्च कृते प्रतिबद्धं प्रतीतं भवति।

"शिशुपालवधम्" महाकाव्ये श्रीकृष्णेन आतंकस्य पर्यायं शिशुपालस्य उपद्रवेभ्यः मोक्षं दत्वा लोककल्याणस्य प्रतिष्ठम् महाकविना द्वारा सामाजिकमूल्यस्य रूपे वर्णिताः वर्ण-व्यवस्था, पारिवारिकजीवनं, नारीणां दृष्ट्यादि वर्णनेभ्यः स्पष्टं स्यात् यत् मानवमूल्यान् व्यक्तिगतस्तरे सुदृढि कृत्वा अनन्तरं समाजेनं सह योजयित्वा सुदृढाधारं प्रदानं क्रियते।

धार्मिकमूल्यानां रूपे वर्णितं तपः, दानं, यज्ञादि अनुष्ठानेभ्यः स्पष्टं यत् मनुष्यान् लोककल्याणकारी कार्यार्थं प्रेरितवान्।

"राष्ट्रीयचेतना" इत्यस्य रूपे वर्णितं मूल्येभ्यः स्पष्टं यत् राष्ट्ररक्षां मानवस्य सर्वोपरि धर्मः तथा च तत्कालीनं राजव्यवस्थान्तर्गतं राज्ञस्य प्रमुखकर्तव्यः चित्रितमभवत्।

राजनैतिकमूल्यान्तर्गतं राजनीतिकस्थिरता एवं प्रशासने सुचारुव्यवस्थार्थं नैतिकमूल्याः अनिवार्याः स्यात्। तथा साम, दण्ड, भेदादि नीतिभ्यः शत्रुणामुपरि विजयप्राप्तिः राज्ञस्य प्रमुख कर्तव्यः अकथयत्।

आचारात्मकैवं व्यवहारात्मकमूल्यानां वर्णनात् सुस्पष्टमस्ति यत् मानवैः आचार-व्यवहाराणां च नैतिकमूल्येभ्यः एवं परिवारस्य समाजस्य विश्वस्य च कल्याणं सम्भवः स्यात्।

वासनारहितं प्रेमपरकमूल्यानां चित्रणेन स्पष्टम्भवति यत् व्यक्ति-निष्ठागुणमेव प्रेमस्य आधाराः भवन्ति।

अनेन प्रकारेण प्राणीमात्रं प्रति सहजनिस्वार्थं, प्रीतिमेव मानवः मानवात् योजयति। संक्षेपे निस्वार्थं प्रेम अपि मानवमूल्यानां रूपे द्रष्टव्यम्।

महाभारते वर्णितमुक्त्यानुसारम्-

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥**

अर्थात् विश्वेऽस्मिन् यदा-यदा धर्मस्य अवनति भवति तथा अधर्म-स्योन्नति भवति तदा-तदा अहावतारं धारयामि।

लोककल्याणस्य भावनामेव भगवतशंकरस्य उपासनामस्ति। शिवः किम्? देवाधिदेव, देवताः ऋषयः च तं देवाधिदेवः किमर्थं स्वीकुर्वन्ति। शिवत्वस्य करणेन, शिवत्वं किम्?

लोककल्याणस्य भावना, परोपकारः, परोत्कर्षः विश्वकल्याणस्य भावना अर्थात् यदि भवतां प्रयासाः परोपकारी स्युः निश्चयमेव देशस्य उत्थानं भवति। अर्थात् आत्मबलः तथा चारित्रिकसुदृढता शिवत्वभावनात् एव बलं प्राप्नोति। चतुर्दिकवातावरणं सात्विकं सुगन्धितं स्यात्, तदा भवान् आत्मात् आनन्दितं भवति। आत्मायाः आनन्दः भवताय देहे अनन्तमूर्जा उत्पादयति। इत्यनेन प्रकारेण मानवदेहः अनन्तम् ऊर्जाशक्तिनं भण्डारेण पूरितमस्ति। अधुना शरीरे आत्मायाः शिवमयं भवेयुः।

✦✦✦

# शिशुपालवधे छन्दोविवेचनम्

**डॉ. रिंकेशभूदला**

पूर्वशोधछात्रः, साहित्यविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रिय–

संस्कृतविश्वविद्यालयः, नवदेहली–110016

कविकुलदिवाकरस्य महाकवेः माघस्य ख्यातिः सम्पूर्णजगति तस्यैकस्याः रचनायाः शिशुपालवधादेव वर्त्तते। महाकाव्यमिदं संस्कृतमहाकाव्येषु प्रमुखं विशिष्टञ्च स्थानं भजति। संस्कृतजगति बृहत्त्रयी इति नाम्ना त्रीणि महाकाव्यानि किरातार्जुनीयम्, नैषधीयचरितम्, शिशुपालवधञ्च प्रसिद्धानि सन्ति। एषु शिशुपालवधमहाकाव्यस्य रचना महाकविमाघेन विहिता। महाकाव्यमिदं प्राचीनकालादेव कविसमाजे समादृतमस्ति। एकदा कश्चिद् वृद्धविद्वान् केनचिद् पृष्टः यत् कान् ग्रन्थान् अधीत्य भवान् एतादृशः बुद्धिमान् दूरदर्शी च अभवत्। वृद्धेनोत्तरितम्–

**"मेघे माघे गतं वयः।"**

अर्थात् कालिदासस्य मेघदूतस्य पठने तथा च माघकृतशिशुपालवधस्य पठने वृद्धः जातः।

महाकविमाघस्य पितुः नाम दत्तकः आसीत् यः परमोदारः वदान्यशून्य एवञ्च सर्वाश्रयदाता आसीत्। येन सः सर्वाश्रय इति नाम्ना अपि प्रसिद्धः। अस्य पितामहः सुप्रभेदवः श्रीवर्मलनृपस्य धर्मसचिवः आसीत्। श्रीवर्मलस्य विषये वसन्तगढनगरे एकः शिलालेखः प्राप्तः। शिलालेखोऽयं विक्रमसंवत् 682 तमे वर्षे लिखितः, तदनुसारेण माघस्य पितामहस्य सुप्रभेदवस्य काल 625 ई. तमे वर्षे स्वीकर्त्तुं शक्यते। अतः तस्य पौत्रस्य माघस्य कालः सप्तमशताब्द्याः अन्तिमभागः अथवा अष्टमशताब्द्याः प्रथमभागः स्वीकर्त्तुं

शक्यते। संस्कृतसाहित्ये महाकाव्यानां रचनया ख्यातिप्राप्तदशमहाकवीनां कालक्रमः श्लोकद्वयेन निर्दिष्टः-

**प्रथमं कालिदासः स्यादश्वघोषः ततः परम्।**
**भारविश्च तथा भट्टिः कुमारश्चापि पञ्चमः॥**

**माघरत्नाकरौ पश्चाद्धरिश्चन्द्रस्तथैव च।**
**कविराजश्च श्रीहर्षः प्रख्याताः कवयो दश॥**

प्रस्तुतस्य श्लोकस्याधारे कुमाररत्नाकरयोः मध्ये महाकविमाघस्य समयः सप्तमशताब्द्यामेव सिद्धयति।

शिशुपालवधस्य कथा महाभारतस्य सभापर्वणि 33 तः 45 पर्यन्तं त्रयोदशाध्यायेषु वर्णिता। श्रीमद्भागवते इयं कथा किञ्चिदल्परूपेण प्राप्यते। श्रीमद्भागवतस्य दशमस्कन्धस्य 74 तमे अध्याये इयं कथा उल्लिखिता। कथायामस्यां युधिष्ठिरेण राजसूययज्ञे कृष्णस्य अग्रपूजायां सत्यां शिशुपालेन कृष्णः अपमानितः। अन्ते श्रीकृष्णेन सुदर्शनचक्रेण शिशुपालस्य वधः कृतः। इयमेव कथा विस्तृतरूपेण महाकाव्येऽस्मिन् वर्णिताऽस्ति।

महाकवि-माघस्य एकमेव काव्यं शिशुपालवधं समुपलभ्यते। तेनैव काव्येन माघस्य ख्यातिः संस्कृतजगति प्रसृता। तस्य विषये एका उक्तिः प्रसिद्धा वर्तते-

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

संस्कृतकाव्यजगति त्रयः कवयः कालिदासः भारविः दण्डी च स्वस्य एकैकाय गुणाय प्रसिद्धाः सन्ति। कालिदासस्य उपमा, भारवेः अर्थगौरवं, दण्डिनश्च पदलालित्यं प्रसिद्धं वर्त्तते। किन्तु माघकाव्ये शिशुपालवधे एते त्रयो गुणाः एव प्राप्यन्ते।

काव्यं द्विविधं भवति दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यकाव्ये रूपकादयः समाविष्टाः सन्ति। श्रव्यकाव्यं त्रिविधं भवति-पद्यात्मकं गद्यात्मकं चम्पूकाव्यञ्च। पद्यात्मकं काव्यं पुनः त्रिविधं भवति-महाकाव्यं खण्डकाव्यं मुक्तकञ्चेति। पद्यकाव्यनिर्माणे छन्दः महतीं भूमिकां निर्वहति। पुराकाले

तु संस्कृतकवयः छन्दोहीनस्य काव्यस्य कल्पनामपि न कुर्वन्ति स्म। छन्दोमुक्ता पदावली एव गद्यं भवति। नाट्यशास्त्रे तु उक्तं यत् शब्दः छन्दश्च परस्परं सम्बद्धं वर्त्तते। छन्दसः हीनः न शब्दः, न च छन्दः शब्देन विना उपतिष्ठति।

**छन्दो हीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम्।**[1]

जयकीर्तिना छन्दोऽनुशासनम् इति छन्दःशास्त्रग्रन्थे उल्लिखितं यत् सम्पूर्णं वाङ्मयं छन्दोयुक्तमेव छन्दसा विना वाङ्मये किमपि नास्ति-

**छन्दोभाग्वाङ्मयं सर्वं न किञ्चित् छन्दसा विना।**[2]

'छन्द' इति शब्दः छदि संवरणे छद् संवरणे छद् अपवारणे छदि आह्लादने इत्यादिभ्यः धातुभ्यः निष्पद्यते। छन्दसां रचना वेदैः सहैव अभवत्। वेदाध्ययनाय छन्दसां ज्ञानमत्यावश्यकम्। वेदपुरुषस्य षडङ्गेषु छन्दः वेदस्य पादौ-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**

अस्मिन् परिगणने छन्दश्शास्त्रस्य प्रथमा चर्चा विहिता। पादाभ्यां सञ्चरणं भवति। पादौ एव शरीरभारमपि संवहति। छन्दसामध्ययनं विना वेदाध्ययनं सम्यक्तया कर्तुं न शक्यते। छन्दसां लयात्मकत्वं गेयत्वञ्च वैशिष्ट्यं विद्यते। यः संस्कृतं न जानाति श्लोकस्यार्थं वा न जानाति सोऽपि समुचितं काव्यपाठं श्रुत्वा प्रभवति। छन्दश्शास्त्रस्य आद्याचार्यः पिङ्गलमुनिः प्रसिद्धः। यद्यपि अस्य ग्रन्थे छन्दसूत्रे प्राचीनानेकानां छन्दश्शास्त्रकाराणां उल्लेखः समुपलभ्यते, तथापि 'यशः पुण्यैरवाप्यते' इत्युक्त्यनुसारेण पिङ्गलमुनिः एव अस्य शास्त्रस्य प्रणेता स्वीक्रियते। वृत्तरत्नाकरस्य भूमिकायामपि उल्लिखितम्-

1. नाट्यशास्त्रम् 15.40
2. छन्दोऽनुशासनम् 1.2

**पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।**[1]

पिङ्गलमुनेः छन्दश्शास्त्रे एतादृशः अधिकारः आसीत् येन पिङ्गलः छन्दश्च पर्यायः अभवत्। पिङ्गल इति शब्दस्यार्थः सर्पः भवति। अतः अनेके विद्वांसः नागराजादिभिः नामभिः इमं सम्बोधितवन्तः। प्राचीनसूत्रप्रथायाः अनुसारेण ग्रन्थोऽयं पिङ्गलमुनिना सूत्रैः लिखितः। अतएव अयं ग्रन्थः पिङ्गलसूत्रमिति नाम्ना अपि प्रसिद्धः। छन्दस्सु गुरु-लघु विचारोऽपि करणीयः। लघुवर्णः '।' इति चिह्नेन तथा च गुरुवर्णः 'ऽ' इति चिह्नेन प्रदर्श्यते। सर्वे ह्रस्वस्वराः लघु तथा च दीर्घस्वराः विसर्गेणानुस्वारेण युक्तं एवञ्च संयुक्तव्यञ्जनं गुरु कथ्यते। पादस्यान्तिमं लघु स्वरः आवश्यकतानुसारेण गुरु स्वीक्रियते-

**सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।**
**वा पदान्ते त्वसौ ग्वक्रौ ज्ञेयोऽन्यो मात्रिको लृजुः॥**[2]

पद्ये पठति पादे पादान्ते वा विरामं यतिः कथ्यते। ग्रन्थेऽस्मिन् मुख्यरूपेण छन्दः द्विविधं उल्लिखितम्। वैदिकच्छन्दः लौकिकच्छन्दश्च। पिङ्गलसूत्रे 119 वैदिकछन्दसां वर्णनं विहितम् पुनः लौकिकच्छन्दः मात्रिकं वार्णिकं भेदेन द्विविधं भवति-

**पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।**
**मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते॥**[3]

मात्रिकच्छन्दस्सु प्रत्येकं पादस्य मात्राः परिगण्यते। छन्दःपरिचयार्थं गणाः प्रमुखां भूमिकां निर्वहन्ति। मात्रिकच्छन्दस्सु चतुर्मात्रिकाः पञ्चगणाः प्रसिद्धाः। लघुवर्णस्य एका एवञ्च गुरुवर्णस्य द्वे मात्रे गण्येते। तेषां नामानि चिह्नञ्च-मगणः (सर्वगुरु) ऽऽ, नगणः (सर्वलघुः) ।।।।, भगणः (आदिगुरुः) ऽ।।, जगणः (मध्यगुरुः) ।ऽ। सगणः (अन्तगुरुः) ।।ऽ।

1. वृत्तरत्नाकरः 1.4
2. वृत्तरत्नाकरः 1.9
3. वृत्तरत्नाकरः 1.4

**ज्ञेयाः सर्वान्तमध्यादिगुरुवोऽत्र चतुष्कलाः।**
**गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः॥**[1]

वार्णिकच्छन्दस्सु वर्णानां गणना क्रियते। वार्णिकछन्दस्सु अष्टगणाः भवन्ति। एकस्मिन् गणे त्रयः वर्णाः विद्यन्ते। ते-

यगणः ।ऽऽ, रगणः ऽ।ऽ, तगणः ऽऽ।, भगणः ऽ।।, जगणः ।ऽ।, सगणः ।।ऽ, मगणः ऽऽऽ, नगणः ।।। ।

**आदिमध्यावसानेषु य-र-ला यान्ति लाघवम्।**
**भ-ज-सा गौरवं यान्ति मनौ तु गुरुलाघवम्॥**

अनेन सूत्रेणापि गणानां ज्ञानं सुष्ठुः रूपेण कर्त्तुं शक्यते-

**यमाताराजभानसलगम्।**

सूत्रेऽस्मिन् अष्ट गणाः गुरुलघौ च उल्लिखितौ। यस्य गणस्य गणना करणीया तस्य गणस्य अक्षरेण सह अग्रतः द्वौ वर्णौ अपि नयेत्। यथा ते वर्णाः तथैव अवगच्छेत्।

छन्दसः भेदत्रयं भवति-समवृत्तम् अर्धसमवृत्तं विषमवृत्तञ्च। श्लोकैकस्मिन् चत्वारः पादाः चरणानि वा विद्यन्ते। समवृत्ते चतुर्षु चरणेषु वर्णानां संख्या समा भवति। यथा- वसन्ततिलका, शिखरिणीत्यादयः। अर्धेसमवृत्ते प्रथमतृतीययोः तथा च द्वितीयचतुर्थयोः चरणयोः समानवर्णाः विद्यन्ते। यथा- वियोगिनी, पुष्पिताग्रा इत्यादयः। विषमवृत्ते प्रत्येकस्मिन् चरणे वर्णानां संख्या विषमा वर्त्तते। यथा उद्गाता, गाथा इत्यादयः।

शिशुपालवधे विंशति सर्गाः सन्ति। तत्र प्रथमसर्गे नारदः द्वारिका-पुरीमागत्य श्रीकृष्णाय शिशुपालवधार्थमिन्द्रस्य सन्देशं प्रापयतीति वर्णितम्। अस्मिन् सर्गे त्रीणि वृत्तानि प्रयुक्तानि माघेन। वंशस्थं 1 तः 73 श्लोकपर्यन्तं, पुष्पिताग्रा 74 तमे श्लोके, शार्दूलविक्रीडितं 75 तमे श्लोके विद्यते।

शिशुपालवधे विंशतिसर्गाः सन्ति। तत्र प्रथमसर्गे नारदः द्वारिका-पुरीमागत्य श्रीकृष्णाय शिशुपालवधार्थमिन्द्रस्य सन्देशं प्रापयतीति वर्णितम्।

1. वृत्तरत्नाकरः 1.8

अस्मिन् सर्गे त्रीणि वृत्तानि प्रयुक्तानि माघेन। वंशस्थं 1 तः 73 श्लोकपर्यन्तं, पुष्पिताग्रा 74 तमे श्लोके, शार्दूलविक्रीडितं 75 तमे श्लोके विद्यते।

द्वितीयसर्गे श्रीकृष्णस्योद्धवबलरामाभ्यां साकं मन्त्रणायाः वर्णनं विहितम्। अत्र चत्त्वारि वृत्तानि प्रयुक्तानि। प्रमुखतया अनुष्टुप्वृत्तस्य प्रयोगः विहितः। अनुष्टुप्वृत्तं 1 तः 115 श्लोकपर्यन्तं, औपच्छन्दसिकं 116 तमे श्लोके, द्रुतविलम्बितं 117 तमे श्लोके, मलिनी च 118 तमे श्लोके वर्त्तते।

तृतीये सर्गे द्वारिकापुरीतः श्रीकृष्णस्य प्रस्थानं तथा च द्वारिकापुर्याः समुद्रस्य च वर्णनं वृत्तद्वयेन विहितम्। अत्र उपजातिवृत्तं प्रमुखत्वेन विद्यते। इन्द्रोपेन्द्रवज्रावृत्तयोः योगेनोपजातिवृत्तम्। उपजातिवृत्तं 1 तः 81 श्लोकपर्यन्तं, पञ्चकावली (धृतश्री) च 82 तमे श्लोके स्तः।

चतुर्थसर्गे रैवतकपर्वतस्य वर्णने त्रयोविंशतिः छन्दांसि प्रयुक्तानि कविना। तत्र उपजातिः 1 तः 18, 35, 63 श्लोकेषु, वसन्ततिलका 19,22,25,28,31,34,37,40,43,46,49,52,55,58,61,64 श्लोकेषु, पुष्पिताग्रा 20,29,50,56 श्लोकेषु, द्रुतविलम्बितं 21,32,60 श्लोकेषु, शालिनी 23 तमे श्लोके, पथ्या 24 तमे श्लोके, प्रहर्षिणी 26,38,53,59 तमेषु श्लोकेषु, उपेन्द्रवज्रो 27,39 तमयोः श्लोकयोः, जलधरमाला 30 तमे श्लोके, वंशस्थं 33 तमे श्लोके, प्रमिताक्षरा, कुररीरुता 41 तमे श्लोके, स्रग्विणी 42 तमे श्लोके, मत्तमयूरं 44 तमे श्लोके, दोधकं 45 तमे श्लोके, मञ्जुभाषिणी 47 तमे श्लोके, आर्यागीतिः 48,51 तमयोः श्लोकयोः, जलोद्धतगतिः 54 तमे श्लोके, रथोद्धता 57 तमे श्लोके, भ्रमरविलसितं 62 तमे श्लोके, मालिनी 65,68 तमयोः श्लोकयोः, पृथ्वी 66 तमे श्लोके, वंशपत्रपतितञ्च 67 तमे श्लोके विद्यन्ते।

पञ्चमे सर्गे रैवतकपर्वतं विहर्त्तुं सेनायाः प्रस्थानस्य तत्र निवासस्य च वर्णनं वसन्ततिलका नाम्नि छन्दसि वर्त्तते। वृत्तमिदं 1 तः 68 श्लोकपर्यन्तं एवञ्च 69 तमे श्लोके शिखरिणीवृत्तं वर्त्तते।

षष्ठसर्गे षण्णामृतूनां वर्णनं द्रुतविलम्बितच्छन्दसा 1 तः 66,78 श्लोकेषु, प्रभाछन्दसा 67 तमे श्लोके, स्वागताछन्दसा 68 तमे श्लोके, उपजातिच्छन्दसा 69,74 तमयोः श्लोकयोः, औपच्छन्दसिकच्छन्दसा 70,72,75

तमेषु श्लोकेषु, तोटकच्छन्दसा 71 तमे श्लोके, कुटजाछन्दसा 73 तमे श्लोके, मत्तमयूरच्छन्दसा 76 तमे श्लोके, वसन्ततिलकाछन्दसा च 77, 79 तमयोः श्लोकयोः उद्धृतम्।

सप्तमसर्गे वनविहारवर्णनं त्रिभिः छन्दोभिः वर्णितम्। तत्र 1 तः 73 श्लोकपर्यन्तं पुष्पिताग्रा, 74 तमे श्लोके मन्दाक्रान्ता, 75 तमे च श्लोके मालिनीवृत्तं वर्त्तते।

अष्टमसर्गे जलविहारवर्णने प्रमुखत्वेन वर्णसमातिजगतीवृत्तस्य प्रभेदस्य प्रहर्षिणीवृत्तस्य प्रयोगः कृतः। छन्दरिदं 1 तः 70 श्लाकपर्यन्तं तथा च 71 तमे श्लोके अतिशायिनीवृत्तं वर्त्तते।

नवमसर्गे सूर्यास्तकालस्य वर्णनं पञ्चच्छन्दस्सु विहितम्। तत्र प्रमिताक्षरा 1 तः 82 श्लोकपर्यन्तं, औपच्छन्दसिकं 83,85 तमयोः श्लोकयोः, प्रहर्षिणी 84 तमे श्लोके, वंशस्थं 86 तमे श्लोके, मन्दाक्रान्ता च 87 तमे श्लोके विद्यते।

दशमसर्गे मद्यपानवर्णनं सवागतावृत्तेन मालिनीवृत्तेन च वर्णितम्। तत्र स्वागताछन्दः 1 तः 90 श्लोके स्तः।

एकादशसर्गे प्रभातवर्णनं अतिशक्वरीप्रभेदेन मालिनीवृत्तेन कृतम्। मालिनीवृत्तं 1 तः 66 श्लोकपर्यन्तं अन्ते च 67 श्लोके महामालिकावृत्तं विद्यते।

द्वादशसर्गे श्रीकृष्णसेनायाः हस्तिनापुरीं प्रति प्रस्थानस्य वर्णनं छन्दद्वयेन उद्धृतम्। 1 तः 76 श्लोकेषु इन्द्रवंशावृत्तं तथा च 77 तमे श्लोके हरिणीवृत्तं वर्त्तते।

त्रयोदशसर्गे श्रीकृष्णस्य हस्तिनापुरप्राप्तिः युधिष्ठिरेण श्रीकृष्णस्य स्वागतं तथा च सभायाः वर्णनं वर्त्तते। तत्र 1 तः 68 श्लोकपर्यन्तं मञ्जुभाषिणी एवञ्च 69 तमे श्लोके रमणीयकवृत्तं विद्यते।

चतुर्दशसर्गे युधिष्ठिरेण सम्पादितस्य राजसूययज्ञस्य वर्णनं चतुर्भिः छन्दोभिः विहितम्। 1 तः 85 श्लोकपर्यन्तं रथोद्धतावृत्तं, 86 तमे श्लोके

इन्द्रवज्रावृत्तं, 87 तमे श्लोके वसन्ततिलकावृत्तं तथा च 88तमे श्लोके प्रहर्षिणीवृत्तं वर्त्तते।

पञ्चदशसर्गे वर्णविषमवृत्तस्य प्रभेदमुद्गता नामच्छन्दः प्रमुखत्वेन विद्यते। उद्गताछन्दः 1 तः 94 श्लोकपर्यन्तं, इन्द्रवंशा 95तमे श्लोके स्रग्धरा च 96तमे श्लोके अस्ति। अत्र शिशुपालकृता कृष्णनिन्दा वर्णिता।

षोडशसर्गे शिशुपालदूत-सात्यक्योः उक्ति-प्रत्युक्ती षट्सु छन्दस्सु वर्णिता। अत्र मुख्यत्वेन वैतालीयनाम्नः अर्धसममात्रिकवृत्तमास्ति। छन्दरिदं 1 तः 80 श्लोकपर्यन्तं, इन्द्रवज्रा 81 तमे श्लोके, प्रहर्षिणी 82 तमे श्लोके, शालिनी 83 तमे श्लोके, शार्दूलविक्रीडितं 84तमे श्लोके, औपच्छन्दसिकञ्च 85तमे श्लोके विद्यते।

सप्तदशसर्गे श्रीकृष्णपक्षीयाणां राज्ञां युद्धप्रस्तुतिः वृत्तद्वयेन वर्णिता। 1 तः 68 श्लोकपर्यन्तं रुचिरावृत्तं तथा च 69तमे श्लोके शार्दूलविक्रीडितवृत्तं वर्त्तते।

अष्टादशसर्गे शिशुपालसेना-यादवसेनयोः युद्धं वर्णितम्। तत्र 1तः 79 पर्यन्तं शालिनीवृत्तं तथा च 80तमे श्लोवेष्ठ मन्दाक्रान्तावृत्तं विद्यते।

एकोनविंशसर्गे प्रमुखयोद्धृणां परस्परं युद्धं वर्णितम्। अत्र अनुष्टुप्वृत्तं 1 तः 117 श्लोकपर्यन्तं, उपेन्द्रवज्रा 118तमे श्लोके, वैश्वदेवी 119तमे श्लोके शार्दूलविक्रीडितञ्च 120तमे श्लोके वर्त्तते।

विंशतिसर्गे श्रीकृष्णशिशुपालयोः युद्धस्य वर्णनं श्रीकृष्णद्वारा च शिशुपालस्य वधः वर्णितः। तत्र औपच्छिन्दिसिकं 1 तः 75 श्लोकपर्यन्तं, मालिनी 76तमे श्लोके, वसन्ततिलका 77तमे श्लोके, शार्दूलविक्रीडितं 78तमे श्लोके, शिखरिणी च 79तमे श्लोके विद्यते।

बृहत्त्रयी इति नाम्नः प्रसिद्धेषु त्रिषु महाकाव्येषु सर्वाधिकानां छन्दसां प्रयोगः महाकविमाघेन विहितः। भारविना किरातार्जुनीये महाकाव्ये अष्टांविशतिः वृत्तानि प्रयुक्तानि। तत्रापि चत्त्वारः सर्गाः वंशस्थवृत्तेन त्रयः सर्गाश्च उपजातिवृत्तेनोपनिबद्धाः सन्ति। श्रीहर्षेण स्वकीये नैषधीयचरितमहाकाव्ये एकोविंशतिः छन्दान्सि प्रयुक्तानि। तत्रापि सप्त सर्गाः उपजातिवृत्तेन, पञ्चसर्गाश्च वंशस्थवृत्तेन निबद्धाः। अनेन एवं प्रतीयते यत् भारवेः

श्रीहर्षस्य च वंशस्थोपजातिच्छन्दसोः अधिका रुचिः आसीत्। अथवा तौ छन्दोद्वयलेखने एव विशेषरूपेण सिद्धहस्तौ आस्ताम्। किन्तु माघेव विंशतिसर्गात्मके महाकाव्ये प्रत्येकस्मिन् सर्गे भिन्नवृत्तेन वर्णनमुद्धृतम्। केवलं द्वितीये नवदशे च सर्गयोः प्रमुखच्छन्दरूपेण अनुष्टुप्वृत्तस्य प्रयोगः विहितः। तत्र नवदश सर्गे तु एकाक्षरश्लोकस्य एकाक्षरपादस्य द्व्यक्षर-पादस्यानेकानाञ्च चित्रालङ्काराणां प्रयोगः कृतः। चतुर्थसर्गे सर्वाधिकानि वृत्तानि प्रयुक्तानि। वृत्तानां प्रयोगः उचितस्थाने भवितव्यः। निर्दुष्टानां गुणयुक्तानां सुवृत्तानामुचितस्थाने काव्यं छिद्रादिदोषरहितमुक्ताहारमिव शोभते। तदुक्तं क्षेमेन्द्राचार्येण-

**प्रबन्धः सुतरां भाति यथास्थानं निवेशितैः।**
**निर्दोषैर्गुणसंयुक्तैः सुवृत्तैर्मौक्तिकैरिव॥**[1]

क्षेमेन्द्राचार्येण सम्पूर्णं काव्यजगत् चतुर्धा विभक्तम्। काव्यं शास्त्रं काव्यशास्त्रं शास्त्रकाव्यञ्च। काव्यस्य सर्वेषां तत्त्वानां विवेचनं शास्त्रे क्रियते। अलङ्कारयुक्तं विशिष्टशब्दार्थयुक्तञ्च काव्यं भवति। चतुर्वर्गप्राप्त्युपदेशं शास्त्रकाव्यं प्रतिपादयति। तथा च व्याकरणादीनां विषयाणां ज्ञानार्थं काव्यशास्त्रं भवति। सामान्यतः शास्त्रं काव्यशास्त्रं शास्त्रकाव्यञ्च सम्पादनाय अनुष्टुप्वृत्तमेव क्षेमेन्द्राचार्येणोक्तम्। किन्तु काव्ये वृत्तानां प्रयोगाय क्षेमेन्द्राचार्यो विशिष्टमाह-

**काव्ये रसानुसारेण वर्णनानुगुणेन च।**
**कुर्वीत सर्ववृत्तानां विनियोगः विभागवित्॥**[2]

अर्थात् काव्ये श्रृङ्गारादिरसानुरूपेण तथा च वर्ण्यविषयानुसारेण छन्दसां प्रयोगः करणीयः। यद्यपि काव्येषु छन्दःप्रयोगः काव्यधीनः भवति, कविः स्वेच्छानुसारेण काव्ये वृत्तनिवेशं करोति। तथापि श्रृङ्गारादिरसानुरूपेण वर्ण्यविषयानुसारेण च वृत्तप्रयोगेण काव्यं स्वतः सहृदयग्राहि भवति। सुकवेः अनेकवृत्तानां नियमानुकूलप्रयोगेण काव्यं रुचिरत्त्वमाह्लादकत्वञ्च विदधाति। तदुक्तं क्षेमेन्द्राचार्येण-

---

1. सुवृत्ततिलकम् 3.1
2. सुवृत्ततिलकम् 3.7

**नानावृत्तविशेषास्तु कवेः शस्तस्य शासनात्।**
**यान्ति प्रभोरिवात्यन्तमयोग्या अपि योग्यताम्॥**[1]

अवस्थानुरूपेणोचितपदावल्याः प्रयोगेण कविप्रबन्धः, उचिताचरणेन धन्यवादार्हः सज्जन इव शोभते। इत्यपरः गुणः उचितच्छन्दःप्रयोगस्य। उक्तमपि क्षेमेन्द्रेण–

**तथाप्यवस्थासदृशैः साधुशब्दपदस्थिताः।**
**सुवृत्तैरेव शोभन्ते प्रबन्धाः सज्जना इव॥**[2]

यथा काचित् युवती गलप्रदेशे कटिसूत्रधारणेन न शोभते। तथैव वृत्तानामनौचित्यं काव्येषु प्रतीयते। तदुक्तं क्षेमेन्द्रेण–

**वृत्तरत्नावलीं कामादस्थाने विनिवेशिता।**
**कथयत्यज्ञतामेव मेखलेव गले कृता॥**[3]

शिशुपालवधमितिमहाकाव्यस्य प्रथमसर्गः वंशस्थवृत्तेनोपनिबद्धः। किरातार्जुनीयनैधीयचरितमहाकाव्ययोः अपि प्रथमसर्गः वंशस्थवृत्तेनोल्लिखितः। महाकाव्यस्य लक्षणानुसारेण महाकाव्यस्य एकस्मिन् सर्गे एकवृत्तेनैव वर्णनमुपस्थापनीयमन्ते च भिन्नं वृत्तं स्यात्–

**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।**[4]

क्षेमेन्द्राभिमतानुसारेणैव द्वितीयसर्गे अनुष्टप्वृत्तस्य प्रयोगः विहितः। एवञ्च पञ्चमसर्गे श्रीकृष्णसेनाया रैवतकपर्वतं प्रति प्रस्थानस्य निवासस्य च वर्णने विशेषतः वीररस्य कुत्रचित् रौद्ररसस्य चोपस्थापनं वसन्ततिलका-वृत्तेनोपनिबद्धम्। तदुक्तं क्षेमेन्द्रेण–

**वसन्ततिलकं भाति सङ्करे वीररौद्रयोः।**
**कुर्यात्सर्गस्य पर्यन्ते मालिनीं द्रुततालवत्॥**[5]

---

1. सुवृत्ततिलकम् 3.10
2. सुवृत्ततिलकम् 3.12
3. सुवृत्ततिलकम् 3.13
4. सा.द. 6.320
5. सुवृत्ततिलकम् 3.19

बृहत्त्रय्यां त्रिषु महाकाव्येषु सर्गान्ते मालिनीवृत्तस्य अधिकतया प्रयोगः कृतः। माघकाव्येऽपि षट्सु सर्गेषु मालिन्यान्तं वर्त्तते। चतुर्दशसर्गः रथोद्धतावृत्तेनोपनिबद्धः। रथोद्धतावृत्तस्य प्रयोगौचित्यं प्रदर्शमानः क्षेमेन्द्रः कथयति–

**रथोद्धता विभावेषु भव्या चन्द्रोदयादिषु।**
**षाड्गुण्यप्रगुणानीतिर्वंशस्थेन विराजते।।**[1]

चतुर्दशसर्गे राजसूययज्ञस्य वर्णने उद्दीपनविभावानां प्रचुरत्वेन प्रयोगः विहितः। एतेषां विभावानां रथोद्धतावृत्तेन प्रयोगः रुचिरत्वं प्रतिपादयति। यथा–

**लोलहेतिरसनाशतप्रभामण्डलेन लसता हसन्निव।**
**प्राज्यमाज्यमसकृद्वषट्कृतं निर्मलीमसमलीढ पावकः।।**[2]

एवं शिशुपालवधे प्रयुक्तानां वृत्तानां नामोल्लेखपूर्वकं केषाञ्चन वृत्तानामौचित्यमत्र प्रदर्शितम्। माघेन महाकाव्येऽस्मिन् त्रिचत्वारिंशत् वृत्तानि प्रयुक्तानि। यानि किरातनैषधीयाभ्यामधिकानि सन्ति। चतुर्थसर्गे एव त्रयोंशितिवृत्तानां समावेशः कविना कृतः। यः नैषधीये प्रयुक्तेभ्यः वृत्तेभ्यः अधिकः वर्त्तते। महाकाव्यस्याध्ययनेनैवं प्रतीयते यत् कविः वृत्तोपस्थापने स्वतन्त्रः भवति। यः कविः यस्मिन् वृत्ते पटुः, सः ततेनैव वृत्तेन विषय-मुपस्थापयति। भारविश्रीहर्षाभ्यामपि स्वकीययोः महाकाव्ययोः उपजाति-वंशस्थवृत्तयोः अधिकरूपेण प्रयोगः कृतः। पाणिनिना तु जाम्बवतीविजयमिति महाकाव्यमुपजातिवृत्तेनैवोल्लिखितम्। येनानुमीयते काव्येषु वृत्तविधानं कव्यधीनमेव। एतदेवाप्युक्तं क्षेमेन्द्रेण–

**वृत्ते यस्य भवेद् यस्मिन्नभ्यासेन प्रगल्भता।**
**स तेनैव विशेषेण स्वसन्दर्भं प्रदर्शयेत्।।**
**एकवृत्तादरः प्रायः पूर्वेषामपि दृश्यते।**
**तत्रैवातिचमत्कारादन्यत्राब्धपूरणात्।।**[3]

---

1. सुवृत्ततिलकम् 3.18
2. शिशुपालवधम् 14.25
3. सुवृत्ततिलकम् 3.27-28

# शिशुपालवधे अवतारवादः

**डॉ. शिप्रा सिंह**
पूर्वशोधछात्राः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–110016

**उपोद्घातः-**

संस्कृतसाहित्ये महाकविमाघस्य नाम मणिरिव प्रकाशते। श्रीमाघस्य कृतौ वैशिष्ट्यं समुहद् विद्यते। तस्य विषये एका उक्तिः प्रसिद्धरूपेण विद्यते यत्र महाकविकालिदासस्योपमा, भारवेरर्थ गौरवं तथा दण्डिनः पदलालित्यम् अति प्रसिद्धमस्ति। तेनैव प्रकारेण श्रीमाघे त्रयाणां गुणानां समाहारः दृश्यते। उक्तमस्ति–

**माघे सन्ति त्रयो गुणाः।**

अर्थात् माघस्य काव्येषु अनुप्रास–शब्दसौष्ठव–पदलालित्य–इति त्रयाणां गुणानाम् एव दर्शनं भवति। व्याकरणादिशास्त्रव्युत्पन्नतया माघस्य महाकाव्यं तदितराण्यतिशेते।

**महाकविमाघस्य परिचयः-**

शिशुपालवधं महाकविमाघविरचितं विंशतिसर्गात्मकं प्रसिद्धं महाकाव्यम्। अस्मिन् महाकाव्ये प्रणेतुर्माघस्य जन्म एकस्मिन् प्रतिष्ठिते नाड्ये ब्राह्मणकुले अभवत् अस्य पितामहः सुप्रभेदवः गुर्जरशासकस्य वर्मलातश्चासीत्। माघोऽपि तथैव अतीव दानवान् आसीत्। माघस्य जन्म राजधानीभावेन पुरा प्रथिते भीमल्लाख्यनगरे अभवत्। वसन्तगढनामके स्थाने एकः शिलालेखः प्राप्तः के स हि 625 ई. वर्ष उत्कीर्णो विद्यते। तत्र वर्मलात इति नाम लिखितम्, अतः सप्तमशतकप्रारम्भो माघस्य समयो

निश्चीयते। माघस्य काव्ये द्वितीये सर्ग एक श्लोको विद्यते-

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा॥**

अत एव माघस्य समयः ई. 650 तमे वर्षे ई. 700 मध्ये एव विद्वद्भि प्रतिपाद्यते।

**शिशुपालवधं महाकाव्यस्य परिचयः-**

शिशुपालवधं महाकविमाघविरचितं विंशतिसर्गात्मकं प्रसिद्धं महाकाव्यम् एकम्। अस्मिन् महाकाव्ये श्रीकृष्णः कृतः शिशुपालस्य वधः एव मुख्यः विषयः। शिशुपालवध महाकाव्ये वलरामः कृष्णोद्धवमंत्रणा श्रीकृष्णश्च इन्द्रप्रस्थयात्रा, रैवतकपर्वतवर्णनं, ऋतुवर्णननं, वनविहारः, जलक्रीडा, सूर्यास्त, चन्द्रोदयः, प्रातः कालः राजसूययज्ञः, शिशुपालवधविद्रोहः शिशुपालवध श्च इत्यादय विषयाः अनुपमवैदुष्यपूर्णशैल्याः वर्णिताः सन्ति।

श्रीमद्भागवतस्य दशमस्कन्धस्य 71-75 सर्गस्थं विषयवस्तु आधारीकृत्य श्रीमान् माघः **'शिशुपालवधम्'** इति एकं महाकाव्यं रचितवान्। अस्मिन् महाकाव्ये 20 सर्गाः सन्ति। 20 सर्गेषु 1650 श्लोकाः विभिन्नच्छन्दसा रचिताः सन्ति।

शिशुपालवधस्य कथा श्रीमद्भागवतदशमस्कन्धोत्तरार्द्धे 74 अध्याये प्राप्यते। महाभारतसभापर्वणि 33 अध्यायतः 45 अध्यायं यावदस्ति। अतो मूलकथादृशा शिशुपालवधस्य कथावस्तु ततो गृहीतं प्रतीयते।

अत मया शिशुपालवधमहाकाव्येषु वर्णितावतारवादस्य विवेचनं क्रियमाणमस्ति। अवोसर्गपूर्वकात् तृ धातो "अवेस्तृसोर्धञ्" (3.3.112) इति पाणिननीयसूत्रद्वारा घञ् प्रत्यये बृद्धौ-रपरे च कृते अवतारशब्दो निष्पद्यते, यस्य शाब्दिकोऽर्थो भवति उपरिष्टादघोऽवतरणम्। परं जगति नैवविधं स्थानमस्ति। यत्र सर्वव्यापकस्य सर्वान्तर्यामिणो निराकारस्य परमात्मनः सत्ता न स्यात्। अतोऽवतारशब्दस्य नायमर्थोऽस्ति, यत्परमात्मा कुतोऽप्याग-मिष्यति ऊर्ध्वात् स्वर्गाद्वाऽवतरति, किन्त्ववतारशब्दस्य वास्तविकोऽयमर्थो वर्तते, यदव्यक्तरूपेण सर्वत्र विराजमानस्य परमात्मनो व्यक्तरूपेण प्रादुर्भावः।

सर्वव्यापित्वेऽपीश्वरस्य चित्कलाया: विकासो नियमोऽस्ति। यथोद्-भिज्जयोनिष्वेकस्या एवेश्वरीयकलाया विकासो विद्यते, स्वेदजेषु द्वयो: अण्डजेषु तिसृणां जरायुजेषु चतसृणां कलानां विकासो जायते। मनुष्येषु पञ्चकलातोऽष्टकलापर्यन्तं विकासो भवति। अष्टकलातोधिकानां कलानां यत्र विकासो भवति तच्छरीरदिव्यैरुपादानैराविर्भवति। अतोऽष्टकलातोऽधिका: कला अवतारकला: कथ्यन्ते। अष्टकलात: पञ्चदशकलापर्यन्तं विकासोव-तारेषु भवति। पूर्णावतारे च षोडशकलानां समुद्भव जायते।[1] एवं भगवतावतारा विभिन्नासु कलासु भवन्ति।

**ममैवेक कलाशक्तेरूद्भिज्जेषु विकासते।**
**स्वदेजेषु कलाद्वैतमण्डजेषु कलात्रयम्।।**

**चतस्त्रश्च कला भान्ति जरायुजगणेऽखिले।**
**पञ्चकोशप्रपूर्णत्वान्मर्त्येषु प्रायशोऽमरा:।।**

**आ कला पञ्चकादष्ट कला नूनं चकासते।**
**नवारभ्य कला यावत् षोडशं मे यथायथम्।।**

**संविकास्यावतारेषु नानाकेन्द्रोभवेषु च।**
**कुत्रचिन्मे प्रपूर्यन्तेऽवतारे पूर्णसंज्ञके।।**[2]

शिशुपालवधे श्रीकृष्णावतारस्य वर्णनम्-

शिशुपालवधनामके महाकाव्ये भगवत: कृष्णस्य अवतारवर्णनम् अतीवमहत्वपूर्णमस्ति।

**"श्रिय: पति: श्रीमति शासितुं**
**जगज्जगन्निवासो वासुदेवसद्मनि।"**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरि:।।**[3]

---

1. ईशावास्यमिदं सर्वंयत्किञ्चिज्जगत्यां जगत् (य.वे. 40/1)
2. श.गी. 4/9-12
3. शि. 1/1

श्रियः पतिः हरिं मुनिं ददर्श इत्यत्र विष्णोः अवतारः निर्दिष्टः। यथा ह्युक्तम् मल्लिनाथेनापि स्वटीकायाम् श्रियो लक्ष्म्या पतिः अनेन रूक्मिणीरूप्या श्रिया समेत इति सूचितम्। विष्णुपुराणेऽपि लिखिम्–राघवत्वे भवेत्सीता रूक्मिणी कृष्णजन्मनि। कथयितुं शक्यतेऽत्र यत् हरिः विष्णोः अवतार रूक्मिणी च लक्ष्म्याः अवताररूपेण वर्णिता। अस्मिन् श्लोके नारदस्यावतारस्यापि वर्णनम् अस्ति।

हिरण्यगर्भाङ्गं भुवं मुनि हरिः ददर्शं इत्यत्र हिरण्यगर्भाङ्गभुवं इत्यनेन नारदस्यावतारः मुनिरूपेण सूचितः। "हिरण्यगर्भ" इति ब्रह्मणोऽपरं नाम।

यथा ह्युक्तम् सर्वङ्कषाटीकायाम्–हिरण्यस्य गर्भो हिरण्यगर्भो ब्रह्मा ब्रह्माण्डप्रभवत्वात्। तस्याङ्गभुवं तनुजम्।

**उदासितारं निगृहीतमानसैगृहीतमध्यात्मदृशा कथञ्चन।**
**बहिर्विकारं प्रकृतेः प्रथिग्विदुः पुरातनं त्वां पुरुषं पुराविदः॥**[1]

श्लोकेस्मिन् सांख्यमतानुसारेण भगवन्तं श्रीकृष्णं क्रियाशून्यमित्यादिकम् उक्त्वा सुष्टुसाक्षात् कारणकरणयोग्यत्वेन कपिलादय प्राचीनज्ञा कथयन्ति इति प्रतिपादितमस्ति। अत्र भगवान् कृष्णः क्रियाशून्यः प्रकृत्या स्वार्थप्रवृत्तावपि स्वयं अस्पृष्ट इति स्पष्टरूपेण वर्णितमस्ति।

**निवेशयामासिथ हेलयोद्धृतं फणाभृतां छादनमेकमोकसः।**
**जगत्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तम्भशिरस्सु भूतलम्॥**[2]

जगत्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तम्भशिरः सु भूतलम्। इत्यत्र वाराहावतारस्य वर्णनमस्ति। यथा हि उक्तम् मल्लिनाथेनाऽपि स्वटीकायां भगवद्विष्णुना वाराहावतारे पृथिव्यां हेलयोधृता। इति फलणामृतामोकस आश्रयस्य एकं छादनमावरणं भूतलमुच्चैकरुन्नतेषु च अहीश्वरः शेषः एव स्तम्भस्य शिरसुफणसहस्रेष्विति भावः। अत्र शेषवाराहावतारयोः वर्णनमस्ति।

**तदिन्द्रसंदिष्टमुपेन्द्र! यद्वचः क्षण मया विश्वजनीनमुच्यते।**
**समस्तकार्येषु गतेन धुर्यताम् हिद्विषस्तद्भवता निशम्यताम्॥**[3]

---

1. शिशुपालवधम् – 1.33
2. शिशुपालवधम् – 1.34
3. शिशुपालवधम् – 1.41

अत्र श्रीकृष्णस्य वामनावतारस्य वर्णनमस्ति। वामनावतारस्य कथा वामनपुराणे तु वर्तते एव विशेषतः श्रीमद्भागवतस्याष्टमे स्कन्धे- 18-23 अध्यायेष्वस्य विशदं वर्णनमस्ति। श्लोकेस्मिन् भगवविष्णोः वामनावतारानन्तरं देवैः स उपेन्द्र इति उपाधिना विभूषितम्।

शिशुपालवध महाकाव्यस्य चतुर्दशसर्गे श्रीकृष्णस्य विभिन्नावताराणां वर्णनं दृश्यते।

**यथा - वाराहावतारः**[1]

**यथा - नृसिंहावतारः**[2]

**यथा - वामनावतारः**[3]

**यथा- मोहिन्यारूपः-**

**यस्य किंचिदपकर्तुमक्षमः कायनिगृहीतविग्रहः।**
**कान्तवक्त्रसदृशकृतिं कृती राहुरिन्दुमधुनापि बाधते॥**[4]

**यथा - दत्तात्रेयावतार**[5]

**यथा - परशुरामावतारः**[6]

**यथा - रामावतारः**[7]

**शिशुपालवधे बलरामस्य अवतारवर्णनम्-**

अवताराणां मध्ये श्रीकृष्ण अवतारः नवमोऽवतारः अनेकत्र स्वीकृतोऽस्ति, परञ्च कुत्रचित् श्रीकृष्णेन साकं बलरामस्यापि अवतारः

---

1. शिशुपालव - 14.71
2. शिशुपालव - 14.72, 73
3. शिशुपालव - 14.74, 75
4. शिशुपालव - 14.78
5. शिशुपालव - 14.79
6. शिशुपालव - 14.80
7. शिशुपालव - 14.81

स्वीकृतो वर्तते। श्रीमद्भगवतस्य प्रथमसूच्यां (3/3) बलरामकृष्णश्चोभावपि अवताररूपेण स्वीकृतौ स्तः।

उदाहरणार्थ अग्निपुराणे बलभद्रः अनन्तस्य प्रतिमूर्तितया कल्पितो-ऽस्ति।[1] यस्य प्रतिरूपः (मूर्तिः) चतुर्बाहुयुक्तो निर्मीयते स्म। वामभागस्योपरि हस्ते "लाङ्गलस्य अधोहस्ते च शंखस्थापनस्य विधानमस्ति, अथ दक्षिणभागस्य उपरिहस्ते" मूसलस्य अधोहस्ते च चक्रस्थापनस्य विधानमस्ति।[2] प्रायः बलरामविषये जनेषु श्रूयते यत् शेषनागस्य अवतारोऽस्ति बलभद्रः। ये भगवत् इत्युपाधिना संबोधिता भवन्ति तेषु गुणत्रयं सत्त्वरजस्तमश्चेति भवन्ति एव, परञ्च तेष्वपि एकस्य प्राधान्यं भवति। एवमेव बलरामेऽपि सत्त्वगुणस्य प्रभावो दृश्यते-यतोहि सः स्वस्य कनिष्ठभ्रातुः श्रीकृष्णस्य सर्वाण्येव वचनान्यनुपालयति।

**निशम्य ताः शेषगवीरभिधातुमधोक्षजः।**
**शिष्याय बृहतां पत्युः प्रस्तावमादिशद् दृशा॥**[3]

अस्मिन् श्लोके शेषनागस्यावतारः बलरामविषये उक्तमस्ति। यथा हि मल्लिनाथेन स्वटीकायां एवं प्रतिपादितम् - कृतमक्षणमिन्द्रियजं ज्ञानं येन सोऽधोक्षजो हरिः ता शेषस्य शेषावतारस्य बलभद्रस्य गाः वाचः शेष गवीः इति।

**शिशुपालवधे शिशुपालस्यावातारवर्णनम्-**

शिशुपालवधमहाकाव्ये महाकविना माघेनापि नारदमुनिद्वारा शिशुपालस्य जन्मवृत्तान्तम् उल्लिखितं वर्णितञ्च।

यथा च उक्तम्-

**अभूद्भूमिः प्रतिपक्षजन्मनां भियां तनूजस्तनपद्युतिर्दितेः।**
**यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्व कशिपुं प्रचक्षते॥**[4]

---

1. अग्नि पुराण - 15.5
2. अग्नि पुराण - 49.6
3. शि. वधम्. - 2.68
4. शि. वधम्. - 1.42

यथा च-

**समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयताम्।**
**भयस्य पूर्वावतरस्तरस्विना मनस्सु येन द्युसदां न्यधीयत॥**[1]

प्रतिपक्षाच्छतोः जन्म यासां तासां भियामविषयः। तपनद्युतिः सूर्यतापोदितस्तनूजो दैत्योऽभूत्। यं जनाः इन्द्रशब्दार्थनिषूदनं कथयन्ति। अर्थात् सर्वप्रथम शिशुपालः हिरण्यकशिपुनाम दैत्यरूपे उत्पन्नोऽभवत्। भयरहित आसीत् अर्थात् **'असुर'** वाचक यः हिरण्यकशिपु देवानां मनसि भयम् उत्पादितवान्।

यथा च-

**सटाच्छटाभिन्नघनेन विभ्रता नृसिंह सैहीमतनुं तनुं त्वया।**
**स मुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः॥**[2]

तदनन्तरं भगवान् विष्णुः नृसिंहरूपे अवतरितो भूत्वा हिरण्यकशिपो वधं कृतवान्। यस्य वर्णनं शिशुपालबधे महाकविमाघेन विस्तृतरूपेण कृतम्।

यथा च-

**प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोऽतिरागाद्दशमं चिकर्तिषुः।**
**अतर्कयद्विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः॥**[3]

एवावद्दुराचाराणां पश्चादपि तस्य बलदर्पः शान्तो नाभवत्। अतः तेन देवैः साकं युद्धं कृत्वा बलदर्पेत्पन्नकण्डवप्रभावे दूरीकरणार्थं देवान् विजित्य (जित्वा) देवलोकं विछिन्नं कुर्वतः त्रयाणां लोकानां भयोत्पन्नकारणः रावण नाम राक्षसं भूत्वा जनिमलभत्। तत्पश्चात् भगवतां विष्णुना दाशरथि-(रामचन्द्र) रूपेण दण्डकारण्यात् मातुः सीताया अपहर्तारं (रावणं) लोलिजलयुक्त एवं धुष्धार्णवं लंघित्वा लंकायां तस्य हननं कृतम्।[4]

---

1. शि. वधम्. - 1.43
2. शि. वधम्. - 1.47
3. शि. वधम्. - 1.49
4. शि. वधम्. - 1.68

यथा च–

**अथोपपत्तिं छलनापरोऽपरामवाप्य शैलूष इवैष भूमिकाम्।**
**तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते संप्रति सोऽप्यसः परैः।।**[1]

मरणात् परं किञ्चित् दिवसान्तरं सः (रावणं) जन्मान्तरे शिशुपाल-रूपे उत्पन्नोऽभूत्।

## उपसंहार

इत्थं प्रकारेण अहं कथयितुं शक्यते यत् शिशुपालवधमहाकाव्यं संस्कृतसाहित्यस्य महत्त्वपूर्णं काव्यमस्ति। ग्रन्थेऽस्मिन् नैके पदे अवतारवादः दरीदृश्यते।

✦✦✦

---

1. शि. वधम्. – 1.69

# शिशुपालवधे शब्दशास्त्रसन्दर्भाः

**डॉ. संजयकुमारचौबे**

पूर्वशोधच्छात्रः, साहित्यविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रिय–

संस्कृतविश्वविद्यालयः, नवदेहली–110016

महाकविमाघस्य यशोभूतं शिशुपालवधाख्यं महाकाव्यं को न जानाति सहृदयो विबुधो वा। माघः स्वलेखनीप्रसूतामृततुल्यवचोभिः काव्यरसिकान् विविधशास्त्रसमाराधकांश्च सहैव सन्तर्पयति। यत्र कविविरचिते महाकाव्ये काव्यगतानि रसालङ्कारादीनि नैकविधानि तत्त्वानि विद्यमानानि सन्ति तत्रैव संस्कृतवाङ्मयस्यान्तर्गतानि शास्त्रभूत- व्याकरण-सांख्य-योग-न्याय-ज्योतिष-संगीतकलादिभिः सम्बद्धानि भूयांसि तत्त्वानि विराजन्ते। महाकविमाघः सर्वशास्त्रतत्त्वज्ञोऽस्तीति नास्ति कश्चन सन्देहः। एतस्य पाण्डित्यं यथा दर्शनादिषु प्रसरति तथैव नीत्यादिशास्त्रेष्वपि। किञ्च व्याकरणशास्त्रे शब्दशास्त्रे वा विशेषतोऽनुरागो वरीवर्तीति काव्यस्याध्ययनेन परिस्फुटति। अत एव तत्काव्ये शब्दशास्त्रगतानां शब्दक्रियापदयोस्तत्रापि क्रियापदेषु सनन्तयङन्त-यङलुङन्तादीनां प्रयोगविधानानि कानिचन अपूर्वाण्येव वैशिष्ट्यानि द्योतयन्ति। परमप्रकाण्डस्यास्य महाकवेः साधुप्रयोगं प्रेक्ष्य परमवैयाकरणो भट्टोजिदीक्षितः[1] सिद्धान्तकौमुद्यामुदाहरणत्वेन तदीयकाव्यस्य पद्यमुद्धरति। यथा–

**पुरीमवस्कन्द लुनीहि नन्दनं**
**मुषाण रत्नानि हरामराङ्गनाः।**
**विगृह्य चक्रे नमुचिद्विषा बली**
**य इत्थमस्वास्थ्यमहर्दिवं दिवः॥**[2]

---

1. सिद्धान्तकौमुदी, लकारार्थप्रकरणम्
2. शिशुपालवधम् 1.51

वस्तुतः माघस्य महाकाव्ये शब्दप्रयोगचातुर्येण साकं दर्शनादिशास्त्रमिव शब्दशास्त्रसम्बद्धा बहवः सन्दर्भा विद्यमानाः सन्ति। क्वचिदौपम्येन क्वचिद् दृष्टान्तेन क्वचिच्च विषयवर्णनरूपेण वा। प्रकृतमहाकाव्ये महाकविमाघः प्रत्यक्षतः शब्दविद्याया[1] नामाख्यानं करोति तथा च 'पाणिनीयमि'ति पदप्रयोगेण शब्दशास्त्रस्याधारभूताया 'अष्टाध्याय्या' सङ्केतं विदधाति। स द्वितीयसर्गे अर्थगौरवरूपेण राजनीतिगतगूढतत्त्वानां निदर्शनप्रसङ्गे व्याकरणशास्त्रस्य प्रवृत्तौ हेतुत्वं सम्यगुपस्थापयति। यथा-

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा:॥**

अर्थात् नीतिशास्त्रविरुद्धपदन्यासा अमात्यप्रभृतीनां जीविकासाधनभूता क्रियावसाने बहुधनधान्यप्रदायिनी राजनीतिः चारैर्विना तथैव न शोभते यथा शब्दविद्या (व्याकरणम्) माणिन्यादिकृतसूत्राणामविरुद्धपदयुता न्याससहिता (जिनेन्द्रबुद्धिकृतकाशिकावृत्तेर्व्याख्यानम्) काशिकासूत्रवृत्तिसंवलिता महाभाष्य-सहिता पस्पशाह्निकेन विना न शोभते।

अत्र **'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'** इति लोकप्रसिद्धोक्तिः सङ्गच्छते। प्रसङ्गेऽस्मिन् कवेस्तात्पर्यमस्ति यत् महर्षिपतञ्जलिकृतमहाभाष्ये यत् प्रथमाह्निकं नामान्तरेण पस्पशाह्निकं वर्तते तत्र **'रक्षोहागमलघ्वसन्देहा प्रयोजनम्'**[2] इति व्याकरणस्य प्रयोजनं प्रतिपादितं विद्यते। अत एवास्य ज्ञानं विना सूत्रवृत्तिन्यासभाष्यादिपरिपूर्णायामपि शब्दविद्यायां तच्छास्त्राध्येतृणां प्रवृत्तिर्न भवति।

नीत्या परमनिपुणोऽयं महाकविः कश्चात्र भुवां केवलं संज्ञां बिभर्ति को वा गुणगरिम्णा शूरत्वमधिगच्छतीति सम्यज्जानाति। स द्वितीयसर्गे बलराममुखात् परिभवेऽपि नराणां क्षमावृत्तिं निन्द्यति। तन्मते ये मानवा जातिक्रियागुणादिभिः प्रयोजनानि न सिद्ध्यन्ति तेषां जन्म यदृच्छाशब्दवत् संज्ञायै जायते। यथोक्तम्-

---

1. शिशुपालवधम् 2.112
2. महाभाष्यम्, परस्पशाह्निकम्

**असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः।**
**यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम्॥**[1]

अत्रायमाशयः– शब्दशास्त्रे शब्दानां प्रवृत्तिश्चतुर्धा मन्यते। जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चेति। तत्र जातिः ब्राह्मणत्वादयः, क्रिया अध्ययनादयः, गुणाः शुक्लादयः, यदृच्छा डित्थडवित्थादयश्चेति। महाभाष्यकारः पतञ्जलिः चतुष्टयी शब्दानां प्रवृत्तिरिति[2] वचनमुपस्थापयन् सिद्धान्ततः साधुत्वप्रयोगदृष्ट्या त्रयी एव शब्दप्रवृत्तिरिति मनुते। यथा– **'त्रयी शब्दानां प्रवृत्तिः–जातिशब्दाः गुणशब्दाः क्रियाशब्दा इति। न सन्ति यदृच्छाशब्दाः।'**[3] वस्तुतः नितान्तमेव रूढत्वेन यदृच्छाशब्दाः परिष्कृतभाषायां त्याज्या भवन्ति। न्यासकारः[4] प्रक्रियाकौमुद्याष्टीकाकारो[5] विठ्ठलश्चामुमेव सिद्धान्तं स्वीकुरुतः। आचार्यमम्मटः भाष्यकारवचन-मङ्गीकुर्वन् जात्यादौ शक्तिग्रहो भवतीति प्रतिपादनप्रसङ्गे यदृच्छाया संज्ञात्वं ब्रवीति। तद्यथा– **"डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतिक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषु सन्निवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति।"**[6]

विश्लेषणेनेदं वक्तुं शक्यते यत् तथा जातिक्रियागुणादिभिः कस्यचिदर्थविशिष्टस्य सम्पादनं डित्थडवित्थादि यदृच्छावाचकाः शब्दा न

---

1. शिशुपालवधम् 2.47
2. चतुष्टयी शब्दानां प्रवृत्तिः– जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाः चतुर्थाः। ऋलृक् (प्रत्या.2) सूत्रभाष्यम्।
3. महाभाष्यम्, ऋलृक् (प्रत्या.2) सूत्रभाष्यम्।
4. तदेवं निरुक्तशाकटायनदर्शनेन त्रयी शब्दानां प्रवृत्तिः–जातिशब्दा गुणशब्दाः क्रियाशब्दा इति। न्यासः– 3.3.1
5. एवं जातिगुणक्रिावाचित्वाच्छब्दानां त्रय्येव प्रवृत्तिर्न चतुष्टयी, यदृच्छकानामभावात्। (प्रक्रियाकौमुदी) उद्धृतम्, संस्कृत व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीमांसक भाग–2) पृ. 10
6. काव्यप्रकाशः (मम्मटः) द्वितीय उल्लासः, पृ. 45

कुर्वन्ति केवलं यादृच्छिकसंज्ञामेव लभन्ते तथैव पुंसोऽपि जात्यादिभिः प्रयोजनविशेषान्यसाधयन्तः केवलं देवदत्त यज्ञदत्तादि संज्ञामेव बिभ्रति।

एतदतिरिक्तं दशमसर्गे महाकविमाघः शब्दानां व्युत्पत्तिसन्दर्भमप्युपस्थापयति। यथा–

**दत्तमात्तमदनं दयितेन व्याप्तमातिशयिकेन रसेन।**
**सस्वदे मुखसुरं प्रमदाभ्यो नाम रूढमपि च व्युदपादि।**[1]

अत्रात्यधिकमद्यपानेन प्रमदेति रूढगतं नाम 'प्रकृष्टो मदो यस्य सा' इति व्युत्पन्नरूपं सञ्जातमिति भावः।

महाकवेर्माघस्य शिशुपालवधमहाकाव्ये धातु-कारकसन्दर्भितां वर्णनीयतां विभाव्य शब्दशास्त्रविदोऽपि पदे पदे प्रसीदन्ति। प्रकृतमहाकाव्यस्य दशमसर्गेऽत्यन्तमेव रमणीयेन विधिना प्रमदानां मद्यपानवर्णनं शब्दशास्त्रगतं धातूपसर्गयोर्विषयकं तथ्यं पुरस्कृत्य प्रतिपादयति कविः। तन्मते मद्यस्य प्रभावात् प्रमदानामङ्गेषु चिरकालाद् विद्यमानः किञ्चाप्रयुक्तत्वादप्रकाशितो विलासः तथैवाभिव्यक्तोऽभवत् यथा भूवादिषु निहिताः किञ्चाप्रयुक्तकारणादप्रकाशितार्थाः प्रपराद्युपसर्गात् प्रकाशिता भवन्ति। यथोक्तम्–

**सन्तमेव चिरमप्रकृतत्वादप्रकाशितमदिद्युतदङ्गे।**
**विभ्रमं मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थम्॥**[2]

महाकविरत्र 'धातूनामनेकार्थः' इति व्याकरणशास्त्रसम्मतं तथ्यं सङ्केतयति। अपि चोपसर्गाणां प्रयोगार्थवैशिष्ट्यं किमित्यपि ब्रूते। **'दधाति शब्दस्वरूपं वा यः सः धातुः'**।[3] पाणिनीनये **'भूवादयो धातवः' (पा. सू. 1.3.1)** इतिसूत्रद्वारेण क्रियावाचिनो भूवादयो धातुसंज्ञां लभन्ते। क्षीरतङ्गिणीग्रन्थे क्षीरस्वामिना सौनागानां मतमुपस्थापयन् लिखति– **'धातूनामनेकार्थनिर्देशोऽयं निदर्शनार्थ इति।'** यदाहुः-

---

1. शिशुपालवधम् 10.23
2. शिशुपालवधम् 10.15
3. संस्कृत व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीमांसक भाग-2) पृ. 18

**क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः।**
**प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः॥**[1]

एवमनेकार्थवाचका धातव उपसर्गाणां योजनेन पठितधात्वर्थातिरिक्तं तत्र लीनमर्थमभिव्यञ्जयन्ति। यथा **'दा दाने'** इत्यत्र आङुपसर्गात् आदानं समुपसर्गात् संदानमित्यर्थद्वयं दा धातुरेव प्रकटयति। प्रकृतसन्दर्भे व्याकरणे प्रख्यातमेकं पद्यमपि विद्यते। तद्यथा–

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहारहार-संहार-विहार-परिहारवत्॥**

महाभाष्यकारः पतञ्जलिरप्युपसर्गाणां महत्त्वं क्रियाणां वैशिष्ट्याय मनुते। तेनोक्तम्– **"उपसर्गाश्च पुनरेवमात्मका यत्र क्रियावाची पदं श्रूयते तत्र क्रियाविशेषमाहुः। यत्र हि श्रूयते तत्र ससाधनं क्रियामाहुः।"**[2]

महाकविमाघः शिशुपालवधे यत्र कुत्रचित् धातुपदप्रयोगं विनैव केवलं धात्वर्थनिर्देशेन मनोवाञ्छितं काव्यं प्रस्तौति। समराङ्गणे यदा श्रीकृष्णोऽरीन् निहन्ति तदा तस्य पराक्रमं हितकारित्वं च सूचयत् पद्यमिदं विभावनीयम्–

**उद्धतान्द्विषतस्तस्य निघ्नतो द्वितयं ययुः।**
**पानार्थे रुधिरं धातौ रक्षार्थे भुवनं शराः॥**[3]

अत्र भगवतः श्रीकृष्णस्य शराणां क्रियाकारित्वं कविः धात्वर्थद्वारेण विदधाति न च धातुपदप्रयोगेण। अर्थात् उद्धतान् शत्रून् हिंसतः हरेः शरा रूपद्वयमवाप्नुवन्। रक्तं पातुं पानार्थे भुवनं रक्षितुं रक्षार्थ इति। अत्र महाकविः पा धातोः प्रथितयो द्वयोरर्थयोः समुचितं निर्देशः कृतोऽस्ति। यथोक्तम्– 'पा पाने' 'पा रक्षणे' इति। निकर्षकः तस्य हरेः शराः शत्रूणां रुधिरं पिबन्ति, भुवनं पान्ति चेति द्वितयत्वम्।

---

1. क्षीरतरङ्गिणी, (क्षीरस्वामी) उद्धृतम्, संस्कृत व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीमांसक भाग–2) पृ. 85
2. महाभाष्यम् 5.2.28
3. शिशुपालवधम् 19.103

चतुर्दशसर्गे भगवतः श्रीकृष्णस्य माहात्म्यवर्णने महाकविमाघस्य धातुकारकाश्रितं व्याकरणमूलकं पाण्डित्यं प्रोक्तधातुर्णनप्रसङ्गवदेन सर्वान् सुधीनाकर्षयति। तद्यथा-

**केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।**
**धातवः सृजति संहृशास्तयः स्तौतिरित्यत्र विपरीतकारकः॥**[1]

अत्र महाकविः कर्तृकारकौ सृजादिधातूनाश्रित्य हरेर्वैशिष्ट्यं तनुते। तस्याशयोऽस्ति- सृज (विसर्गे) धातुः, सम् पूर्वक हृञ् (हरणे) धातुः, शासु (अनुशिष्टौ) धातुश्चेति हरेः सन्दर्भे केवलं कर्तृकारकत्वं भजन्ते। यथा- हरिः सृजति, हरिः संहरति, हरिः शास्तीति। न च कर्मकारकत्वमिति यथा-कश्चित् हरिं सृजति संहरति शास्ति। आहोस्वित् हरिः सृज्यते संह्रियते शिष्यत इति। यतोहि अनादिनिधनत्वात् सर्वसामर्थ्यवशादेष जगति न कैश्चिदपि सृजनसंहरणशासनादिरूपं बिभर्ति। किञ्चैतत् विपरीतं 'स्टुञ् स्तुतौ' धातुः विपरीतकारकमर्थात् कर्मकारकमिति धत्ते। यथा-जना हरिं स्तौति, जनेन हरिः स्तूयत इति न खलु कर्तृत्वे हरिः जनं स्तौति हरिणा जनः स्तूयते वा। यतश्च सर्वे हरिमेव स्तुवन्ति नैष हरिरन्यानिति फलितार्थः।

शिशुपालवधमहाकाव्ये महाकविमाघः यत्र कुत्रचित् शाब्दिकानामिव तत्पथमनुसरन् निजाभिलषितं तत्त्वं प्रेक्षावतां पुरतस्समुपस्थापयति। षोडशसर्गे शिशुपालस्य शौर्यवर्णने तस्य परिभाषाविषयकं प्रगाढं ज्ञानमवलोक्य सर्वेषामेव सहृदयानां शास्त्रविदश्च चेतो मोमुद्यते। तद्यथा-

**परितः प्रमिताक्षरापि सर्वं विषयं व्याप्तवती गता प्रतिष्ठाम्।**
**न खलु प्रतिहन्यते कुतश्चित्परिभाषेव गरीयसी यदाज्ञा॥**[2]

अल्पाक्षरत्वादपि या सम्पूर्णलक्ष्ये व्याप्ता भवति, प्रमाणरूपत्वात् कुत्रचिदपि न बाधते तथा च विशिष्टार्थप्रतिपादिकास्ति तस्याः परिभाषावदेन शिशुपालस्याज्ञा वरीवर्तीत्याशयः। प्रकृतस्थले महाकविमाघः शब्दशास्त्रे प्रथितायाः परिभाषायाः स्वरूपं काव्यात्मिकया भाषया बोधयति। सामान्यलक्षणे

---

1. शिशुपालवधम् 14.66
2. शिशुपालवधम् 16.80

परिभाषा **'अनियमे नियमकारिणी'**[1] ति मन्यते। लक्षणदृष्ट्या **'परितो व्यावृतां भाषां परिभाषां प्रचक्षते।'**[2] महाभाष्यकाररीत्या एषा परिभाषा एकदेशे स्थित्वा सर्वं शास्त्रं प्रकाशयति। यथोक्तम्– **'कश्चिदेकस्थः सर्वं शास्त्रमभिज्ज्वलति। यथा प्रदीपः सुप्रज्ज्वलितः सर्वं वेश्म अभिज्ज्वलति।'**[3] वस्तुतः शाब्दिकानां नये **'यथोद्देशं संज्ञा परिभाषम्' 'कार्यकालं संज्ञापरिभाषमि'ति**[4] रूपद्वयं विद्यते। प्रकृतप्रसङ्गे माघेन यत् स्वरूपं प्रदर्शितं तद् दृष्ट्या अस्याश्चत्वारि वैशिष्ट्यानि लक्ष्यन्ते। प्रथमम् अल्पाक्षररूपत्वात् सूत्ररूपत्वम्, द्वितीयं शास्त्रगतविषयस्य व्यापनम्, तृतीयं प्रमाणरूपत्वम्, चतुर्थं विशिष्टार्थप्रतिपादनत्वम्। प्रमाणरूपसन्दर्भे इदमवधेयं यत् याः परिभाषाः सूत्ररूपे न पठिताः सन्ति किञ्च सूत्रेभ्य ज्ञापिता न्यायसिद्धा वा भवन्ति ता अपि प्रमाणरूपतां दधतीति।

चतुर्दशसर्गे महाकविः धर्मराजयुधिष्ठिरस्य राजसूययज्ञं सम्यग्वर्णयति। तत्र यजमानपत्न्या द्रौपद्या हविष्यपदार्थमीक्षणानन्तरम् ऋत्विजो हवनकर्म प्रारभन्ते। तत्प्रसङ्गे माघः स्वकीयं शास्त्रगतं पाण्डित्यं पुरस्कृत्य ऋत्विजामागमे विहितस्य ऊहस्य चर्चामवतारयति। यथा–

**नाञ्जसा निगदितुं विभक्तिभिर्व्यक्तिभिश्च निखिलाभिरागमे।**
**तत्र कर्मणि विपर्यणीनमन् मन्त्रमूहकुशलाः प्रयोगिणः।।**[5]

अर्थात् युधिष्ठिरस्य यज्ञक्रियायामूहकर्मणि निपुणा ऋत्विज आम्नाये निखिलाभिर्विभक्तिभिर्वचनादिभिर्लिङ्गादिभिर्वा कथयितुमशक्यत्वात् तं मन्त्रं कर्माङ्गदेवतारूपवाक्यं विपरिणमन्ति स्म।

---

1. संस्कृत व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीमांसक भाग– 2) पृ. 302
2. संस्कृत व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीमांसक भाग–2) पृ. 302
3. महाभाष्यम्, षष्ठी स्थाने योगा 1.1.48
4. संस्कृत व्याकरणशास्यत्र का इतिहास (युधिष्ठिर मीमांसक भाग–2) पृ. 302
5. शिशुपालवधम् 14.23

अत्र **'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'** इति महाभाष्यकार-पतञ्जलिनिर्दिष्टव्याकरणशास्त्रस्य मुख्यप्रयोजनान्तर्गतम् **'ऊह'** इत्यस्य निर्देशोऽस्ति। वस्तुतः विभक्त्यादीनां विपरिणाम ऊह इति। वेदे पठितेषु मन्त्रेषु प्रयुक्तानां पदानां सर्वेषु लिङ्गेषु विभक्तिषु वा प्रयोगोऽशक्यः। फलतः यज्ञभूमिगतैः ऋत्विजैः तत्तत्मन्त्रेषु यथोचितलिङ्गादीनामाहोस्वित् विभक्त्यादीनां विपरिणामो विधीयते। एष एव विपरिणाम ऊहपदेन ज्ञायते। यथोक्तम्- **"ऊहः खल्वपि। न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः।[1]"**

ऊहतत्त्वस्य सम्यग्ज्ञाता महाकविः वेदादिषु हस्तकल्पितस्वराणां सन्दर्भं कथं विस्मर्तुं शक्तः। अत एव स युधिष्ठिरस्य राजसूययज्ञे उद्गातारः सामवेदं हस्तसञ्चालनादिपुरः सरं निषादादिस्वरान् प्रकटीकुर्वन्तोऽस्-खलितरूपेण पठन्तीति भाषते। यथा-

**सप्तभेदकरकल्पितस्वरं साम सामविदसङ्गमुज्जगौ।**
**तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत।।[2]**

वस्तुतः हस्तसञ्चालनं विना मन्त्राणामुच्चारणस्य विधानमेव नास्ति। पाणिनीयशिक्षायां भगवता पाणिनिना प्रोक्तमस्ति यत् यो हि हस्तहीनं स्वरवर्णार्थविवर्जितं मन्त्रं पठति स वियानिं प्राप्नोति। एतद्विपरीतं हस्तादिसञ्चालनेन यो पठसि स ब्रह्मलोकमधिगच्छति।

तद्यथा-

**हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।**
**ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति।।**

**हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।**
**ऋग्यजुः सामभिः पूतो ब्रह्मलोके महीयते।।[3]**

---

1. महाभाष्यम्, पस्पशाह्निकम्
2. शिशुपालवधम् 14.21
3. पाणिनीयशिक्षा 54.55

अस्मादेव राजसूययज्ञे उद्गातारः सिद्धान्तमेनमनुसरन्तीति।

महाकविमाघः स्वरविषयकं तथ्यं न खलु स्थूलतया प्रत्युत सूक्ष्मातिसूक्ष्मतया जानाति। तद् धिया स्वरभेदादर्थभेदो भवतीति[1] सिद्धान्तपक्षमनुसरन्तो राजसूययज्ञे शब्दशास्त्रज्ञा ऋत्विजः साम्यात् सन्देहोत्पादकयोः (सन्देहाय साम्यरूपयोः) पृथक् पृथक् फलं प्रतिपादकतयोः समासयोर्विग्रहं स्वरेण कुर्वन्ति स्म। यथा–

**संशयाय दधतोः सरूपतां दूरभिन्नफलयोः क्रियां प्रति।**
**शब्दशासनविदः समासयोर्विग्रहं व्यवससुः स्वरेण ते॥**[2]

अत्र महाकविः स्वरेण समासस्य निर्णयो भवतीति ख्यापयति। प्रकृतप्रसङ्गे तस्य बुद्धौ महाभाष्यस्य व्याकरणाध्ययनप्रयोजनविषयकमसन्देहमतं तिष्ठति। यतोहि महाभाष्यकारः पतञ्जलिरेतदेव मतं तत्र प्रस्तौति। यथा– **'असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति-स्थूलपृषतीमाग्नि-वारुणीमनड्वाहीमालभतेति। तस्यां सन्देहः-स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः (पा. सू. 6.2.1) अथान्तोदात्तत्वं ततस्तत्पुषः। (पा.सू.6.1.223) इति।'**[3]

एतेन विवरणेन संशयात्मके पदे स्वरेण समासस्य निर्णयं विधाय तदनुसारमेवार्थस्य परिज्ञानं करणीयमिति रीतिं नूनमेव जानाति शिशुपालवधकारः।

प्रकृतप्रसङ्गं विहाय महाकविमाघः द्वितीयसर्गे शिशुपालस्य शौर्यं वर्णयन् शब्दशास्त्रगतस्वरप्रक्रियायाः समुचितं निदर्शनं विदधाति। तद्यथा–

**तदीशितारं चेदीनां भवांस्तमवमंस्त मा।**
**निहन्त्यरीनेकपदे य उदात्तः स्वरानिव॥**[4]

---

1. मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तदर्थमाह।
   स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ पाणिनीयशिक्षा 52
2. शिशुपालवधम् 14.24
3. महाभाष्यम्, पस्पशाह्निकम्
4. शिशुपालवधम् 2.95

अर्थात् चेदीनां स्वामिनं भवान् युद्धादिप्रसङ्गेन न तिरस्करोतु यतोहि स एकपदे स्थित अरीन् तथा निहन्ति यथा सुप्तिङन्तलक्षणैकपदे उदात्तः अनुदात्तस्वरितादिस्वरान् निहन्ति बाधते वा।

अत्रायमाशयः- शब्दशास्त्रे स्वरितप्रक्रियान्तर्गतम् **'अनुदात्तपद-मेकवर्जम्' (पा.सू. 6.1.158)** इति परिभाषात्मकं सूत्रं सुप्तिङन्तरूपे एकपदे यस्योदात्तः स्वरितो वा विधीयते तमेकाचं परित्यज्य शेषमनुदात्तं विदधाति। यथा-गोपायतं नः। इत्यत्र गुपू रक्षणे धातोः स्वार्थे आय प्रत्यये विहिते 'गोपाय' इत्यस्य **'सनाद्यन्ता धातवः' (पा.सू. 3.1.32)** इत्यनेन धातुत्वे 'धातोः' (पा.सू. 6.1.162) इति सूत्रेण अन्तस्थयकाराकारस्योदात्तत्वे सति तमुदात्तरूपमेकाचं वर्जयित्वा शिष्टानामनुदात्तत्वमिति विधीयते। तात्पर्यमिदं यत् एकपदे एकस्यैवोदात्तस्वरस्य कारणादन्ये स्वरा निघाता भवन्तीति।

शिशुपालवधकारो माघः युद्धमध्ये जातं समराङ्गणं पूर्णतश्शब्दशास्त्र-मधिकृत्य साधु वर्णयति। असौ व्याकरणे ये शब्दा निपात्यन्ते तानाश्रित्य मनोहरं पद्यं रचयति। तद्यथा-

**निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम्।**
**पाणिनीयमिवालोकि धीरैस्तत्समराजिनम्।।**[1]

अर्थात् यत्र समराङ्गणे सुहृत्-स्वामि-पितृव्य-भ्रातृ-मातुलादयः निपातिताः (वीरशय्यां गमिताः) सन्ति तत्समराङ्गणं धीराः (धैर्यवन्तः, विद्वांसो वा) सुहृदादिशब्दनिपातनरूपं पाणिनीयाष्टाध्यायीव्याकरणमिव अपश्यन्।

अत्रेदं बोध्यम्- शब्दशास्त्रे लक्षणाभवे बहवश्शब्दाः साधुत्वाय सूत्रस्वरूपेणोच्चारिताः निपातिताः भवन्ति। यथा सुहृदादयः। उदाहरणार्थम्-शोभनं हृदयं यस्य स सुहृत्। अत्र **'सुहृद्दुर्हृदौ मित्रामित्रयोः'** (पा.सू. 5.4.50) इति सूत्रेण हृदयस्य स्थाने हृदिति निपातिते सुहृत् शब्दः सिद्ध्यति। एवमेवात्र पठिताः सर्वेऽपि शब्दाः निपात्यन्ते।

---

1. शिशुपालवधम् 19.75

अत्रोक्तसन्दर्भातिरिक्तं महाकविमाघः शब्दशास्त्रगतमपरोक्षमपि संदर्भं प्रकटयति। यथा–

**वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव।**
**अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता॥**[1]

अत्र वाङ्मयस्यानन्त्ये **'वर्णैः कतिपयैरेव'** इत्यनेन पाणिनीय-शिक्षाप्रोक्तं **'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।'**[2] इति वचनं चरितार्थतां याति। यतो हि एतैरेवाक्षरैः वाङ्मयस्यानन्त्यम्।

इत्थं शिशुपालवधे महाकाव्ये महाकवेर्माघस्य पाण्डित्यं विविध-शास्त्रमादाय प्रस्फुटी भवति। तथापि तत्र शब्दशास्त्रगतं गभीरं तलस्पर्शि च ज्ञानं किञ्चिदन्यतममेव वैशिष्ट्यमावहति। शब्दशास्त्रस्य ग्रन्थानां नामोल्लेख-पुरःसराणि स्थूलसूक्ष्मगतानि आ संज्ञातः स्वरप्रक्रियान्तर्गतं समायातनैकविध-सिद्धान्ततत्त्वानि कवेस्तदीयकाव्यस्य च महत्तामेव ख्यापयन्ति। वस्तुतः **'शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति।'**[3] इति माघवचनेन तस्य शास्त्रेषु निश्चिता मतिः तत्रापि शब्दशास्त्रेऽवश्यमेव साफल्यमवाप्नोतीति वक्तुं शक्यते। सम्भवतः एतदेव कारणं यदत्र काव्ये किञ्चित् काठिन्यमपि समायाति परन्तु तेन काव्यस्याव्याजमनोहरं रूपं न क्षीयत इति शम्॥

✦✦✦

---

1. शिशुपालवधम् 2.72
2. पाणिनीयशिक्षा 3
3. शिशुपालवधम् 5.47

# शिशुपालवधे पौराणिकतत्त्वानि

**श्रीचन्द्रप्रकाशतिवाड़ी**
शोधछात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–110016

**भूमिका-**

यद्यपि संस्कृतसाहित्ये सहस्राधिकाः महाकवयः परिगणिताः च तेषां काव्यानि महाकाव्यानि च सन्ति, तथापि रघुवंशम्, कुमारसम्भवम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितनामकानां पञ्चमहाकाव्यानां लोके महती प्रसिद्धिर्वर्तते। कैश्चित् खण्डकाव्यकोट्यां प्रसिद्धं मेघदूतमपि एतैः पञ्चभिः काव्यैः साकं योजयित्वा, षड्–उत्तमकाव्यरत्नानि इति गण्यन्ते। किरातार्जुनीयशिशुपालवधनैषधीयचरितानि क्रमशः भारविना, माघेन, श्रीहर्षेण च कृतानि बृहत्त्रयी इति नाम्ना व्यवह्रियन्ते। प्रसिद्धमहाकाव्यलक्षणान्यनुसृत्य सर्गबन्धत्वं प्रथमलक्षणमिति कारणेन विंशतिसर्गात्मकमिदं तल्लक्षणं पूरयति। कश्चन देवः अथवा सुक्षत्रियवंशजः धीरोदात्तः नायकः स्यात् इति नियममनुसृत्य अत्र भगवान् कृष्णः नायकोऽस्ति। शृङ्गारवीरशान्तानाम् एकोऽपि रस इष्यते, इति नियमपरिपालनाय अत्र वीररसस्याङ्गित्वं प्रतिपादितं, महाकाव्येषु इतिवृत्तं प्रख्यातं स्यात्, तत्राऽपि इतिहासोद्भवं भवति, अतोऽत्र प्रसिद्धेतिहासयोः मध्ये महाभारतात् इतिवृत्तं समुद्भूतम्, पुरुषार्थेषु त्रिषु अन्यतमं फलं भवेत् इति क्रममनुसृत्य अस्य शिशुपालस्य वधात् दुष्टशिक्षणं शिष्टरक्षणं धर्मस्थापनं चेति श्रीकृष्णस्य अवतारलक्ष्यं यत् वर्तते तदत्र दृढप्रतिष्ठितम्। तथैव नानाविधवृत्तानां प्रयोगेण परिवर्तनेन च वृत्तवैविध्यविनिवेशननियमपि पर्यपालयत्।

**माघस्य परिचयः-**

माघस्य पिता दत्तकः पितामहः सुप्रभदेवः स च वर्तलातराजस्य धर्मसचिव इति वर्तलातः महापितामहस्य धर्मसचिवस्य सुप्रभेदवस्य उपदेशान् सश्रद्धं श्रुत्वा तदनुष्णनम् अकार्षीदिति च शिशुपालवधे माघकृतकविवंशवर्णनेन ज्ञायते। तादृशे अन्वये माघस्य सहजतयैव कवित्वं, राजनीतिपाण्डित्यं च सम्प्राप्तं अतो हि माघः स्वीयशिशुपावधाख्ये काव्ये राजनीतिधर्मपोषणे सफलताम् अलभत्।

**पौराणिकतत्त्वानि-**

श्रीमद्भागवतस्य दशमस्कन्धस्य चतुःसप्तसतितमे अध्याये तथा च महाभारतस्य सभापर्णस्य त्रयस्त्रिंशाध्यायतः पञ्चचत्वारिंशत् अध्यायपर्यन्तमस्ति इयं कथा श्रीमद्भागवते सूक्ष्मरूपेण वर्तते तस्यां लिखितम्- राजसूययज्ञे युधिष्ठिरः कस्य अग्रपूजां स्यात् तस्मिन् समये सहदेवेन उक्तम्-

**अर्हति ह्यचुतःश्रेष्ठ्यं भगवान् सात्वतां पतिः।**
**एष वै देवताः सर्वा देशकालधनादयः॥**[1]

सहदेवेन उक्तं भगवान् कृष्ण एव अग्रपूजायाः अधिकारी वर्तते। सहदेवस्य वचनस्य सर्वैः अनुमोदनमपि कृतम्।

तदा युधिष्ठिरः कृष्णस्य पूजां कर्तुं उद्यतः तस्मिन्नेव काले शिशुपालः कृष्णस्य निन्दां करोति श्रीकृष्णं प्रति अपशब्दैः आक्षेपं कृतवान् यत्-

**सदस्पतीनतिक्रम्य गोपालः कुलपांसनः।**
**यथा काकः पुरोडाशं सपर्यां कथमर्हति॥**[2]

शिशुपालस्य कर्कशवचनैः भगवतः कृष्णेन स्वसुदर्शनचक्रेण शिशुपालस्य सिरस्य छेदनं कृतम्।

**तावदुत्थाय भगवान् स्वान् निवार्य स्वयं रुषा।**
**शिरः क्षुरानतचक्रेण जहारापतलो रिपोः॥**[3]

---

1. भागवत. 10.74.19
2. भागवत. 10.74.43
3. भागवत. 10.741.43

महाभारते इयं कथा विस्तृततरूपेण वर्तते। एतस्य महाकाव्यस्य रचना महाकविना महाभारतस्य कथायाः आधारीकृत्य लिखितम्। एतदेव कतिपयश्लोकाः महाभारतस्य श्लोकैः सदृशाः एव सन्ति अधस्तात् लिखितानां महाभारतस्य श्लोकानां शिशुपालवधस्य श्लोकैः सह साम्यता इति।

**महाभारते–**

**आचार्यमृत्विजञ्चैव संयुजञ्च युधिष्ठिर।**
**स्नोतक च प्रियं प्राहुः षडर्घ्याहान् नृपं तथा।।**[1]

**शिशुपालवधे–**

**स्नातकं गुरुमभीष्टमृत्विजं संयुजा च सह मेदिनीपतिम्।**
**अर्घभाज इति कीर्तयन्ति षट् ते च ते युगपदागताः सदः।।**[2]

उभयोः श्लोकयोर्मध्ये लेशमात्रमपि भिन्नता न दृश्यते अतः पौराणिकसन्दर्भे अपि महाकविमाघस्य पूर्णवैशिष्ट्यं दृश्यते अपि च महाभारते–

**एतानर्घ्यानभिगतानाहुः संवत्सरोषितान्।**
**त इमे कालपूगस्य महतोऽस्मानुपागता।।**[3]

**शिशुपालवधे–**

**शोभयन्ति परितः प्रतापिनो मन्त्रशक्तिविनिवारितापदः।**
**त्वन्मखं मुखभुवः स्वयम्भुवो भूभुजश्च परलोकजिष्णवः।।**[4]

एतयोः द्वयोः श्लोकयोः भावः एकमेव वर्तते यत् एतेषां ब्राह्मणानां मन्त्रैः अयं यज्ञः सुशोभितः इति। अपि च–

---

1. महाभा. 2.36.23
2. शिशु. 14.55
3. महाभा. 2.36.24
4. शिशु. 14.56

**महाभारते-**

**एषामेकैकशो राजन्नर्घमानीयतामिति।**
**अथ चैषां वरिष्ठाय समर्थायोपनीयताम्॥**[1]

**शिशुपालवधे-**

**आभजन्ति गुणिनः पृथक्पृथक्पार्थ सत्कृतिमकृत्रिमाममी।**
**एक एव गुणवत्तमोऽथवा पूज्य इत्ययमपीष्यते विधिः॥**[2]

**अपि च महाभारते-**

**अथ वाभ्यर्चनीयोऽयं युष्माकं मधुसूदनः।**
**किं राजभिरिहानीतैरवमानाय भारत॥**[3]

**शिशुपालवधे-**

**नरसिंहमूर्तिरयमेव दितिसुतमदारयन्नखैः।**
**आप्तजनवचनमेतदपि प्रतिपत्तुमोमिति जनोऽयमर्हति॥**[4]

एतयोः श्लोकयोः मध्ये भेदः न दृश्यते। भावस्तु एकमेव यत् अयमेव भगवान्नापरो नरसिंहमूर्तिमाश्रित्य नखैर्दैत्येन्द्रमदारयदित्येतदवाप्याप्तजनवचनं शिष्टवाक्यमयं मनीषीजनः प्रतिपत्तुमर्हति नान्यः। आप्तोक्तत्वात्-पण्डिता एव सत्यं जान्तीत्यर्थः। आप्ता अवितथवादिनो व्यासादयः।

महाभारते भीष्मेन प्रतिज्ञा कृता यत् मम मूर्ध्निपदे सर्वे राजानः सन्ति। एवंविधः अर्थः शिशुपालवधे अपि वर्तते। यथा-

**पशुवद् घातनं वा मे दहनं वा कटाग्निना।**
**क्रियतां मूर्ध्नि वो न्यस्तं मयेदं सकलं पदम्॥**[5]

1. महाभा. 2.36.25
2. शिशु. 14.57
3. महाभा. 2.37.18
4. शिशु. 15.18
5. महाभा. 2.44.40

**शिशुपालवधे-**

**विहितं मयाद्य सदसीदमपमृषितमच्युतार्चनम्।**
**यस्य नमयतु स चापमयं चरणः कृतः शिरसि सर्वभूभृताम्।।**[1]

अस्मिंश्लोकेऽपि भीष्मेण भाषितस्योक्तस्य वचसोऽर्थमभिधेयं शिरसि पादन्यासरूपं क्षणादधिगतवताम्, प्राप्तवतामिव सतामित्यर्थः। शिशुपालस्य पक्षा ये पृथिवीभृतो राजानस्तेषामसौ गुणेऽतिमात्रं क्षोभं क्रोधं विकारमगमत्।

महाभारते युधिष्ठिरः भगवन्तं कृष्णं अग्रपूजायाः कृते आहूतवान् तस्मिन्नेव समये शिशुपालः कृष्णं प्रति तथा च कृष्णपूजायाः विरोधं कृतवान्।

**महाभारते-**

**प्रतिजग्राहतत्कृष्णः शास्त्रदृष्टेन कर्मणा।**
**शिशुपालस्तु तां पूजां वासुदेवे च चक्षमे।।**[2]

**शिशुपालवधे-**

**अथ तत्र पाण्डुतनयेन सदसि विहितं मुरद्विषः।**
**मानमसहत न चेदिपतिः परिवृद्धिमत्सरि मनो हि मानिनाम्।।**[3]

श्लोऽस्मिन् चेदिनरेशः दमघोषपुत्रः मात्सर्यवशात् भगवन्तं कृष्णं अग्रपूजायाः अधिकारी न मन्ये।

उपरिलिखितानां कतिपय उद्धरणानां तथा च शिशुपालवधस्य स्थलानां साम्यतया स्पष्टं भवति यत् महाकविना माघेन स्वकृत्यां केवलं महाभारतस्य कथा एव न अपितु श्लोकानामपि आधारः नीतः ग्रहीतश्च।

परञ्च महाभारते शिशुपाल कृता भगवतः निन्दया क्रुद्धः सहदेवः भूमौ स्वपादं निधाय विपक्षीनां कृते उक्तवचनानि वदति-

1. शिशु. 15.46
2. महाभा. 2.36.31
3. शिशु. 15.1

**केशवं केशिहन्तारमप्रमेयपराक्रमम्।**
**पूज्यमानं मया यो वः कृष्णं न सहते नृपः॥**

**सर्वेषां बलिनां मूर्ध्नि मयेदं निहितं पदम्।**
**एवमुक्ते मया सम्यगुत्तरं प्रब्रवीतु सः॥**

**स एव हि मया वध्यो भविष्यति न संशयः॥**[1]

परं शिशुपालवधमहाकाव्ये सहदेवेन न भीष्मेण उक्तं निम्नवचनानि-

**अथ गौरवेण परिवादमपरिगणयंस्तमात्मनः।**
**प्राह मुररिपुतिरस्करणक्षुभितः स्म वाचमिति जाह्नवीसुतः॥**

**विहितं मयाद्य सदसीदमपमृषितमच्युतार्चनम्।**
**यस्य नमयतु स चापमयं चरणः कृतः शिरसि सर्वभूभृताम्॥**[2]

शिशुपालवधस्य प्रथमसर्गे हिरण्यकशिपोः वधस्य प्रसङ्ग वर्तते तत् श्रीमद्भागवते विस्तृतरूपेण वर्तते परं शिशुपालवधे एवं लिखितम्-

**सटाच्छटाभिन्नघनेन बिभ्रता नृसिंह सैहीमतनुं तनुं त्वया।**
**स मुग्ध कान्तास्तनसङ्गभङ्गुरैरुरोर्विदारं प्रतिचस्करे नखैः॥**[3]

**श्रीमद्भागवते इत्थं वर्तते-**

**विष्वक् पुरन्तु ग्रहणातुरं हरिव्यालो यथाऽऽखुं कुलिशाक्षतत्वचम्।**
**द्वार्यूर आपात्य ददार लीलया, नखैर्यधाहि गुरुडो महाविषम्॥**[4]

शिशुपालवधे द्वितीयसर्गे बलरामेण बलरामेण कृष्णं प्रति उक्तम्-

**त्वया विप्रकृतश्चैद्यो रुक्मिणी हरता हरे।**
**बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः॥**[5]

---

1. महाभा. 39.1-4
2. शिशु. 15.45-46
3. शिशु. 1.47
4. भागवत. 7.07.29
5. शिशु. 2.38

**रुक्मिणीं हरता बन्धुभिस्तस्मै**
**प्रदत्तां राक्षसर्मेण द्वहते न्यर्थः।**
**गान्धर्वो राक्षसश्चैव**
**धर्मो क्षत्रस्य तौ स्मृतौ[1]।।**

मनुस्मृत्या मनुना उक्तं गान्धर्वविवाहः राक्षसविवाहश्च क्षत्रियो धर्मः वर्तते तस्मादेव कारणात् श्रीमद्भागवते रुक्मण्याः पत्रं पठित्वा भगवतः कृष्णेन रुक्मण्याः हरणं कृतम्।

**भागवते रुक्मिणी श्रीकृष्णं पत्रे एवं लिखति-**

**श्रुत्वा गुणान् भुवनसुन्दरश्रृण्वतां ते**
**निर्विश्यक कर्णविवरैर्हरतोङ्गतापम्।**
**रूपं दृशां दृशमतामखिलार्थलाभं**
**त्वय्यच्युताविशति चित्रमपत्रपं मे।।[2]**

रुक्मिण्याः एवं पत्रं पठित्वा भगवतः कृष्णेन विदर्भ देशं गत्वा रुक्मिण्याः हरणं कृतम्।

**तं राजकन्यां रथमारुरुक्षतीं जहार**
**कृष्णो द्विषतां समीक्षणम्।**
**रथं समारोप्य सुपर्णलक्षणं**
**राजन्यचक्रं परिभूय माधवः।।[3]**

**ततो ययौ रामपुरोगमैः शनैः सृगालमध्वादिव भागद्धवरिः।।[4]**

शिशुपालवधे द्वितीयाङ्के अयं श्लोकः अपि भागवतसम्बद्धः वर्तते।-

**तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।**
**हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्।।[5]**

---

1. मनु. 3.26
2. भाग. 10.52.37
3. भाग. 10.53.55
4. भाग. 10.53.56
5. शिशु. 2.49

स्वर्भानु राहुरपराधे तुल्येऽपि भानुमन्तं सूर्यं चिरेण ग्रसने श्रीमद्भागवते–

**शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत्।**
**यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः॥**[1]

अस्मिन्नपि श्लोके तादृश एव भावः विद्यते। तस्य शिरः अमरत्वं प्राप्तं, ब्रह्मणा तदेव ग्रहः इति उक्तः। स एव वीर भावेन पूर्णिमा, अमावस्यां चन्द्रसूर्ययोः उपरि आक्रमणं करोति।

शिशुपालवधस्य पञ्चमे सर्गे महाभारतस्य कथायाः सङ्केतः अस्ति अस्मिन् श्लोके यथा–

**सार्धं कथञ्चिदुचितैः पिचुमर्दपत्रै–**
**रास्यान्तरालगतमाम्रदलं म्रदीयः।**
**दासेरकः सपदि संवलितं निषादैर्विप्रं**
**पुरा पतगराडिव निर्जगार॥**[2]

कथंचित् प्रमादात् आस्यान्तरालगतं मुखान्तगं म्रदीयो मृदुत्तरमोम्रदलं चूतपल्लवं दासेरक उष्ट्रःपुरा निषादैर्म्लेच्छैः संवलितं युक्तं विप्र पतगराट् गरुत्मानिव निर्जगार उद्गीर्णवान्। पुरा किल कुतश्चित्कारणात् म्लेच्छ–भक्षणे तैः सह अन्नः प्रविश्य गलं दहन्तं गरुड उज्जगारेति पैराणिकी कथा यथा महाभारते।

**तस्य कण्ठमनुप्राप्तो ब्राह्मणः सह भार्यया।**
**दहन् दीप्त इवाङ्गरस्तमुवाचान्तरिक्षगः॥**[3]
**द्विजोत्तम विनिर्गच्द्व तूर्णमास्यादपावृतात्।**
**न हि मे ब्राह्मणो वध्यः पापेष्वपि रतः सदा॥**[4]

एतयोः द्वयोः श्लोकयोः भावोपि शिशुपालधस्य श्लोकसदृशः वर्तते। शिशुपालवधस्य पञ्चमे सर्गे रैवतकेन भगवन्तं श्रीकृष्णमित्थमुक्तम्–

---

1. भाग. 8.9.26
2. शिशु. 5.66
3. महाभा. आदिपर्व 29.1
4. महाभा. आदिपर्व 29.2

**धरस्योद्धर्ताऽसि त्वमिति ननु सर्वत्र जगति,**
**प्रतीतस्तत्किं मामतिभरमधः प्रापिपयिषुः।**
**उपालब्धेवोच्चैर्गिरिपतिरिति श्रीपतिमसौ,**
**बलक्रान्तः क्रीडद्‌द्विरदमथितोर्वीरुहरवैः॥**[1]

वलैः सैन्येराक्रान्तो गिरिपतिः रैवतकः क्रीडद्भिर्विरमाणौर्द्धिरदैर्मथितानां भग्नानामुर्वोरुहाणां वृक्षाणां रवैः शब्दैर्निमित्तेन श्रीपतिं! नन्वङ्गन्वं धरस्य पर्वतस्योद्धर्ता उद्धारकोऽसीति सर्वत्र जगति प्रसिद्धः। गोवर्धनोद्धारणादिति भावः, तन्नर्हि किं किमर्थमतिभरमतिभारवन्तं मामद्यः प्रापयिषु प्रापयितु-मिच्छुरसि।

**श्रीमद्‌भागवते यथा-**

**इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम्।**
**दधार लीलया कृष्णश्छत्राकमिव पर्वतम्॥**[2]

अस्मिन् श्लोके कृष्णेन यथा बालकः ग्रीष्मर्तौ छत्रकं स्व हस्ते धारयति तथैव कृष्णः अपि गोवर्धनं स्वहस्ते धारयति।

**उपसंहारः-**

शिशुपालवधमहाकाव्यस्य अध्ययनेन ज्ञायते यत् एतस्य महाकाव्यस्य कथायाः मूलं महाभारतमिति तथा च श्रीमद्‌भागवतमपि। यतोहि महाभारतस्य कतिपय उद्धरणानां तथा च शिशुपालवधस्य स्थलानां मध्ये साम्यता वर्तते अनेन स्पष्टं भवति यत् महाकविना माघेन स्वकृतिः "शिशुपालवधम्" महाभारतस्य कथा एव न अपितु श्लोकानामाधारमपि वर्तते।

इदं महाकाव्यं विंशतिसर्गात्मकं वर्तते। एतस्मिन् सर्वे गुणाः वर्तन्ते। एतस्य अध्ययनेन अवश्यमेव परमशान्तिमनुभवन्ति पाठकाः। तथा च संस्कृतसाहित्यवाङ्मये इदं काव्यम् उच्चतरं स्थानं प्राप्नोतीति न संशयः।

✦✦✦

1. शिशु. 5.69
2. भाग. 10.25.11

# शिशुपालवधमहाकाव्ये गुणविचारः

**श्रीदेवकीनन्दनशर्मा**

शोधच्छात्रः, साहित्यविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रिय–

संस्कृतविश्वविद्यालयः, नवदेहली–16

विदुषामानन्दस्यन्दं साहित्यमनेकधारासु प्रवहति। कदाचित् उच्चावचः, कस्मिश्चित् समतलं, कुत्रचित् उच्चस्थानादधो प्रवाहश्च भवन्ति। सुरस्त्रोतस्विन्याः प्रवाहमिव सत्कवीनां वाणीष्वपि साहित्यधारा स्वस्वभावसुन्दरत्वेन स्वकीयं सर्वस्वमवाचकत्वेनैवाप्नोति। कथमेतत् सम्भवतीति जिज्ञासायाः समाधानाय काव्यशास्त्रं तस्यैवाङ्गतयोद्घोष्यते साहित्यशास्त्रिभिः। तद्यथा –

**एवमस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलत्वमिति**[1]

अनेन स्पष्टमेतत् यत् काव्यकाव्यशास्त्रयोः सम्बन्धस्तु भवत्येव। काव्यशास्त्रे काव्यस्य भेदप्रभेदानां, काव्ये विद्यमानानां गुण–रीति–रस–अलंकारादीनां लक्षणं लक्ष्यते। तेषामेव लक्षणानामाधारेण काव्यस्योत्तमाधमत्वमप्युपस्थाप्यते। साहित्यदर्पणकारेण काव्यस्य सर्वप्रथमं द्विधा विभाजनमुपस्थापितमस्ति–

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।**[2]

तत्र दृश्यकाव्यान्तर्गतं नाटकादयः तथा श्रव्यकाव्यान्तर्गतं महाकाव्य–खण्डकाव्यादयश्च भवन्ति। रसः काव्यस्य परमं तत्त्वमिति प्रायेण सर्वेऽपि अङ्गीकुर्वन्ति। यतो हि रसः चित्तोद्रेककारकः भवति। उक्तमपि–

---

1. सा.द.
2. सा.द. 6.1

**सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**[1]

सर्वेष्वपि काव्यमहाकाव्येषु रसस्तु प्राधान्यं भज्येत। एतस्माद् मल्लिनाथेनोक्तमपि यत् महाकविमाघविरचिते शिशुपालवधमहाकाव्ये अङ्गीरसः वीररसः इति। अस्यैव महाकाव्यस्य गुणविषयकाख्यानात् पूर्वमत्रादौ काव्यस्य अनुन्मीलितरहस्यमुपस्थाप्यते -

कस्मिंश्चिदपि काव्ये कविः वक्तु औचित्यानुरूपं पदशय्यायाः विधानं विदधाति। पदशय्यायां यद्यनुरूपवर्णानां प्रयोगः न स्यात्तर्हि तत्र तादृशी भावाभिव्यक्तिः न सम्भवति। यदि कश्चिदेवं सम्भावयेत् यत् दिवसे श्रूयमाणध्वनिनामेव यदि रात्रौ एकाकि एव जनः तामेव ध्वनिं विपिने शृणोति तदा सः विभ्यत्यपितु दिवसे तस्य भयराहित्यं भवति। कथमित्यवसानाय तत्र देशकालौचित्यानुसारेणैव तस्य ध्वनेरपि ध्वननत्वात् तदनुकूलमेव ध्वननं भवति। रात्रौ एकान्तत्वात् ध्वनेरधिकं गाम्भीर्यं भवति परञ्च दिवसे चाकचिक्यत्वात् तस्यैव ध्वनेः सामान्येनावगतिः जायते।

एतस्मात् लोकव्यवहारादेतत् स्पष्टतामेति यत् रसानुरणनानुरूपमेव वर्णानां पदशय्यायां प्रयोगेण तस्य रसस्योत्कर्षः प्रकर्षतामधिगच्छतीति। गुणानां रसेन सह सम्बन्धाय उक्तमपि आचार्यमम्मटेन–

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥**[2]

मम्मटाभिमतं गुणानामाख्यानं रसस्याङ्गीधर्मत्वेन समालोक्यते। यथा शौर्यादय आत्मनः भवन्ति तथैव माधुर्यौजप्रसादाख्याः गुणारपि रसस्योत्कर्षाधायकाः भवन्ति। यद्यपि वर्णविषयकाः गुणाः तथा च पदविषयिणी रीतयः भवन्ति। वर्णानां प्रयोगेणैव पदानां निर्माणं जायते। एतस्मादेव पदादर्थावगतिर्जायते सम्भाव्यते वा तदपि अर्थस्याभिव्यक्तौ वर्णानामपि विशिष्टं साहाय्यं भवति। उक्तमपि लक्षणोपस्थापनावसरे आचार्यमम्मटेन।

1. सा.द. 3.2
2. का.प्र. 8

अदौ माधुर्यं लक्ष्यति। यथा–

**आह्लादकत्वं माधुर्यं शृंगारे द्रुतिकारणम्।**
**करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्।।**[1]

शृंगारे माधुर्ययुक्ता रचना द्रुतिकारणं भवति तथा च सैव रचना करुणे विप्रलम्भे शान्ते च द्रवणत्वातिशयकारिणी भवतीति। महाकवि–माघविरचिते शिशुपालवधमहाकाव्येऽपि संयोगविप्रलम्भयो उत्कर्षः दरीदृश्यते। तत्रादौ एतत् प्रस्तूयते यत् माघकाव्यस्याङ्गीरसः वीरः वरीवर्तते, परन्तु महाकविना अङ्गरसेषु शृंगाररसस्य प्राधान्यमङ्गीकृतम्। सम्पूर्णसप्तसर्गेषु कविना शृंगाररसस्यैव वर्णनंशृंगारी कविरिव कृतम्। तस्मिनेव वर्णनप्रसङ्गे माधुर्यगुणस्योत्कर्षः प्रदर्श्यते। यथा–

**बिम्बोष्ठं बहु मनुते तुरङ्गवक्र–**
**श्चुम्बन्तं मुखमिह किन्नरं प्रियायाः।**
**श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीमुतुङ्ग–**
**स्तनभरभङ्गभीरुमध्याम्।।**[2]

श्लोकेऽस्मिन् तठडढवर्णानामभावः तथा अल्पसमासत्वं स्पष्टमेव प्रतिभासते। माधुर्यवती पदान्तरयोगेन नाम वर्गान्त्यवर्णानां प्रयोगेण रचनेयं माधुर्यस्य व्यञ्जिका वर्तते। माधुर्यगुणाभिव्यक्तौ किं सम्भवेदित्यनेन प्रकारेण अवतर्यते–

**मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।**
**अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।।**[3]

उक्तलक्षणानुरूपमेव महाकविः पद्येऽस्मिन्नपि विधानत्वादर्थस्याभिव्यक्तौ चमत्कारितां विसृजति। पद्येऽस्मिन् प्रतिपदं प्रायेण वर्गात् पृथक् वर्गाणामन्त्यवर्णानां मूर्ध्नि निधानं, कोमलवर्णानां प्रयोगः श्लोके प्रतिपादितस्य शृङ्गाररसस्योत्कर्षमेव करोतीति। महाकविमाघेनाऽपि गुणानां सङ्केतः क्रियते–

---

1. का.प्र. 8
2. शि.व. 4.38
3. का.प्र. 8.74

**अतिकोमलमकतोऽन्यतः सरसाम्भोरुहवृत्तकर्कशम्।**
**वहति स्फुटमेकमेव ते वचनं शाकपलाशदेश्यताम्।।**[1]

अतिकोमलशब्देनात्र महाकविना माधुर्यस्य कर्कशामित्यनेन च ओजगुणस्य रचनायां सङ्केतः कृतः। नवमे सर्गे माधुर्यगुणस्योत्कर्षः यथा–

**राजीवराजीवशलोलभृङ्गं**
**मुष्णन्तमुष्णं ततिभिस्तरूणाम्।**
**कान्तालकान्ता ललनाः सुराणां**
**रक्षोभिरक्षोभिस्तमुद्वहन्तम्।।**[2]

रैवतकवर्णननाम्नः चतुर्थसर्गे भगवान् श्रीकृष्णः विचित्रधातुभिः सह तं रैवतगिरिं ददर्श। महाकविः भगवतः नेत्राभ्यां दृष्टं रैवतकगिरे अलौकिकसौन्दर्यवर्णनम् अकरोत्। यमकालंकारयुक्ते पद्येऽस्मिन् माधुर्य-व्यञ्जक- वर्णानां साहचर्येण अत्यधिकं चमत्कारं संजायते। श्लोके "न्त न्त ण्" इत्येतेषां वर्णानामावृत्तित्वात् श्लोकार्थः द्रुत्यालोडितः जायते। प्रभातवर्णनप्रसङ्गे माधुर्यगुणस्योदाहरणम्–

**विकचकमलगन्धैरन्धयन्भृङ्गमालाः**
**सुरभितमकरन्दं मन्दमावाति वातः।**
**प्रमदमदनमाद्यद्यौवनोद्दामरामा**
**रमणरभसखेदस्वेदविच्छेददक्षः।।**[3]

एकादशसर्गस्य श्लोकेऽस्मिन् प्रभातकालीननिलयस्य मन्दत्वं, शीतलत्वं, विकसितकमलयुक्तसुरभिं चात्र द्योतयति। कविः श्लोकस्य पूर्वार्धे अतिमाधुर्ययुक्तवर्णानां प्रयोगः करोति। यथा– "न्धै, न्ध, न्भृ, ङ्ग, न्दं न्द" इत्यादिवर्णैः सह कोमलवर्णानामक्षरव्यक्तित्वादत्र प्रभातवर्णनमाध्यमेन प्रमदानां मदोद्दामकारिण्यानिलस्य वर्णनमेतैः वर्णैः सह गुम्फनेनाद्वितीयां चमत्कारितां विधत्ते। एवमेव माधुर्यगुणस्य अन्यान्यनेकान्युद्धरणान्यस्मिन्

---

1. शि.व. 16.18
2. शि.व. 4.9
3. शि.व. 11.19

महाकाव्ये विलसन्ति। शिशुपालवधमहाकाव्ये ओजगुणः-

महाकाव्यस्याऽस्याङ्गी रसः वीररसत्वादस्मिन् महाकाव्ये ओजगुणस्य प्राचुर्यम् अप्रतिमं वरीवर्तते। कस्मादिति चेत्तर्हि तस्य कारणं प्रस्तावनाया-मुन्मीलितम्। चेदिनरेशस्य वधः महाकाव्येऽस्मिन् वर्णितमस्ति। तस्य वर्णनस्यैव दीप्त्यै ओजगुणाश्रितायाः रचनायाः कविः रसावलम्बत्वेन प्रयोगः करोति। वीररसस्य वर्णनप्रसङ्गे ओजगुणस्यैव प्रयोग इत्यस्मिन् विषये लाक्षणिकानां मतं पुरस्क्रियते-

**दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।**[1]

**बीभरौद्ररसयोस्तस्याधिक्यं क्रमेण च।**[2]

ओजगुणः वीररसे सम्भवति अथ च बीभत्से रौद्रे च सातिशयमेति उक्तं तत्रैव वृत्यंशे-

**वीराद्बीभत्से रौद्रे सातिशयमोजः।**[3]

अतः महाकविना प्रयुज्यमाने वीररसस्याङ्गरसाणामप्यत्यन्तमहाह्लाद-कत्वेन चित्रणमुपस्थापितमस्ति। विंशति सर्गे प्राचुर्येण प्रतिनायकगतरौद्ररसस्य वर्णनमनेकस्थलेषु दृश्यते। युद्धवर्णनप्रसङ्गे गजादीनां रक्तास्त्रावस्य अङ-विच्छेदस्य रक्तातिशयेन पङ्कप्लावितभूमेत्यादीनां बीभत्सरसस्य वीराङ्गत्वेन वर्णनं प्राप्यते। परमत्र वीररसस्यैव कानिचिद्दुद्धरणान्युपस्थाप्यन्ते-

**यतः स भर्ता जगतां जगाम**
**धर्त्रा धरित्र्याः फणिना ततोऽधः।**
**पहाभराभुग्नशिरःसहस्त्रसाहाय-**
**काव्यग्रभुजं प्रसस्त्रे।।**[4]

असौ श्लोकः पुरीप्रस्थाननाम्नः सर्गस्य भगवतः श्रीकृष्णस्य पुरीप्रस्थानयात्रां वर्णयन् कविः प्रस्तौति। भगवान् येन मार्गेण अगच्छत्, तदा

1. का.प्र.सू. 9
2. का.प्र.सू. 12
3. का.प्र.
4. शि.व. 3.25

धरित्र्याः धर्तुः शेषनागस्य सहस्रफणाः भगवतः भारेण विनम्राः संजाताः। भगवतः दिव्यवर्णनमिदं कविनां ओजयुक्तवर्णेषु विरच्यते। समासगाढत्वादत्र निम्नवर्णानां प्रयोगः यथा– "स, ध, त्र, र, फ, त, ज, ग, म, ह, स्त्र, ग्र, प्र, स्त्रे" इति। शेषनागस्य स्थितिरेभिः वर्णैः वीररसानुगुणमेव प्रतीयते। यदुवंशक्षोभनाम्नः सप्तदशसर्गस्योदाहरणम्–

**द्रुतद्रवद्रथचरणक्षतक्षमात–**
**लोल्लसद्बहुलरजोवगुण्ठितम्।**
**युगक्षयक्षणनिरवग्रहे जगत्पयो–**
**निधेर्जल इव मग्नमाबभौ।।**[1]

श्लोकेऽस्मिन् सघनरजस्य सादृश्यं प्रलयकालेन सह क्रियते। श्लोकपठनेनैव ओजगुणस्याभिव्यक्तिः जायते, ओजोऽभिव्यञ्जकवर्णानामावृत्तिः पुनः पुनः भवति। शिशुपालकृष्णयोः युद्धकाले ओजगुणयुक्ताः श्लोकाः अङ्गीरसवीरत्वादतिशयसौन्दर्यमभिव्यञ्जयन्ति। श्लोके आधिक्येन महाप्राण–वर्णानामेव अथ च संयुक्तवर्णानामेव प्रयोगः वर्तते।

**जनिताशनिशब्दशङ्कमुच्चैर्धनुरास्फालितमध्वनन्नृपेण।**
**चपलानिलचोद्यमानकल्पक्षयकालाग्निशिखानिभस्फुरज्ज्यम्।।**[2]

शिशुपालवधाख्यान्तिमसर्गस्य पद्यमिदं शिशुपालस्य धनुषः भीषणशब्दः सम्पात् विद्युद्वदेवासीत्। ओजव्यञ्जकवर्णैः पद्यमिदं दीप्तत्वमाधत्ते। अतः नायकप्रतिनायकगतवीररौद्राद्यनेकवर्णनप्रसङ्गेषु ओजगुणस्योत्कर्षः प्रकर्षतामेति। अस्मिन् पत्रे अति स्वल्पमेव यथामतिरुपस्कृतम्। प्रसादगुणस्योदाहरणमाचार्येण मम्मटेन प्रसादगुणमित्थं परिभाषितम्–

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।**
**साधारणः समग्राणां स प्रसादो गुणो मतः।।**[3]

---

1. शि.व. 17.60
2. शि.व. 20.7
3. का.प्र. 8.76

**हरत्यघं संप्रति हेतुरेष्यतः**
**शुभस्य पूर्वाचरितैः कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति**
**कालत्रितयेऽपि योग्यताम्।।**[1]

कृष्णनारदसम्भाषणाख्यस्य प्रथमसर्गस्य श्लोकेऽस्मिन् श्रीकृष्णः स्वयमेव त्रिकालज्ञाता भूत्वाऽपि नारदमुनेः महिमागानं कुर्वन् कथयति यत् पुण्यात्मनां दर्शनं तु दुर्लभमस्ति, यतोहि तद्दर्शनं तु पवित्रशरीरधारीणां पुण्यकर्मणैव प्राप्यते। अत्र भगवान् श्रीकृष्णः मुनेः पावनदर्शनेन कल्याण-मनुभवति। श्लोकपठनेनैव अनुभूयतेऽत्र ज्ञायते च यदर्थं सहृदयेभ्योऽति-प्रीतिरूपेण तथा आनन्दवर्धकरूपेण प्रस्फुटो भवति। अन्यदप्युदाहरणम्-

**विदुषीव दर्शनममुष्य युवतिरतिदुर्लभं पुनः।**
**यान्तमनिमिषमतृप्तमनाः पतिमीक्षते स्म भृशमा दृशः पथः।।**[2]

**उपसंहारः**- महाकविमाघविरचिते शिशुपालवधमहाकाव्यमलौकिक-चमत्कारेण अद्वितीयपाण्डित्येन परिप्लावितमस्ति। रसालंकाररीतिगुणानां कविः नाट्यधर्मितया प्रतिपादयति। वस्तुतः गुणाः वर्णविषयत्वात् काव्ये मुख्यां भूमिकामावहन्ति। न केवलं साहित्यशास्त्रैव गुणमाध्यमेन वर्णानां भूमिकारिव भूमिका अपि तु व्याकरणशास्त्रेऽपि वर्णानेव उररीकृत्य भगवता पाणिनिना सूत्राण्युपनिबद्धानि सन्ति। यद्यपि वैयाकरणा अन्विताभिधानमभिलक्ष्य उद्घोषयन्ति-

**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यातिरिक्तपदानां प्रविवेको न विद्यते।।**

परञ्चैतत् स्फोटसिद्धान्तमुररीकृत्य विद्यते। साहित्ये तु औचित्यानु-रूपमेव पदशय्यायां वर्णानुगुणत्वेन कविना क्रियते। तदौचित्यनुसारेणैव शोधपत्रेऽस्मिन् रसाभिव्यक्त्यपेक्षया वर्णानां भूमिका प्रतिपादिता। गुणानां यद्यप्यर्थानुरूपेणाप्याचार्यैः परिभाषा प्रस्तुता परञ्चात्र वर्णमाध्यमेनार्थस्य चमत्कारः प्रस्तुतो वर्तते इति शम्।

1. शि.व. 1.26
2. शि.व. 15.94

# बृहत्त्रय्यां शिशुपालवधमहाकाव्यस्थानम्

**श्रीशैलेन्द्रविक्रमः**

शोधच्छात्रः, साहित्यविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रिय-

संस्कृतविश्वविद्यालयः, नवदेहली-110016

बृहत्त्रय्यां त्रयः गन्थाः किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितं च स्वीक्रियते। येषु किरातार्जनीयं तु स्वाऽर्थगौर्वाय प्रसिद्धः, नैषधकाव्यं तु स्व पदलालित्येन जनानां मध्ये विश्रुतः। परं माघकाव्ये तु एतयोः द्वयोः विशेषतायाः अपरविशेषताः वर्तते। महाकविमाघः तु उपमाप्रयोगे कालिदास-सदृशः विद्वांसः अस्ति। इदं कथ्यते-

**उपमा कालिदासस्य, भारवेऽर्थगौरवम्।**
**दण्डिनः पदलालित्यम्, माघे सन्ति त्रयो गुणाः॥**

बृहत्त्रयीपरम्परायाः प्रथमं महाकाव्यं किरातार्जुनीयं निश्चितरूपेण अर्थगौरवभरितं वर्तते। यस्य सङ्केतः कविना युधिष्ठरवचसो माध्यमेन प्रदत्तः-

**स्फुटता न पदैरपाकृता**
**न च न स्वीकृतमर्थगौरवम्।**
**रचिता पृथगर्थता गिरां**
**न च सामर्थ्यमपोहितं क्वचित्॥**

वस्तुतः महाकाव्यस्यास्य यः अर्थगौरवः कविना विवक्षितः सोऽपि अनेन सन्दर्भणैव सिद्ध्यति।

**तपसा तथा न मुदमस्य ययौ**
**भगवान्यथा विपुलसत्त्वतया॥**

**गुणसंहतेः समतिरिक्तमहो,**
**निजमेव सत्त्वमुपकारि सताम्॥**

महाकविमाघप्रणीतासु सूक्तिष्वपि जीवनस्य मार्मिककाव्यानुभवाः प्रेरणास्पदाः सन्देशाश्चावलोक्यन्ते। जनानां राजनैतिकजीवनेऽपि बुद्धिमत्ताया: महती आवश्यकता तेन द्वितीयसर्गे प्रमाणिता **"निपुणता एव महारम्भङ्कुर्वन्ति नाऽल्पज्ञाः" "प्रमाद्यतो नश्यन्त्यर्थाः"** कथापि खलु पापानाममलमश्रेयसे यतः पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः इत्यादि काव्यात्मकाः लोकजीवनसाधकाः भावास्समायान्ति।

श्रीहर्षप्रणीते नैषधीयचरितमहाकाव्ये भारतीयसंस्कृतेर्विशिष्टा प्रस्तुतिः परिलक्ष्यते।

**अधीतिबोधचरणप्रचारणै-**
**र्दशश्चतस्रः प्रणयन्नुपाधिभिः।**
**चतुर्दशत्वं कृतवान् कुतः स्वयं**
**न वेद्मि विद्यासु चतुर्दशस्वयम्॥**[1]

त्रयाणां समाहारः त्रयी। 'बृहती च सा त्रयी बृहत्त्रयी' त्रयो वेदाः त्रयीशब्दवाच्याः प्रसिद्धाः। काव्यम् इदं वेदसाधर्म्य धर्मोपदेशादिना लभ्यत इति। अत्रापि त्रयी शब्दस्य सार्थकता विद्यते।

**बृहत्त्रयीपरिचयः**

संसारे अनेके ग्रन्थाः सन्ति परन्तु बृहत्त्रय्यां केवलं शिशुपालवधस्य किरातार्जुनीयस्य नैषधीयचरितस्यैव उल्लेख कृतः। अन्ये ग्रन्थाः बृहत्त्रय्यान्तर्गते किं न प्रवेष्टुं शक्नुवन्ति अयं विचारणीयः प्रश्नः।

अस्मिन् संदर्भे तत् काव्यं बृहत्त्रय्याम् आगच्छति यत् तस्यां विशेषतां धारयति बृहत्त्रय्याः विशेषता अधोलिखिता।

(1) महाकाव्यस्य विषयवस्तुः तस्य गम्भीर्यम्।

(2) कथा वस्तोः ऐतिहासिकत्वम्।

1. नैषधम्

(3) गहनदर्शनतत्त्वसमाकलनम्।

(4) अलङ्कारप्रयोगवैचित्र्यम्।

(5) कल्पनाकलापाभिव्यञ्जनेन स्वकीयां वैशिष्ट्यम्। अतो बृहत्त्रयीति विशिष्टाभिधानं धारयति, विशिष्टामलङ्कृतिचमत्कृतिमयीं गहनगम्भीरां शैलीं विवृणोति।

सम्पूर्णसाहित्यक्षेत्रे उपर्युक्तलक्षणयुक्तस्य केवलं त्रीणि काव्यानि शिशुपालवधं किरातार्जुनीयं नैषधीयचरितं च सन्ति। त्रीणि महाकाव्यानि संस्कृतसाहित्यक्षेत्रे विशिष्टं स्थानं लभन्ते। बृहत्त्रयीपरम्परायाः प्रथमं महाकाव्यं किरातार्जुनीयं निश्चिततरूपेण अर्थगौरवभरितं वर्तते। किरातार्जुनीये सांख्य-योग-वेदान्त-मीमांसा-न्यायादिदर्शनानां तत्त्वानि यान्युपलभ्यन्ते, तान्यपि समग्रतो व्याख्यातव्यानि।

नैषधीयचरितं नूनमस्यां बृहत्त्रयीकाव्यपरम्परायाम् उत्कृष्टतमं स्थानं लभते। श्रीहर्षस्य काव्ये शब्दच्छटायाः प्राधान्यं दृश्यते। तत्रापि चालङ्कारप्रयोग-वैचित्र्यमपि परिलक्ष्यते। शिशुपालवधकाव्येऽपि भाव-भाषाऽऽलङ्कारिता कृत्रिमतादिदृष्ट्या शब्दार्थविस्फोरणमावश्यकं वर्णनानां प्राचुर्यात्, अलङ्काराणां भारवत्वाच्च माघस्य शैल्यामर्थगौरवं भाषाया कृत्रिमत्वञ्च दृश्यते।

भारवि-माघ-श्रीहर्षकवीनां यानि त्रीणि बृहत्तानि काव्यानि वर्तन्ते। ते नूनं तेषां प्रतिभाप्रकर्षस्य व्युत्पत्तिवैभवस्य च विलासाः। तत्र शब्दार्थचमत्कारविचार एवं टीकाकाराणां समीक्षकाणामनुसन्धित्सूनाञ्च प्रमुखं प्रतिपदं प्रयोजनञ्च। कविप्रयुक्तानामेषां शब्दानां गूढार्थविचारणमेव कार्यमिदं साधयिष्यति शब्दानां तत्तद्भङ्गिमा, गरिमा, महिमा च अस्माभिरवधारणीयः। शब्दशास्त्र-साहित्यशास्त्र दर्शनशास्त्रज्ञान-वितान-परिष्ठा गरिष्ठाः विद्वांसः शब्दानां चयनं विधाय तेषां सर्वविधमर्थजातं प्रकल्पयिष्यन्ति, प्रचिन्तयिष्यन्ति प्रगुणीकरिष्यन्ति च।

**शिशुपालवधस्य परिचयः—**

बृहत्त्रयीमहाकाव्येष्वन्यतमस्य शिशुपालवधमहाकाव्यस्य रचयिता माघकविः व्युत्पत्तेर्वैशिष्ट्येन पाण्डित्यस्य प्रकर्षेण च विराजितो वर्तते।

महाकविमाघस्य जीवनस्य प्रसिद्धा उक्तिः अस्ति–

**सर्वाधिकारी सुकृताधिकारः**
**श्रीवर्मलाख्यस्य बभूव राज्ञः।**
**असक्तदृष्टिर्विरजाः सदैव**
**देवोऽपरः सुप्रभ देवनामा॥**

महाकविः माघः दन्तकस्य पुत्रः सुप्रभदेवस्य प्रपौत्रश्चासीत्। सुप्रभदेवः गुजराते कस्यचित् राजस्य शासकस्य धर्मलात इति नामधारिणः मन्त्री आसीत्।

श्रीमद्भागवतस्य दशम स्कन्धस्य 71–75 सर्गस्थं विषयवस्तु आधारीकृत्य माघः 'शिशुपालवधम्' इति एकं महाकाव्यं रचितवान्। अस्मिन् महाकाव्ये 20 सर्गाः सन्ति। ऐषु 20 सर्गेषु 1650 श्लोकाः विभिन्नछन्दसु रचिताः सन्ति।

शिशुपालवधस्य कथा श्रीमद्भागवतदशमस्कन्धोत्तरार्द्धे 74 अध्याये प्राप्यते। महाभारतसभापर्वण्यपि 33 अध्यायात् 45 अध्यायपर्यन्तम् कथैषा विद्यमानाऽस्ति।

शिशुपालवधेऽपि पात्राणां व्यवहारे राजधर्मो दण्डनीतिश्च प्रायोगिकरूपेण विन्यस्तं दृश्यते। महाकविमाघेन सूक्तिषु क्वचिच्चार्थान्तरन्यासेषु कण्ठतोऽपि राजधर्मो दण्डनीतिश्च प्रतिपाद्येते। तद्यथा–

**"कथापि खलु पापानामलमश्रेयसे यतः।"**[1]
**"विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा।"**[2]
**"उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा"**[3]

शिशुपालवधनामके महाकाव्ये भगवतः कृष्णस्य चरितं वर्णितम्। अत्र मुख्यघटना श्रीकृष्णेन दुष्टशिशुपालस्य वधः एव। महाकविमाघस्य पाण्डित्यं काव्येस्मिन् स्थाने–स्थाने दृश्यते। शब्दानां प्रयोगे अस्य महत्वं दरीदृश्यते। कविरयं चित्रकाव्यविन्यासेऽपि समर्थः।

---

1. शिशु. 2.40
2. शिशु. 3.34
3. शिशु. 3.37

महाकविः माघः विंशतिसर्गेषु कथावस्तुनः विभाजनं कृत्वा सम्यक् योजयति। नारदस्य आगमनेन प्रथमः सर्गः आरभते, श्रीकृष्णस्य नारदेन सह सम्भाषणे शिशुपालस्य जन्म, शिशुपालस्य दुरागतानि, शिशुपालस्य मारणाय कृष्णस्य इन्द्रप्रस्थनगरं प्रति यात्रा, रवैतकपर्वते विहारः युधिष्ठिरस्य सभावर्णनम्, राजसूयसंदर्भे श्रीकृष्णाय धर्मराजद्वारा अर्घ्यप्रदानं शिशुपालस्य युद्धयात्रा, तस्य श्रीकृष्णेन सह युद्धम् शिशुपालवध इत्यादयः वर्णितः। माघकाव्यस्य नवंसर्गस्य अध्ययनोपरान्त विद्वद्भ्यः कोऽपि नव शब्दो न विद्यते।

द्वितीये सर्गे विद्यमाना राजनीतेरंशाः तत्प्रतिपादनरीतयश्च सर्वैः विद्वद्भिः अत्र न केवलं काव्यगुणा अर्थालंकाराः चित्रबन्धविन्यासा अपितु अनेके विषयाः सन्ति।

**बृहत्त्रय्यां शिशुपालवधस्य स्थानम्–**

शिशुपालवधं महाकाव्यमस्ति। शिशुपालवधस्य बृहत्त्रय्यां स्थान-निर्धारणस्य प्रमुखतत्त्वं महाकविमाघस्य शैली अस्ति। महाभारतस्य कथावस्तु आधारीकृत्य काव्यमिदं विरचितम्। काव्येऽस्मिन् स्वयं भगवान् श्रीकृष्णो नायकः मुख्यरसो वीरः शिशुपालस्य वध एव काव्यास्यास्य मुख्यफलं च। शिशुपालवधमहाकाव्ये अलङ्कारशास्त्रोक्तं काव्यलक्षणमक्षरशः समन्वितो भवति। काव्यमिदं विंशति सर्गेषु विभक्तमस्ति। दिव्यपुरुषः स्वयं भगवान् श्रीकृष्णोऽस्य नायकः। प्रत्येकसर्गस्य शेषभागे छन्दसः परिवर्तनं जातम्। संपूर्णकाव्यमालङ्कारिकशैल्यां विरचितमस्ति। काव्यमिदं समुन्नतकाव्यकलायाः श्रेष्ठं निदर्शनमिति वक्तुं शक्यते।

संस्कृतसाहित्यसंसारे अतुलनीयकवित्वशक्तिसम्पन्नः महाकविः माघः अस्ति। नूतनशब्दानां प्रयोगे माघोऽद्वितीयोऽस्ति। समालोचकाः समस्वरेण स्वीकुर्वन्ति। सम्पूर्णमहाकाव्ये प्रौढपाण्डितस्य प्रतिफलं दृश्यते। अतः समालोचकाः कथयन्ति–

**मेघे माघे गतं वयः।**

समग्रशिशुपालवधमहाकाव्ये 45 छन्दसां प्रयोगः कृतोऽस्ति। तद्यथा–अतिशायिनी, अनुष्टुप्, आर्यागीतिः, इन्द्रवंशा, उद्गता, उपजातिः, उपेन्द्रवज्रा,

औपश्छन्दसिकम्, कुटजा, कुररीरूता, जलधरमाला जलोद्धतगतिः तोटकम्, दोधकम्, द्रुतविलम्बितम्, पञ्चकावली, पथ्या, पुष्पिताग्ता, पृथ्वी, प्रभा, प्रमिताक्षरा, प्रहर्षिणी, भ्रमरविलासितम्, मञ्जूथाषिणी, मत्तमयूरम्, मन्दक्रान्ता, महामालिनी, मालिनी मेधविस्फुर्जिता, रथोद्धता, रमणीयकम्, रूचिरा, वंशपत्रपतितम्, वंशस्थम्, वसन्ततिलका, वैतालीयम्, वैसवदैवी, शार्दूलवि-क्रीडितम्, शालिनी, शिखरिणी सुमङ्गला, स्रग्धरा, स्रमिणी, स्वागता हरिणी च।

संस्कृतसंसारे महाकवेः कालिदासस्य उपमा-भागीरथी, भारवेरर्थ-गौरवं यमुना, दण्डिनः पदलालित्य-सरस्वती च तीर्थराजसदृशे माघकाव्ये विराजन्ते। अतः समालोचकाः कथयन्ति -

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः॥**

शिशुपालवधस्य ऊनविंशतिसर्गे विभिन्नचित्रबन्धानां प्रयोगोऽस्ति। एकाक्षरश्लोकेन सह एकाक्षरपादश्लाकोऽपि तत्रास्ति। अक्षरद्वयसाहाय्येन निर्मिता दश श्लोकाः शिशुपालवधे सन्ति। यमकालङ्कारप्रयोगे माघोऽसाधारण-नैपुण्यं प्रदर्शयति। अस्मिन् महाकाव्ये एकः श्लोकः अस्ति, यत्र तालव्यवर्णानां प्रयोगे न कृतः।

**नामाक्षराणां मलना मा भूद्वर्त्तरतः स्फुटम्।**
**अगृह्णतः पराङ्गनामसूनस्त्रं न मार्गणाः॥**

शिशुपालवधे प्रकृतिपर्यवेक्षणं सुतरां निवेशितम्। एकादशे सर्गे प्रभातवर्णनं प्रकृतेरनावरणं प्रकटीकृतम्। रैवतकपर्वतवर्णने च कोऽपि रमणीयः सौन्दर्यप्रकाशः प्रादुर्भावितः।

यथा–

**उदयति विततोर्ध्वरश्मिरज्जा-**
**वहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिधण्टा-**
**द्वयपरिवारितवारणेन्द्रलीलाम्॥**[1]

1. शिशु. 4.20

पीतोपवीतोधारिणः गौराङ्गस्य नारदस्य आभा कथं भातीति वर्णयन् शरदि आकाशे विद्युदिव चकास्तीति कथयति यथा–

**नवानधोऽधो बृहतः पयोधरान्,**
**समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना,**
**स्फुटोपमं भूतिसितेन शंभुना॥**[1]

आकाशात् अवतीर्यमाणः देवर्षिर्नारदः शरच्चन्द्रधवलः कमल-किञ्जल्कसदृशः पिङ्गलवर्णाः तटाः धारयन् हिमभूमौ रूढाः परिपक्वतया पीतवर्णाः लताः बिभ्राणः पर्वतराजो हिमालय इव विद्योतते स्म। यथा–

**दधानमम्भोरूहकेसरद्युतीर्जटाः**
**शरच्चन्द्रमरीचिशेचिषम्।**
**विपाकपिङ्गास्तुहिनस्थलीरूहो**
**धराधरेन्द्रं व्रततीततीरिव॥**[2]

**राजनैतिकविचारः**

शिशुपालवधेऽपि पात्राणां व्यवहारे राजधर्मो दण्डनीतिश्च प्रायोगिकरूपेण विन्यस्तं दृश्यते। महाकविमाघेन श्लोके क्वचिच्चार्थान्तरन्यासेषु कण्ठतोऽपि राजधर्मो दण्डनीतिश्च सप्रतिपाद्येते। यथा–

**तदेनमुल्लङ्घितशासनं विधे-**
**र्विधेहि कीनाशनिकेतनातिथिम्।**
**शुभेतराचारविपाक्त्रिमापदो**
**निपातनीया हि सतामसाधवः॥**[3]

**षड्गुणाः शक्तयस्तिस्त्रः सिद्धयश्चोदयास्त्रयः।**
**ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽयलम्॥**[4]

1. शिशु. 1.4
2. शिशु. 1.5
3. शिशु. 1.73
4. शिशु. 2.26

**समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः।**
**प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः॥**[1]

**लोकजीवनम्–**

शिशुपालवधे लोकजीवनस्य मार्मिक्यः काव्याभिव्यक्तयो द्रष्टव्यः। लोकजीवनस्य सुखदुःखयो उन्नतावनतभावयोश्च स्मारयन्ती। इहलोकेऽधर्मिणां नाशाय सज्जनानाञ्च परिपालनाय ईश्वरोऽवतरति। मानुषतया वसुदेवसद्मनि श्रीकृष्णस्यावतारो लोकशान्तये राष्ट्रद्रोहिणः शिशुपालस्य वधाय च जातः। एषः सन्देहः इन्द्रेणा देवर्षिनारदमाध्यमेन श्रीकृष्णं प्रति निवेद्यते।

**यथा–**

**लघुकरिष्यन्नतिभारभङ्गुराममुं।**
**किल त्वं त्रिदिवादवतारः॥**

महाभारतस्य सभापर्वसमाश्रिते काव्यकथावृत्तये माघकालिके लोकजीवने विनोदप्रियतायाः प्रवृत्तिर्दरीदृश्यते तत्रेकस्मिन् प्रसङ्गे रैवतकवर्णने हस्तिनो भयेन खरो भृशमुत्पपात अनेन लोकजीवने हासपरिहासप्रवत्तेः सूचना प्राप्यते–

**त्रस्तः समस्तजनहासकरः करेणो–**
**स्तावत्खरः प्रखरमुल्लयाञ्चकार।**
**यावच्चलासनविलोलनितम्बबिम्ब–**
**विस्तस्तवस्त्रमवरोधवधूः पपात॥**[2]

**ग्रामीणचित्रणम्**

शिशुपालवधे ग्राम्यकृषकाणां सहधर्मिणीनां स्वाभाविकं जीवनमुपस्थापयता कविना निगद्यते यत् ताभिः परिरक्षिते क्षेत्रे शुकसमूहः कथं वार्यते अनेन कृषकाणां धान्यादिकार्ये संलग्नानां स्त्रीणां स्वाभाविकी दिनचर्या ज्ञायते, कृष्यादिषु तत्समाजो निर्भर आसीदित्यादि सिध्यति।

**स व्रीहिणां यावदपासितुं गताः**
**शुकान्मृगैस्तावदुपद्रुतश्रियाम्।**

---

1. शिशु. 2.33
2. शिशु. 5.7

**कैदारिकाणामभिंतः समाकुलाः**
**सहासमालोकयतिस्म गोपिकाः॥**[1]

भारतीयजीवनस्य मनोहारिवर्णनमकारि कविना। तदत्र कृष्णसैन्ये प्रयुक्ताश्च नियन्त्रणेन रैवतकप्रसङ्गे तत्रत्यशिशूनां मार्गे प्रक्रीडितान् मातरस्त्वरया ततशिशून् अपवारयन्ति। तथा हि–

**अवेक्षितानामतवल्गमग्रे तुरङ्गिभिर्यत्ननिरूद्धवाहैः।**
**प्रकीडितान् रेणुभिरेत्य तूर्णं निन्युजेनन्यः पृथुकान् पथिभ्यः॥**[2]

**मदीयसीमपि घनामनल्पणुणकलिप्तम्।**
**प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव॥**

**शिशुपालवधे मनोरञ्जनप्रकाराः**

महाकाव्ये मनोरञ्जनस्यावश्यकतानाट्यशास्त्रकारः भरतः कथयति काव्यं धर्म-यश-आयु-हित-बुद्धि-लोकोपदेशं च विदधातीति। अतः दुःखार्तानां श्रमार्त्तानां, शोकार्त्तानां तपस्विनाञ्च विश्रान्तिजननं काले मनोरञ्जनार्थमेव काव्यस्य सृष्टिरिति भरतेन प्रतिपादितम्। अतः तेनोक्तम्।

**दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद्भविष्यति॥**[3]

**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।**
**लेकोपदेशजननं नाट्यमेतद्भविष्यति॥**[4]

माघस्य शिशुपालवधे संगीतरूपकं मनोरञ्जनम्–

**मधुकरैरपवादकरैरिव स्मृतिभुवः पथिका हरिणा इव।**
**कलतया वचसः परिवादिनीस्वरजिता रजिता वशमाययुः॥**[5]

---

1. शिशु. 12.42
2. शिशु. 3.30
3. नाट्यशास्त्रम्
4. नाट्यशास्त्रम्
5. शिशु. 6.9

अरण्ये व्याघ्रः बहुविधगात्रैः विविधवाघविशेषैः हरिणचित्ताकर्षणं करोति। तेन मृगाः वशीभूताः भवन्ति। एवमेव भ्रमराणं मधुरगुञ्जनेन कामुकाः वशीभवन्ति। भ्रमराणां शब्दः वीणावाद्यविशेषेण समानो भवति। अतः मनोरञ्जनमत्र सन्निवेशितम्।

**कुशेशयैरत्र जलाशयोषिता मुदा रमन्ते कलभा विकस्वरैः।**
**प्रगीयते सिद्धगणैश्च योषितामुदारमन्तेऽकलभाविकस्वरैः॥**[1]

अस्मिन् श्लोके रैवतकपर्वतसमीपे सिद्धाङ्नाभिः गीयमानमधुरसंगीत-विषये कविना वर्णनं कृतम्।

**शिशुपालवधे पदलालित्यम्–**

यथा–

**नवपलाशपलाशवनं पुरः**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्**
**स सुरभिं सुरभिं सुमनोभरैः॥**[2]

यथा वा–

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**
**समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च॥**[3]

शिशुपालवधमहाकाव्ये विविधवैदुष्यपूर्णं दर्शनं भवति। यथा–

**तस्य सांख्यपुरुषेण तुल्यतां**
**बिभ्रतः स्वयमकुर्वतः क्रियाः।**
**कर्तृता तदुपलम्भतोऽयवद्-**
**वृत्तिभाजि करणे यथार्त्विजि॥**[4]

1. शिशु. 4.33
2. शिशु. 6.2
3. शिशु. 2.10
4. शिशु. 14.19

अत्र महाकाव्ये सर्वत्र दर्शनस्य प्रभावः अस्ति। संस्कृतवाङ्मये शिशुपालवधस्य समीचीनं स्थानमस्ति। सम्पूर्णमहाकाव्ये महाकाव्यत्वेन लक्षणं पश्यति। सुरभारत्याः सर्जनसाम्राज्ये महाकविर्माघो महाप्रतिभाघटः कालजयी स्रष्टा चेत्यत्र नास्ति वैमत्यम्। तस्य शिशुपालवधं महाकाव्यं स्वीयगौरवेण सौरभेण च संस्कृतसाहित्यवाङ्मये बहुदृष्ट्या मूर्धन्यस्थानम् आरोहति। काव्यस्यास्य काव्यकला निःसन्देहं विदुषां विस्मयमाविष्करोति।

**उपसंहारः**

वस्तुतः शिशुपालवधे बह्व्यः प्रेरणास्पदप्रक्रियाः सन्ति। यस्य आधारे महाकाव्यस्य बृहत्त्रय्यां स्थानं निर्धारितं भवति। साहित्यस्य सुमधुरवर्णनम्, शिल्पशास्त्रस्य विनियोजनम्, हास्यरसमाध्यमेनहासोत्पादनं तथा च अनेके विषयाः द्रष्टुं शक्यन्ते। स्थाने-स्थाने शिशुपालवधमहाकाव्ये विविधानां क्रीडानां क्रीडनकानाम् उत्सवानां च वर्णनं प्राप्यते। एवं प्रकारेण शिशुपालवधस्य वृहत्त्रयीसाहित्यजगति स्वप्रतिष्ठामर्जयति, अग्रेऽपि अर्जयिष्यतीति नास्त्यत्र सन्देहस्यावकाशः।

✦✦✦

# शिशुपालवधमहाकाव्ये वक्रोक्तिविचारः

**श्री अमितकुमारः**
शोधच्छात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–110016

भारतीयकाव्यशास्त्रे षड्सम्प्रदायाः प्रसिद्धाः सन्ति। तेषु षड्सम्प्रदायेषु वक्रोक्तिसम्प्रदायः विशिष्टं स्थानं बिभर्ति। अस्य सम्प्रदायस्य प्रवर्त्तकः कुन्तकाचार्यः स्वयं कुन्तकः अपि स्वकीये 'वक्रोक्तिजीविते' ग्रन्थे पुनः पुनः शिशुपालवधमहाकाव्यस्योदाहरणानि ददाति। इत्थं शिशुपालवधमहाकाव्ये आचार्यकुन्तकसिद्धान्तस्य प्रत्येकभेदाः सम्प्राप्यन्ते। समीक्षणपूर्वं वक्रोक्तेः सामान्यपरिचयः प्रस्तूयते। वक्रोक्ति का नाम वक्रोक्तिः? वक्रोक्तेः सामान्यार्थः– वक्रा उक्तिः इति वक्रोक्तिः। परन्तुः अत्र वक्रोक्तिशब्दस्यार्थः व्यापको अस्ति। कविचातुर्यपूर्णकथनं वक्रोक्तिः। वक्रोक्तिसम्प्रदायस्य प्रमुखः आचार्यः कुन्तकः। कुन्तकाचार्यात् पूर्वमपि वक्रोक्तिः सामान्यः परिचयः प्राप्यते। कालिदासस्य 'वक्रः पन्थाः' प्रयोगेऽस्मिन् वक्रस्यार्थः कुटिलो यथा–

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशम्।**[1]

काव्यशस्त्रीयग्रन्थे भामहेन वक्रोक्तिः कल्पना सर्वप्रथमं कृता।

**सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।।**[2]

बाणभट्टेन कादम्बरीगद्यकाव्ये वक्रोक्तेः प्रयोगो वाक्छलक्रीडालाप-परिहासजल्पितचमत्कारपूर्ण शैलीवचनप्रभृतिविदग्धतार्थेषु अकारि–

---

1. मेघ, पू. 29
2. काव्यालंकारः 2.85

**एषाऽपि बुध्यते एतावती वक्रोक्तिः।**[1]

कुन्तकात् पूर्वमपि वक्रोक्तेः सर्वालंकारमूलत्वं निरूपितमेव। एवं पूर्ववर्तिनां वक्रोक्तिर्निरूपणानां सारांशं स्वीकृत्यैव कुन्तकाचार्येण विस्तृतरूपेण वक्रोक्तिनिरूपणं कृतम्। कुन्तकात् परवर्तिनः प्रमुखाचार्याः मम्मट-विश्वनाथप्रभृतयः वक्रोक्तिं केवलालंकारत्वेनैव स्वीकृतवन्तः परञ्च आचार्यकुन्तको वक्रोक्तिः सूक्ष्मादपि सूक्ष्मरूपं वर्णयति। वक्रोक्तेर्लक्षणम्-

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।**
**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥**[2]

कथ्यते।

कुन्तकाचार्येण वक्रोक्तिसम्मतमेव काव्यलक्षणं समुपस्थापितम्-

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥**[3]

सर्वप्रथमं वक्राक्तिशब्दस्य प्रयोगोऽथर्ववेदे 'कुटिलार्थे' कृतः। तद्यथा- अयं यो विपरुर्व्ग्गे मुखानि वक्र वृजिना कृणोषि। राघवपाण्डवीयकारः 'कविराज' आत्मनं सुबन्धुं बाणं च वक्रोक्तिमार्गे निपुणन्नघोषयत्। यथा-

**सुबन्धुबाणभट्टश्च कविराज इति त्रयः।**
**वक्रोक्तिमार्गनिपुणा चतुर्थो विद्यते न वा॥**[4]

कुन्तकाचार्येण वक्रोक्तिः षड्भेदाः निरूपिताः ते च सन्ति- **वर्णविन्यासवक्रता पदपूर्वार्द्धवक्रता-पदपरार्द्धवक्रता-वाक्यवक्रता-प्रकरणवक्रता-प्रबन्धवक्रताश्चेति।** तद्यथा-

**वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।**
**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयाः॥**
**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।**
**यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥**

---

1. कादम्बरी, पृ. 296
2. व.जी.1.10
3. व.जी. 1.107
4. रा.पा.पृ. 20

**वक्रभावः प्रकरणे प्रबन्धे वाऽस्ति यादृशः।**
**उच्यते सहजाहार्य-सौकुमार्य-मनोहरः॥[1]**

इत्थं वक्रोक्तिसिद्धान्तस्य काव्यशास्त्रीयसिद्धान्तेषु विशिष्टं स्थानं वर्तते। संस्कृतमहाकाव्येषु माघकृतं शिशुपालवधं विशिष्टमस्ति। महाकाव्येऽस्मिन् पदे-पदे वक्रता दरीदृश्यते। अत्र वक्रोक्तेः तेषां पूर्वोक्तानां भेदानां सक्रमेण क्रियते।

**वर्णविन्यासवक्रतायाः प्रभेदाः–**

**एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः।**
**स्वल्पान्तरस्त्रिया सोक्ता वर्णविन्यासवक्रता॥[2]**

**वर्णान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नादयः।**
**शिष्टाश्च रादिसंयुक्ताः प्रस्तौचित्यशोभिनः॥[3]**

अत्र एकवर्णनस्य पुनरावृतिः, द्वयोर्वर्णयोः पुनरावृतिः, बहुवर्णानां पुनरावृतिः, स्वाल्पान्तरे मिलति। अपि च वर्णान्तयोगिनः स्पर्शवर्णस्य, द्विरुक्तास्त-ल-नादयः वर्णवक्रताः, रादिसंयुक्तवर्ण-विन्यासवक्रतेति। एतेषां सर्वेषां भेदानामन्तर्भावः वर्णविन्यासवक्रताऽन्तर्गतेऽऽगच्छति।

वक्रोक्तिसिद्धान्तस्य प्रथमभेदस्य वर्णविन्यासवक्रोक्तेः शिशुपालवधे बहुन्युदाहरणानि दृष्टिगोचराणि भवन्ति। यथा–

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजम्।**
**मृदुलतान्तलतान्तमलोक्यत्स सुरभिं सुरभिं सुमनोभरैः॥[4]**

श्लोकेऽस्मिन् बहुवर्णानां पुनरुक्तिः दरीदृश्यते। अतः वर्णविन्यासवक्रताऽन्तर्गते बहुवर्णयुक्तविन्यासवक्रता वर्तते।

**अमानवं जातमजं कुले मनोः**
**प्रभविनं भाविनमन्तमात्मनः।**

---

1. व.जी. 1.19-21
2. व.जी. 2.1
3. व.जी. 2.2
4. शिशु. व. 6.2

**मुमोच जानन्नापि जानकीं न यः**
**सदाभिमानैकघना हि मानिनः॥**[1]

श्लोकेऽस्मिन् बहुवर्णानां पुनरुक्तिः दरीदृश्यते। अतः वर्णविन्यासवक्रताऽन्तर्गते बहुवर्णयुक्तविन्यासवक्रता वर्तते।

**पदपुर्वार्द्धवक्रता**

वक्रोक्तेः द्वितीयभेदः पदपूर्वार्द्धवक्रताऽस्ति। वर्णनां समूहः शब्दः भवति। सुबन्ततिङ्गन्त शब्दः कथ्यते। अत्र पदपूर्वार्द्धवक्रतायाः बहवः भेदाः सन्ति तत्र च रूढि-पर्याय-उपचार-विशेषण-संवृति-वृति-भाव-लिंग-क्रियाणां विस्तृतप्रयोगानां विवेचनमस्ति। आचार्यकुन्तकः पदपूर्वार्द्धवक्रताया अष्टभेदाः इति स्वीकरोति। शिशुपालवधे वक्रोक्तेः बहून्युदाहरणानि दृष्टिगोचराणि जायन्ते। परन्तु विस्तारभयकारणात् तेषां सर्वेषामुदाहरणानां विवेचनं कर्तुं समर्थो नास्मि। अत्र केवलं मुख्योदाहरणानां प्रयोगं कृतं मया। यथा-

**निवर्त्य सोऽनुव्रजतः कृतानती-**
**नतीन्द्रियज्ञाननिधिर्नभः सदः।**
**समासदत्सादितदैत्यसम्पदः पदं**
**महेन्द्रालयचारु चक्रिणः॥**[2]

श्लोकेऽस्मिन् 'कृष्ण' शब्दस्य पर्यायशब्दः 'चक्रिणः' वर्तते। अतः पदपुर्वार्द्धवक्रताऽन्तर्गते पर्यायवक्रता दृष्टिगोचरं भवति। अपि च-

**श्रियः पतिः श्रीमति शासितुं**
**जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्य-**
**भार्ङ्गभुवं मुनिं हरिः॥**[3]

अत्र मुनेः 'हिरण्यगर्भागभुवः' इति पर्यायशब्द अतः पदपुर्वार्द्ध-वक्रताऽन्तर्गते पर्यायवक्रता वर्तते।

---

1. शिशु. व. 1.67
2. शिशु. व. 1.11
3. शिशु. व. 1.1

**पदपरार्द्धवक्रता-**

वक्रोक्तेः तृतीयभेदः पदपरार्द्धवक्रताऽस्ति। पदपरार्द्धवक्रताया अपरनाम प्रत्ययवक्रताऽस्ति वर्तते। प्रत्ययवक्रतायाः बहवः भेदाः सन्ति। ते च कालवैचित्र्यवक्रता-संख्यवक्रता-कारकवक्रता-पुरुषवक्रता-उपग्रहवक्रता-प्रत्ययवक्रता-उपसर्गवक्रता-निपातवक्रतेति। यथा-

**कालसमग्रेण गृहानमुचंता मनस्विनीरुत्कयितुं पटीयसा।**
**विलासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेन्दुना।।**[1]

श्लोकेऽस्मिन् 'गृहं' शब्दस्थाने 'गृहान्' शब्दस्य प्रयोग संख्या-वक्रताऽन्तर्गतेऽवऽगच्छति अर्थात् एकवचनस्थाने बहुवचनस्य प्रयोगः दरीदृश्यते।

**वाक्यवक्रता-**

वक्रोक्तेः चतुर्थभेदः वाक्यवक्रताया वर्तते। वाक्यवक्रताया अपरनाम वस्तुवक्रताऽस्ति। तृतीयोन्मेषे कुन्तकाचार्येण वक्रोक्तिजीवितग्रन्थस्य वाक्यवक्रतायाः भेदानां व्याख्या कृताऽस्ति। वाक्यवक्रताऽन्तर्गतेऽलंकाराणां समावेशोऽस्ति।

यथा-

**जाज्वल्यमाना जगतः शान्तये समुपेयुषी।**
**व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी।।**[2]

अत्र 'नरशिखित्रयी' पदे रूपकालंकारः वर्तते। अतः रूपकालंकारः वाक्यवक्रताऽन्तर्गते आगच्छति।

**प्रकरणवक्रता-**

वक्रोक्तेः पंचमो भेदः प्रकरणवक्रता वर्तते। सम्पूर्णग्रन्थस्यान्तर्गतमेक-विशिष्टवाक्यसमूहाश्रित वर्ण्यविषयः प्रकरणवक्रता वर्तते। प्रकरणवक्रतायाः शिशुपालवधे नैकानि उदाहरणानि सम्प्राप्यन्ते। अत्र केवल प्रमुखोदाहरणान्येव प्रस्तौमि।

---

1. शिशु. व. 1.59
2. शिशु.व. 2.3

यथा–

**नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना।।**[1]

अत्र शिशुपालवधमहाव्यंख्यातवृत्ते कल्पितकथांशस्य सन्निवेशः एव उत्पाद्यलावण्यवक्रतायाः उदाहरणमस्ति। अतः प्रकरणवक्रताऽन्तर्गते उत्पाद्यलावण्यवक्रताऽऽगच्छति।

**प्रबन्धवक्रता–**

वक्रोक्तेः षष्ठः भेदः प्रबन्धवक्रताऽस्ति। प्रबन्धस्य अर्थ अस्ति समस्तग्रन्थः। प्रबन्धवक्रतायाः षड्भेदाः ते च सन्ति–मूलरसपरिवर्तनवक्रता–समापनवक्रता–कथासाम्यवक्रता इति। शिशुपालवधे प्रबन्धवक्रतायाः बहून्युदाहरणानि सन्ति।

यथा–

**करोति कंसादिमहीभृतां वधाद्**
**जनो मृगाणामिव यत्तवंस्तवम्।**
**हरे! हिरण्याक्षपुरः रसासुरद्विपद्विषः**
**प्रत्युतः सा तिरस्क्रिया।।**[2]

श्लोकेऽस्मिन् वीररसः दृष्टिगोचरं भवति। यतोहि महाभारतमहाकाव्यस्य अंगीरस शान्तं मन्यते। शिशुपालवधमहाकाव्यस्योपजीव्यं महाभारतेतिहास–प्रसिद्धमहाकाव्यमस्ति।

**उपसंहार–**

शिशुपालवधमहाकाव्यं संस्कृतसाहित्यस्य महत्त्वपूर्णं काव्यमस्ति। शिशुपालवधे पदे–पदे वक्रता दरीदृश्यते। अत्र वक्रोक्तेः भेदप्रभेदानां विवेचनमस्ति। इत्थं निष्कर्षरूपेण कथयितुं समर्थोऽस्मि यत् महाकाव्यमिदं वक्रोक्तिदृशा सफलतामधिगच्छति।

---

1. शिशु.व. 1.4
2. शिशु. व. 1.39

# माघे सन्ति त्रयो गुणाः

**डॉ. नागेशः**
पूर्वशोधच्छात्रः, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–16

बृहत्त्रय्यां परिगणितस्य शिशुपालवधस्य प्रणेतुर्महाकवेः माघस्य जीवनपरिचयः महाकाव्यान्ते एव वर्णितोऽस्ति। येन ज्ञायते यत् माघस्य पितामहः सुप्रभदेवः श्रीवर्मलस्य नामाख्यस्य कस्यचित् राज्ञः महामन्त्री आसीत्। माघस्य पिता दत्तकः दयालुः, उदारः, क्षमाशीलः, मृदुभाषी चासीत्। अतः दीनेभ्य आश्रयप्रदानेन सर्वाश्रय इति उपनाम प्रसिद्धं जातम्। ततः परं माघः जनिं लेभे। परं माघस्य जीवनं दैन्यावस्थायां व्यतीतम्।

डॉ.कीलहार्नमहोदयः[1] राजस्थानस्य वसन्तपुरनाम्नः स्थानात् वर्मलात इत्याख्यस्य राज्ञः शिलालेखमेकं प्राप्तवान्, यस्य समयः 625 ई. अस्ति। एषः समयः माघस्य पितामहस्य आसीत्। अतः माघस्य समयः सप्तम्याः शताब्द्या उत्तरार्द्धः भवितुं शक्यते। शिशुपालवधमहाकाव्यस्य कतिपयेषु हस्तलिखितविवरणेषु याः पुष्पिकाः श्लोकाः वा प्राप्नुवन्ति, तासु माघस्य स्थानं भिन्नमालः सिध्यते।[2] अयं भिन्नमाल एव वर्तमानसमये भीनमाल् इत्यभिधानेन पश्चिमराजस्थाने आबूपर्वतलूनानद्यो अन्तरा विराजते।

### माघे सन्ति त्रयो गुणाः

---

1. Kill Horn- Journal of the Royal Aisatic Sciety 19.8 & page - 409
2. प्रभावकचरितम् 14.5–10

विद्वद्भि उक्तिरियं प्रतिपादिता।

अत्र गुणाः के? मम्मटेन अपि परिभाष्यते यत्–

**ये रसस्याङ्गिनो धर्माः**[1]

अर्थात् रसस्य अङ्गिनः धर्माः गुणाः कथ्यन्ते। अत्र गुणानां तात्पर्यं माधुर्योजप्रसादादिभिः नास्ति। अपितु उपमापदलालित्यार्थगौरवादिभिः वर्तन्ते। यथा शौर्यादिगुणानां सम्बन्ध आत्मना भवति तथैव माधुर्योजादीनामपि सम्बन्धः काव्यस्य आत्मना (रसेन) सह भवति। एवमपि कथयितुं शक्नुमः यत् काव्यशोभायाः कर्त्तारो धर्माः गुणाः। अत्र उपमा यद्यपि अलङ्कारः विद्यते तथापि अलङ्कारस्य गणना ध्वनौ क्रियते यथा– वस्तुध्वनिः, अलङ्कारध्वनिश्च एवञ्च रसध्वनिः अर्थात् रसः। अनेन प्रकारेण अलङ्कारध्वनिः काव्यशोभां करोति चेत् गुण एव कथ्यते। रस अर्थात् परमानन्दः। अथ च यावत् काव्ये आनन्दं न प्रयच्छति तावत् काव्यं सुकाव्यं न भवति। तत्र यदि उपमालङ्कारेण सः रसः आनन्दः वा समायाति चेत् सः गुण एव। अथ यदि वयम् अर्थगौरवविषये विचारयामश्चेत् तदपि शाब्दशक्तिः वर्तते। यतोहि शब्दशक्तयः त्रयः भवन्ति– अभिधा, लक्षणा, व्यञ्जना च। अथ व्यञ्जनायुतं काव्यमेव उत्तमकाव्यं भवितुं शक्यते।

**तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा॥**[2]

अर्थात् स्पष्टतया कथनमेव अभिधाशक्तिः भवति। अथ लक्षणा परिभाष्यते यत्–

**मुख्यार्थबाधे तद्योगे रुढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया॥**[3]

वाचकरूपशब्दस्य स्वार्थबाधे सति अथवा सम्बद्धम् अर्थं प्रतिपादयति यत्र रूढिः स्यात् अथवा प्रयोक्तुः प्रयोजनविशेषो भवेत् चेत् लक्षणाशक्तिर्भवति। अथ व्यञ्जना परिभाष्यते–

---

1. का.प्र. 8.1
2. सा.द.2.3
3. का.प्र. 2.9

**विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥**[1]

अर्थात् अभिधादिवृत्तीनां विरते सति यया वृत्त्या अन्यार्थस्य बोधो जायते, सैव व्यञ्जनावृत्तिः शक्तिर्वा भवति। इयमेव ध्वनिनाम्ना आनन्दवर्धनेन अभिहिता। तेनोक्तम्–

**काव्यस्यात्मा ध्वनिरिति बुधैः.....॥**

अपि च-

**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः॥**[2]

अतः काव्ये सौन्दर्याधायिकी शक्तिरेव ध्वनिः व्यञ्जना वा। एतदेव अर्थगौरवं कथयितुं शक्नुमः। माघकाव्ये अर्थगौरवस्य प्राचुर्यं दरीदृश्यते। अतः महाकाव्यमिदं बृहत्त्रय्यां परिगण्यते। अथ पदलालित्यं किमिति? विचारयामश्चेत् ज्ञायते यत् शब्दचयनस्य एका पद्धतिरस्ति। अस्मिन् क्रमे वामनेनोक्तम् यत्–

**विशिष्टा पदरचना रीतिः।**
**विशेषो गुणात्मा॥**[3]

अपि च-

**एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं प्रतिष्ठितमिति।**[4]

अर्थात् विशेषरूपेण पदानां शब्दानां वा चयनं कृत्वा काव्यविरचनं रीतिः कथ्यते। रीतयः मुख्यतया त्रयाः सन्ति - वैदर्भी, गौडी, पाञ्चाली च। वामनेन लक्षणमेताषां कृतम्। सर्वप्रथमं।

**समग्रगुणा वैदर्भी**[5]

---

1. सा.द. 2.12-13
2. ध्वन्यालोकः 1.1-2
3. का.अ.सू.वृ. 12.2.7-8
4. का.अ.सू.वृ. 1.2.13
5. का.अ.सू.वृ. 1.2.11

अर्थात् ओजप्रसादमाधुर्यादिभिः, अथ च वामनोक्तविंशतिगुणैः युक्ता रीतिः कथ्यते। अतः परं–

**ओजः कान्तिमती गौडीया।।**[1]

अर्थात् ओजकान्तिभ्यां गुणाभ्यां च युता रीतिः गौडी कथ्यते। तदनन्तरं–

**माधुर्यसौकुमार्योपपन्ना पाञ्चालीरीतिः।।**[2]

अर्थात् माधुर्यसौकुमार्यगुणाभ्यां युक्ता रीतिः पाञ्चालीति कथ्यते। एवं ज्ञायते काव्यविरचने पदानां प्रयोगः रीतिः कथ्यते, काव्यसौन्दर्याधायको भवति। अतः पदलालित्यं काव्ये रसोत्कर्षं जनयति। "उपमा कालिदासस्य" अस्याभिप्रायः एतन्नास्ति यत् कालिदास उपमाया अतिरिच्य अन्यगुणानां प्रयोगे न्यूनत्वं भजतेऽपितु अस्याभिप्राय अस्ति यत् कालिदासस्य उपमाप्रयोगः अनुपमेयः खलु। भारवे अर्थगौरवमपि अनुपमेयः। अथ च दण्डिनः पदलालित्यम् अनुपमयेत्वं धारयति। परञ्च महाकविमाघे एते त्रय एव गुणा उत्कृष्टरूपेण विद्यमानाः सन्ति। येन शिशुपालवधं विशिष्टं महाकाव्य-मस्ति। अतः साधूक्तं यत् – "माघे सन्ति त्रयो गुणाः"

**माघकृतोपमाप्रयोगः प्रस्तूयते–**

**मधुकरैरपवादकरैरिव स्मृतिभुवः पथिका हरिणा इव।**
**कलतया वचसः परिवादिनीस्वरजिता रजिता वशमाययुः।।**[3]

**उपमाप्रयोगः–**

इह श्लोके अपवादकरैरिव एवञ्च हरिणा इव आभ्यां प्रयोगाभ्यां कविना उपमा वैशिष्ट्येन प्रयुक्तास्ति।

---

1. का.अ.सू.वृ. 1.2.12
2. का.अ.सू.वृ. 1.2.13
3. शि.व.म. 6.9

**अर्थगौरवम्-**

श्लोकेऽस्मिन् अभिधया बोध्यते यत् यथा व्याधानां मोहकताद्यै आकृष्टा मृगाः तेषां गर्तेषु निपतन्ति तथैव भ्रमराणां गुञ्जारः पथिकान् कामस्य वशीभूतं करोति।

**पदलालित्यम्–**

पदलालित्यमर्थात् रसापेक्षया शब्दानां वर्णानां वा चयनम्। इह श्लोकेऽपि शृङ्गारं द्योतयितुं कर्णकटुशब्दानां प्रयोगः नगण्यं खलु। अत्र एकस्मिन्नेव श्लोके माघस्य त्रयो गुणाः समाश्रयन्ति। एवमेव बहवः श्लोकास्सन्ति येषु एते त्रयैव गुणाः सार्धमेव प्राप्नुवन्ति।

**उपमाप्रयोगस्य अन्यदुहारणमस्त्यत्र–**

**द्रुतसमीरचलैः क्षणलक्षितव्यवहिता विटपैरिव मञ्जरी।**
**नवतमालनिभस्य नभस्तरोरचिररोचिररोचत वारिदैः॥**[1]

अत्रापि कवेः उपमाप्रयोगस्य विशिष्टो गुणः प्रतिपादितः। कविः स्वकाव्ये अलङ्काराणां भूयिष्ठं प्रयोगं कृतवान्।

अर्थगौरवप्रयोगदृष्ट्या महाकविमाघः कथमपि भारवेः न्यूनः नास्ति। माघकाव्यमिदं न केवलं मनोविनोदार्थम् अपितु तत्तु पाठकानां ज्ञानक्षेत्रं वर्धयितुम् साधनमेकं विद्यते ननु। अर्थगौरवस्य उदाहरणमत्र प्रस्तूयते–

**दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान।**
**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः॥**[2]

अर्थात् रमणीयतायाः स्वरूपमेवं भवति यत् प्रतिक्षणमेव नवीनत्वं प्राप्नोति। यद्यपि श्रीकृष्णः रैवतकम् अनेकवारं दृष्टवान् तथापि तस्य सौन्दर्यं भगवन्तं कृष्णं मुहुर्मुहुः द्रष्टुमाकर्षयति। एष एव अर्थगौरवः प्रकटयत्यत्र।

---

1. शि.व.म. 6.28
2. शि.व.म. 4.17

**जज्ञे जनैर्मुकुलिताक्षमनाददाने,**
**संरब्धहस्तिपकनिष्ठुरचोदनाभिः।**
**गम्भीरवेदिनि पुरः कवलं करीन्द्रे,**
**मन्दोऽपि नाम न महानवगृह्य साध्यः॥**[1]

शिशुपालवधमहाकाव्ये अर्थगौरवस्य उत्कृष्टमुदाहरणमेतत्। वर्ण्यतेऽत्र मदोन्मत्तगजः सः महावता दण्डप्रयोगेणापि न सम्यग्गच्छति अथवा भूयिष्ठम् अगमनेनापि नावगच्छति। इह तेभ्यः गजेभ्यः गम्भीरवेदिनीति शब्दः प्रयुक्तः। अर्थगौरवेण प्रतिपादितमत्र सत् बलवान् परं मूर्खोऽपि जनः बलात् साध्याः न क्रियन्ते।

**माघस्य पदलालित्यम्–**

संस्कृतसाहित्ये दण्डिश्रीहर्षयोः पदलालित्यं श्लाघनीयम्। परं माघस्य पदलालित्यमपि भूयिष्ठं स्पृहणीयम्। माघस्य पदलालित्यं वैदर्भीपाञ्चालीरीत्योः पदलालित्यं न भूते सति गौडीरीतिसम्बद्धं विकटबन्धस्य गाढबन्धस्य वा पदलालित्यमस्ति। यथा–

**नवपलाशपलाशवनं पुरः**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्स**
**सुरभिं सुरभिं सुमनोभरैः॥**[2]

श्लोकेऽत्र वसन्ततौ विकसितानां पल्लिवतानाञ्च नवपुष्पाणां श्रीकृष्णेन अवलोकनस्य वर्णनमतीव कोमलकान्तपदावल्या क्रियते। अतः परं पदलालित्यस्य अन्यदुदाहरणं प्रस्तूयते–

**वदनसौरभलोभपरिभ्रममद्-**
**भ्रमरसंभ्रमसंभृतशोभया।**
**चलितया विदधे कलमेखलाकल-**
**कलोऽलकलोलदृशान्यया॥**[3]

---

1. शि.व.म. 5.49
2. शि.व.म. 6.2
3. शि.व.म. 6.14

मुखसौरभेण सर्वतः परिभ्रमद्भ्यः द्विरेफेभ्यः भीत्वा अन्यत्र गन्तुमुद्यता कस्याश्चित् नायिकायाः कलमेखलायाः शब्दः पाठकानां चेतांसि आवर्जयति।

**उपसंहारः–**

शोधपत्रस्य विषयः **"माघे सन्ति त्रयो गुणाः"** इत्ययम् अधिकृत्य गुणानां व्याख्यामकुर्वन्। उपमापदलालित्यार्थगौरवादीनां समावेश अत्र गुणेषु क्रियते। यथा गुणाः काव्यस्य शोभाधायकाः भवन्ति तथैव अत्र उपमालङ्काराः पदचारूत्वम् अर्थगौरवञ्च काव्यस्य शोभाकर्त्तारः सन्ति। नात्र संशय-लेशः। यद्यपि उपमालङ्काराः तथापि गुणेषु परिगणनमत्र क्रियते। यतोहि उपमा अपि अलङ्कार, अत एव अलङ्काराः ध्वनिषु परिगण्यन्ते इतोऽपि रसोत्कर्षकत्वेन एते गुणा एव। अथ पदलालित्यप्रसङ्गे यदि काव्ये काव्यगुणानुसारेण शब्दानां पदानां वा चयनं न स्यात् तदा नैतत् उत्तमं काव्यं भवति। अतः माघः पदचारुत्वप्रयोगे वैशारद्यं भजते। अर्थगौरवमिति कथनेन अर्थस्य गौरवं ज्ञायते। तात्पर्यमिदमपि अस्ति यत् व्यञ्जनावृत्तिरेव अर्थगौरवमिति नाम्ना आख्यायते। व्यञ्जनावृत्तिः ध्वनिर्वा काव्यस्य आत्मा भवति। आनन्दवर्धनादिभि आचार्यैः स्वीकृतम्। माघस्य उपमाप्रयोग अथ च अर्थगौरवं भारविकालिदासो नातिशेते। परं तस्य पदलालित्यं नूनमेव दण्डिनमतिशेते। माघकृतशिशुपालवधमहाकाव्ये प्रयुक्तानां विषयाणामध्ययनेन ज्ञायते यत् माघः राजनीतिशास्त्रे, अर्थशास्त्रे, ज्योतिषशास्त्रे, दर्शनशास्त्रे, व्याकरणशास्त्रे एवाञ्च सर्वेषु शास्त्रेषु वैशारद्यं भजते। केनचित् विदुषा साधूक्तं यत्–

**मेघे माघे गतं वयः।**

यतोहि माघकाव्यं संस्कृतसाहित्यस्य शब्दकोष इत्युक्तं विद्वद्भिः। माघस्य एकस्मिन्नेव पद्ये उपमार्थगौरवपदलालित्यानां प्रयोगः प्राचुर्येण प्राप्नोति।

अत एव उचितमेव कथितम्–

**माघे सन्ति त्रयो गुणाः।** इति शम्।

✦✦✦

# माघे सन्ति त्रयो गुणाः

**डॉ. शिवराजः**
पूर्वशोधच्छात्रः, साहित्यविभागस्य
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालयः, नवदेहली–16

**माघस्य व्यक्तित्वम्**

महाकविमाघस्य तत्कालीनज्ञान–विज्ञाने बहुविधेषु क्षेत्रेषु अगाध–पाण्डित्यमासीत्। कृष्णस्य सेनायाः प्रयाणपथः वर्णनेन तस्य भारतीयभूगोलस्य ज्ञानमुत्कृष्टं प्रतीयते। वैदिकसंस्कृतेः धर्मदर्शनविषये सः परिचितः आसीत्। व्याकरणस्य सूक्ष्मातिसूक्ष्मप्रवृत्तीनामुपरि तस्य अधिकारः आसीत्। काव्यशास्त्रस्य परममर्मज्ञः तु सः आसीदेव।

माघः राजसभाम् अलङ्कुर्वाणः महाकविः आसीत्। तस्य कविता तत्कालीनराजधानीयसंस्कृत्या प्रभाविताऽऽसीत्। उदाहरणार्थं शिशुपालवधस्य षष्ठसर्गे कविना ऋतूणां केवलं सौन्दर्यपक्षस्य निदर्शनं कृतम्। यस्मिन् ते कामुकतायाः संवर्धनं करोति।

माघः सूक्ष्मदर्शी आसीत्। जीवनस्य विविधक्षेत्रषु विशेषेण राजकार्ये तस्य विशिष्टाभिरुचिः आसीत्। सः यत् किञ्चित् दृष्टं श्रुतं वा तत्सर्वं मानसपटले स्थापयित्वा एषः सूक्ष्मदर्शी महाकविः यथास्थानं तस्य उपयोगे समर्थः आसीत्। यथा–पञ्चमसर्गस्य 30–51 श्लोकेषु गजस्य वर्णनम्।

माघः शैवः आसीत् अथवा वैष्णवः इति निर्णेतुं कठिनमेव। तेन सांख्यस्य प्रायतः चर्चा अस्मिन् महाकाव्ये कृता। यथा–

**तस्य सांख्यपुरुषेण तुल्यतां**
**विभ्रतः स्वयमकुर्वतः क्रियाः।**

**कर्तृता तदुपलम्भतोऽभवद्**
**वृत्तिभाजि करणे यथर्त्विजि॥**[1]

माघस्य सूक्त्या प्रतीतं भवति यत् सः स्वाभिमानी, उपकारपरायणः सहिष्णुश्चासीत्। यथा–

**पादाहतं यदुत्थाय मूर्धानमधिरोहति।**
**स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः॥**[2]

**अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केसरी।**[3]

**उपकारपरः स्वभावतः सततं सर्वजनस्य सज्जनः।**[4]

उपर्युक्तवाक्येन स्पष्टं प्रतीतं भवति यत् माघस्य जीवनस्य उच्चादर्शः तस्य कृतिषु प्रतिफलितः भवति। कवेः स्वातन्त्र्यप्रियता तस्य अधो-लिखितसूक्त्या स्पष्टमस्ति–

**आक्रान्तितो न वशमेति महान् परस्य।**[5]

अर्थात् महापुरुषः बलप्रयोगेण वशीकर्तुं न शक्यते। माघस्य स्वतन्त्रतायाः प्रीति अधोलिखितश्लोकेन अपि स्पष्टा भवति, यस्मिन् तेन कल्पितं यत् एकः गजः भोजनं एवं पत्नीप्रेमं त्यक्त्वा वनवासमहोत्सवस्य इच्छाविहारस्य मानसिकानन्दं चक्षुर्निमीलनं कृत्वा अनुभवति। माघेन स्वकाव्यसाधनायाः परिचयः दत्तः। यथा–

**क्षणशयितविबुद्धाः कल्पयन्तः प्रयागा-**
**नुदधिमहति राज्ये काव्यवद्दुर्विगाहे।**
**गहनमपररात्रप्राप्तबुद्धिप्रसादाः**
**कवय इव महीपाश्चिन्तयन्त्यर्थजातम्॥**[6]

---

1. शिशु. 14.19
2. तत्रैव 2.46
3. तत्रैव 16.25
4. तत्रैव 16.22
5. तत्रैव 5.41
6. तत्रैव 11.6

रात्रौ किञ्चित् समयं शायित्वा जागर्ति स्म, शब्दार्थयोः विषये विचारयति स्म यत् अर्द्धरात्रेः पश्चात् तस्य बुद्धिः सुप्रसन्ना भवति स्म। अनेन प्रकारेण तस्य कवेः काव्यार्थस्य सिद्धिः भवति स्म।

### शिशुपालवधमहाकाव्यम्

शिशुपालवधमहाकाव्यस्य कथावस्तु महाभारतस्य सभापर्वणः संगृहीतम्। काव्येऽस्मिन् मुख्यतः द्वारिकानाथश्रीकृष्णचेदिराजशिशुपालयोर्मध्ये युद्धं तथा चान्ते शिशुपालस्य वधं वर्णितमस्ति। अस्मिन् काव्ये विंशतिसर्गाः, 1650 श्लोकाः सन्ति। प्रथमसर्गे श्रीकृष्णं निकषा इन्द्रस्य संवादमानीय देवर्षिनारदः स्वर्गे शिशुपालस्य दौरात्म्यं वर्णितवान् एवञ्च तं हन्तुं श्रीकृष्णमनवरुणत्। द्वितीयसर्गे श्रीकृष्णः युधिष्ठिरस्य निमन्त्रणेन तस्य यज्ञं प्रति गमिष्यति अथवा शिशुपालं हन्तुं स्वर्गं गमिष्यतीति विचार्य किंकर्तव्यविमूढो भूत्वा स्वस्य सभायां परामृशत्।

शिशुपालवधं तु प्रमुखं कार्यमस्ति, अतः तत्र गमनं सर्वप्रथमम् आवश्यकमिति बलरामपरामर्शानन्तरं शान्तिप्रियः उद्धवः उवाच यत् सर्वप्रथमं यज्ञस्थलगमनं कृत्वा अनन्तरं शिशुपालवधमुचितमिति बलरामस्य मतखण्डनं कृत्वा स्वस्य मतमुपस्थापितवान्। उद्धवस्य परामर्शानुसारं श्रीकृष्णः युधिष्ठिरस्य यज्ञस्थलं गमनाय स्थिरीकृतवान्।

तृतीयसर्गे श्रीकृष्णस्य सैनिकः इन्द्रप्रस्थस्य सम्मुखे यात्रा कृता कविः अस्मिन् सर्गे द्वारकानगर्याः एकं सुन्दरं चित्रं प्रदत्तवान्। चतुर्थसर्गे सैनिकानां रैवतकपर्वतयात्राया रैवतकपर्वतस्य च विशदवर्णनमस्ति। पञ्चमसर्गे सैन्ययात्रा, षष्ठसर्गे षडर्तूनां वर्णनं, सप्तमसर्गे यादवाङ्गनानां विलासपूर्णवन-विहारवर्णनं, अष्टमसर्गे यादवानां स्वपत्नीभिः सह जलक्रीडावर्णनं, नवमसर्गे सूर्यास्तवर्णनं, चन्द्रोदयचन्द्रोल्लासप्रभृति वर्णनम्, दशमसर्गे मद्यपानस्य सुन्दरीसेवनस्य च विलासपूर्णं वर्णनम्, एकादशसर्गे प्रभातवर्णनम्, द्वादशसर्गे सेनाप्रयाणविषये वर्णनम्, त्रयोदशसर्गे श्रीकृष्णं द्रष्टुमुत्कण्ठितानां सुन्दरीणां वर्णनम्, चतुर्दशसर्गे युधिष्ठिरेण श्रीकृाष्णपूजनम्, पञ्चदशसर्गे श्रीकृष्णस्य पूजायां शिशुपालस्य प्रकोपवर्णनम्, षोडशसर्गे शिशुपालद्वारा प्रेषितदूतस्य

श्रीकृष्णसम्मुखे संवादः, सप्तदशसर्गे शिशुपालयादवयोर्मध्ये युद्धस्य आयोजनम्, अष्टादशोनविंशसर्गयोः उभयोः मध्ये भीषणयुद्धं, विंशसर्गेच शिशुपालस्य वधविषयः चारुतया वर्णितोऽस्ति। शिशुपालस्य वधेन काव्यस्य उपसंहारो भवति।

**स मेधावी कविर्धीमान् भारविः प्रभवो गिराम्।**
**अनुरून्ध्यकरोन्मैत्रीं नरेन्द्रे विष्णुवर्मणि॥**

कौशिकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्र भारविः। तस्य वास्तविकनाम दामोदरः आसीत्। भारविः तु तस्य उपनाम आसीत्। तेनैव उपनाम्ना तस्य अद्यापि प्रसिद्धिः वर्तते।

## माघस्य कवित्वम्

महाकविर्माघः सुरगवीकाव्याकाशे विद्योतमानं स्वप्रभानिरस्तान्यतेजः प्रसरम् अनुपमं नक्षत्रभ। तस्यापूर्वा कान्तिः समग्रमपि वाङ्मयं रोचयतितराम्। तस्य विविधशास्त्रावगाहिनी सूक्ष्मेक्षिका प्रतिभा सुसूक्ष्ममपि तथ्यमात्मसात्कृत्वा पुरः स्फुरदिव प्रस्तौति। कविरयं न केवलं काव्यशास्त्रस्यैव पारदृश्वा, अपि तु व्याकरणशास्त्रस्य, राजनीतेः, अर्थशास्त्रस्य, धर्मशास्त्रस्य, कामशास्त्रस्य, दर्शनस्य, ज्योतिषस्य, संगीतस्य, पाकशास्त्रस्य, हस्तिविद्यायाः, अश्वशास्त्रस्य, पुराणादीनां च सारविदनुपमो मनीषी। अस्य चमत्कृतिकरं पाण्डित्यं प्रेक्षं प्रेक्षं प्रेक्षावन्तोऽस्य कवित्वं प्रशंसन्ति।

महाकवेः माघस्य काव्यप्रतिभायाः निदर्शनमेकमेव महाकाव्यं 'शिशुपालवधम्' इति वर्तते। शिशुपालवधे भगवता श्रीकृष्णेन कृतः शिशुपालस्य वधः पाण्डित्यसंवलितया काव्यकलाकलितया रम्यभावभरितया च कवितया चित्रितः। ग्रन्थरत्नमिदम् विंशतिसर्गात्मकं महाकाव्यलक्षणैः परिपूर्णं वर्तते।

## माघस्य गौरवम्

केचन माघस्य कवित्वं तथाऽऽह्लादकरं मन्वते यत्ते तदर्थं स्वजीवनसमर्पणमपि सुन्दरं मन्यन्ते। अतएव साधूच्यते 'मेघे माघे गतं वयः' अर्थात् मेघदूतस्य शिशुपालवधस्य चानुशीलने आयुर्व्यतीतम्। काव्येऽस्मिन् तस्य विशालं शब्दकोशमुद्वीक्ष्य केनापि निगद्यते– 'नवसर्गगते माघे नवशब्दो

न विद्यते' अर्थात् शिशुपालवधस्य नवसर्गाणां समाप्तौ न नवीनः शब्दोऽवशिष्यते। तेन नवसर्गेषु तथा नवनवाः शब्दाः प्रयुक्ताः तथा तत्र शब्दराशिरुपलभ्यते। तस्य काव्ये प्रतिपदं पदलालित्यं माधुर्यञ्च प्रेक्ष्य विपश्चिद्भिरुदाह्रियते 'काव्येषु माघः' इति। अनर्घराघवनाटके मुरारेः पाण्डित्यपरिपूर्णं नाटकचातुर्यं प्रेक्ष्य केनाप्यभिधीयते यद् मुरारिर्जिज्ञासितश्चेद् माघे मन आधेयम् 'मुरारिपदचिन्ता चेत् तदा माघे रतिं कुरु'। भारविं सर्वतोभावेन भावावल्याऽतिशयानं माघं प्रेक्ष्य केनापि निगद्यते– 'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः'।

**माघे सन्ति त्रयो गुणाः।**

काव्यशास्त्रदृष्ट्या अस्य कवेः रचना कालिदासभारविदण्डिनां कवीनां प्रमुखगुणानां विद्यमानतया सम्पन्नाऽस्ति। तत्र कालिदासस्य उपमाश्चमत्कुर्वन्ति, भारवेरर्थगौरवं महिमानमातनोति, दण्डिनः श्रीहर्षस्य च पादलालित्यलीला-विलासमाकलयति, अन्यत्र तु माघे त्रयाणामप्येतेषां गुणानां सङ्गमः आनन्दयति सहृदयाणां हृदयम्। अतएव साधूक्तम्–

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

**माघस्योपमा–**

माघस्य उपमाः खलु हृदयहारिण्यः। यथा शिशुपालवधस्य प्रथमसर्गे पीताम्बरः पूर्णेन्दुसुन्दरमुखश्च श्रीकृष्णः वाडवानलज्वालाभिर्व्याप्तः समुद्र इव चित्रितः कविना–

**स तप्तकार्त्तस्वरभास्वराम्बरः**
**कठोरताराधिपलाञ्छनच्छविः।**

**विदिद्युते वाडवजातवेदसः**
**शिखाभिराश्लिष्ट इवाम्भसां निधिः॥**[1]

पुनश्च भाग्यपुरुषकारयोर्द्वयोरपि परस्परापेक्षित्वम् अनिवार्यत्वे–

---

1. शिशु. 1.20

नाङ्गीकरणञ्च तथैवावश्यकं यथा सत्कवये शब्दार्थयोर्द्वयोरपि संग्रहः। उपमया साध्विदं विशदयति सः–

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।**[1]

स्वकवित्वस्य कल्पनामनोज्ञत्वस्य च सङ्कलनं विदधता तेनोच्यते यद् यथा स्वल्पवयस्का बाला मातरमन्वेति, तथैव प्रातःकालिकी सन्ध्या रजनीम् अनुगच्छति–

**अनुपतति विरावैः पत्रिणां व्याहरन्ती।**
**रजनिमचिरजाता पूर्वसन्ध्या सुतेव।।**[2]

**माघस्यार्थगौरवम्**

माघेन स्वकाव्ये प्रयत्नपूर्वकं अर्थगौरवं समुपन्यस्तम्। तत्र शाश्वत-सत्यानां तथ्यानां च समावेशो दरीदृश्यते। अर्थगौरवयुक्तासु सूक्तिषु अर्थान्तरन्यासस्य छटा अपि सौन्दर्यं वर्द्धयति। तद्यथा–

**सतीव योषित् प्रकृतिः सुनिश्चिला-**
**पुमांसमभ्येति भवान्तरेष्वपि।**

माघः अल्पशब्दैः सांख्यशास्त्रस्य सम्पूर्णं सिद्धान्तं प्रस्तुतं चकार। श्रीकृष्णवर्णने सांख्योक्तपुरुषवर्णनं तेन प्रस्तूयते यद्–

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।**
**बहिर्विकारं प्रकृते पृथक् विदुः पुरातनं त्वां पुरुषं पुराविदः।।**[3]

अल्पैरेव शब्दैः गूढ़ातिगूढभावानां विज्ञापनमर्थगौरवस्य प्राणभूतम्। तच्च माघकाव्ये पदे-पदे अवलोक्यते। माघस्य अर्थगौरवसमन्वितः काश्चन सूक्तयस्तु सहृदयसमाजेऽतिप्रसिद्धाः। ताश्च समासतः उपस्थाप्यन्ते–

---

1. तत्रैव 2.86
2. तत्रैव 11.40
3. शिशु. 1.33

- सर्वः स्वार्थं समीहते।[1]
- सुकविः स्वीये काव्ये गुणत्रयमेवाश्रयते– 'नैकमोजः प्रसादो वा रसभावविदः कवेः।'[2]
- सन्तः सतामेव गृहाणि अनुगृह्णन्ति–'गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः।'[3]
- समय एव करोति बलाबलम्।[4]
- दैवदुर्विपाको दुर्निवारः। 'हतविधिलसितानां हि विचित्रो विपाकः।'[5]

**माघस्य पदलालित्यम्**

पदन्यासपटुता माघस्य वैशिष्ट्यम्। अतएव माघकाव्ये पदे पदे पदलालित्यमवलोक्यते। पदसौकुमार्यम्, वर्णमाधुर्यम्, भाषायाः सङ्गीतात्मकत्वम्, भावानुसारि भाषाश्रयणम्, भाषायामारोहावरोहक्रमश्च पदलालित्यं समेधयन्ति। भाषायाः सङ्गीतात्मकत्वं यथा–

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।**[6]

माघस्य यमकालङ्कारालङ्कृतं पदलालित्यं प्रसिद्धमुदाहरणम्। यथा–

**नवपलाशपलावशवनं पुरः**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्**
**स सुरभिं सुरभिं सुमनोभरैः।।**[7]

---

1. तत्रैव 2.65
2. तत्रैव 2.86
3. शिशु. 1.14
4. तत्रैव 6.44
5. तत्रैव 11.64
6. तत्रैव 6.20
7. तत्रैव 6.2

अने प्रकारेण स्पष्टं भवति यत् महाकविः माघः स्वस्मिन् काव्ये शिशुपालवधाख्ये सहृदयानां हृदयावर्जनीयान् सर्वगुणान् एकत्रीकृतवान्। दृश्यते जगति– 'भिन्नो रुचिर्हि लोकः' सर्वेषां जनानां रुचेरेकत्वं न प्राप्यते। अतएव समेषां सहृदयानाम् आनन्दवर्धनोद्देश्येन असौ महाकविः उपमार्थगौरव–पदलालित्यादिगुणानां लोकोत्तराणाम् एकत्रैव समावेशं विधाय काव्यानन्दपायिनां बहूपकारं कृतवान्। इत्यलम्।

✦✦✦

# माघे सन्ति त्रयो गुणाः

**डॉ. इमराना प्रवीन**
पूर्व-अतिथि-अध्यापिका-संस्कृतविभागः
जामिया-मिलिया इस्लामियाविश्वविद्यालयः, नवदेहली

शिशुपालवधप्रणेतुर्माघस्य पितामहः सुप्रभदेवः गुर्जरशासकस्य वर्मलातनाम्नो नृपस्य मन्त्री आसीत्। माघस्य पिता श्रीमाली गुजराती ब्राह्मणः दत्तको विद्वान् दानप्रसिद्धश्चासीत्। पितुर्दानशीलतायाः प्रभावो माघस्य उपरि पतितः। अतः असीमदानदोषेणायं निर्धनत्वं गतः।

वसन्तगढनामके स्थाने एकः शिलालेखः प्राप्तः, स हि ख्रीष्टब्दस्य 625 वर्षे उत्कीर्णो विद्यते, तत्र 'वर्मलात' इति नाम लिखितमस्ति। अतः ख्रीष्टाब्दस्य सप्तमशतकप्रारम्भो माघस्य समयो निश्चीयते।

महाकविमाघविरचितं 'द्वाविंशतिसर्गात्मकं शिशुपालवधम्' एकमात्रं तस्य काव्यग्रन्थमस्ति। काव्यमिदं माघकाव्यमिति नाम्नाऽपि प्रसिद्धम्। अत्र युधिष्ठिरराजसूययागे श्रीकृष्णेन कृतः शिशुपालस्य वधो मुख्यतया वर्णितः। महाभारतोक्ताम् इमां लघुकथां माघो वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्। संस्कृतसाहित्यस्य प्राचीनकविपरम्परायां माघकवेर्महती प्रशंसा कृताऽस्ति। अस्य सम्बन्धे अनेकाः सूक्तयः सन्ति -

**उपमाकालिदासस्य, भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः॥**

अपि च -

**तावद्भाभारवेर्भाति, यावन्माघस्य नोदयः॥**

अन्यच्च -

**काव्येषु माघः कविकालिदासः।**

माघकवेर्विपुला वर्णनशक्तिः शिशुपालवधे पल्लविता जाता, महती च उत्प्रेक्षा समर्थता स्वप्रभावं प्रकाशितवती।

**माघस्य शास्त्राध्ययन माघकाव्ये समहन्यतेव।**
**माघकाव्येऽलंकारयोजनासौन्दर्यं दुरपह्नवम्।।**[1]

श्रमसाध्यमपि इदं काव्यं चमत्कारपूर्णम् इति कवेः शक्तिमत्ता स्फुटा। व्याकरणस्य नानाविधाः प्रयोगाः अत्र प्रयुक्ताः दृश्यन्ते। मन्ये भट्टिकवेः प्रभावोऽस्य बुद्धौ समाविष्टः स्यात्।

माघकाव्ये स्पष्टता, मधुरता, उर्जस्वलता च सर्वत्र प्रकटीभवन्ति।

वीरोक्तिषु त्वस्य विशिष्टा प्रभावशीलता दृश्यते -

**अनृतां गिरं च गदसीति जगति पटहैर्विघुष्यसे।**
**निन्द्यमथ च हरिमर्चयतस्तव कर्मणैव विकसत्यसत्यता।।**

सर्वशास्त्रज्ञानसम्पदुपेतस्य माघस्य काव्ये भाषारमणीयकं कुत्रापि नापहीयते। शास्त्रीयतत्त्वानां काव्यम् अवतारण येन कौशलने माघेन कृता सोऽन्यत्र नावलोक्यते। व्याकरणसदृशस्य रूक्षस्यापि शास्त्रस्य काव्ये। "निहन्त्यरीनेक पदे य उदात्तः स्वरानिव" इत्याकारकः सरसः समावेशः कवेरस्य नैपुण्यं गमयति। माघस्य पदप्रयोगपाण्डित्यं दृष्ट्वा एव विद्वांसः "नवसर्गगते माघे नवशब्दो न विद्यते" इत्युक्तिं प्रचारयामासुः।

तदीया कविता नानाविधभूषायुता कामिनीव सगर्वं पदन्यास समाचरन्ती प्रचरति। माघकवौ प्रकृतिपर्यवेक्षणकृतपाण्डित्यमपि न न्यून-मासीन्तेन स्वकाव्यस्य एकादशे सर्गे प्रभातवर्णने प्रकृतेरनावृतं सौन्दर्यं प्रकटीकृतम्। रैवतकवर्णने च कोऽपि रमणीयः सौन्दर्यप्रकाशः प्रार्दुभावितः। रैवतकपर्वस्य वर्णने स्थितं घण्टापदघटितमिदं पद्यमेव माघस्य घण्टामाघतया प्रसिद्धिं व्यदधात्-

**उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ,**
**हिमधाम्नि याति चास्तम्।**

---

1. शिशु. 15.16

**वहति गिरिरयं विलम्बिघण्टाद्वय-**
**पारिवारितवारणेन्द्रलीलाम्॥**[1]

यद्यषि केषांचित् विदुषां मतमिदं यत् "माघे सन्ति त्रयो गुणाः" इति एषा भणितिः, कस्यापि माघभक्तस्य उक्तिरेव, किन्तु वास्तवे विद्यतेऽत्रापि सत्यता। माघे कालिदासवद् उपमावैशिष्ट्यं माभूत्, किन्तु तस्य कमनीयोपमालंकृतिभिः अलंकृता कविता कामिनी विभ्राजयते एव। एवम् भारविवन्माघे केवलम् अर्थगौरवम् मास्तु, किन्तु राजते तदीयं कवितासु कमनीयमर्थगौरवमपि। दण्डिनः पदलालित्यं तु अस्त्येव, परन्तु माघस्य अपि पदलालित्यं कथमपि न्यूनं नास्त्येव। अस्य शब्दशय्या तु प्रसिद्धतमा, नात्र मनागपि शब्दक्रमाविपर्ययो विधातुं शक्यते। अत एव सर्मज्ञस्य धर्मपालस्य भणितिरेषा सर्वथा सत्यानुप्राणिता प्रकाशते संस्कृत-वाङ्मये -

**माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे।**
**स्मरन्तो भारवेरेव कवयः कपयो यथा॥**

**1. माघस्य उपमावैशिष्ट्यम्:-**

भाग्य-पुरुषार्थतयोः द्वयोरपि परस्परापेक्षित्वम् अनिवार्यत्वेन अंगीकरणं च तथैवावश्यकम् यथा सत्कवये शब्दार्थयो र्द्वयोरपि संग्रहः-

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥**[2]

नीतिशास्त्रविदग्धतां विशदयता तेनोच्यते यद् यथा स्वक्षेमकामेन वृद्धिं प्राप्नुवन् रोगो नोपेक्ष्यः तथैव एधमानोऽरातिरपि उपेक्षाम् नार्हति -

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**
**समौ हि शिष्टैराम्नातौ वत्स्र्यन्तावामयः स च॥**[3]

1. शिशु. 4.20
2. शिशुपाल 2.86
3. शिशुपाल 2.10

उपमाप्रयोगे शास्त्रीयस्य पाण्डित्यस्यापि अपूर्वः समन्वयो दरीदृश्यते। सांख्यादर्शनानुसारं पुरुष उदासीनो कर्त्ता च, परन्तु वृद्धि कृत कर्मणां फलभाग् भवति। तथैव साक्षिमात्रेऽपि कृष्णः सेनाकृतविजयस्य फलाभोक्ता भविष्यति -

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।**
**फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।।**[1]

नारद-श्रीकृष्णयोः सितसिते कान्ती तथैवावरोचयतां यथा रात्रौ पत्रान्तरगोचराः सुधांशोर्मरीचयः -

**स्थांगपाणेः पटलेन रोचिषाम्,**
**ऋषित्विषः संवलिता विरेजिरे।**
**चलत्पलाशान्तरगोचरास्तरो,**
**स्तुषारमूर्तेरिव नक्तमंशवः।।**

**2. माघस्यार्थगौरवम् :-**

पदे-पदे प्रेक्ष्यते अर्थगौरवं माघे यद्यपि, तथापि द्वितीयः सर्गः सर्वातिशयी। तत्र प्रतिपदम् अर्थगौरवं दृग्गोचरताम्। उपयाति। अत्रापि तस्य बहुज्ञता, सूक्ष्मेक्षणदक्षता, दूरदर्शिता, राजनैतिकविदग्धता, कल्पना-काम्यत्वं, व्यवहारपटवं, लोकाराधनक्षमत्वं च समीक्ष्यते। तस्य कतिपयानि पद्यानि सुभाषितरूपेण प्रयुज्यन्ते, यथा-

कृष्णं राक्षससमूहं विनाशयितुम् एव समर्थः, यथा रवेः मरीचयः तमोनिचयम् अपाकर्तुं समर्थाः भवन्ति -

**ऋते रवेः क्षालयितुं क्षमेत कः**
**क्षपातमस्काण्डमलीमसं नभः।।**

मनस्विातायाः स्वाभिमानस्य च गुणगौरवं वर्णयन् महाकविः आह-

**सदाभिनैकधना हि मानिनः।।**[2]

---

1. शिशुपाल 2.59
2. शिशुपाल 1.67

श्रीकृष्णवर्णने सांख्योक्तपुरुषवर्णनं महाकविना माघेन प्रस्तूयते –

**उदासितारं निगृहीतमानसै-**
**र्गृहीतमध्यात्मदृशा कथंचन।**
**बहिर्विकारं प्रकृतेः पृथग्विदुः**
**पुरातनं त्वां पुरुषः पुराविदः॥**[1]

माघेन प्रदत्तं रमणीयतायाः लक्षणं तस्य बुद्धिवैशारद्यमेव प्रकटयति–

**क्षणे-क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः॥**[2]

अपि च–

**सर्वः स्वार्थं समीहते।**

**महान्तो महद्भिरेव विवदन्ते, नाधमैः।**

**परिभवोऽरिभवो हि सुदुःसहः।**

**कट्वपि भेषजं गदहरि।**

**गृहानुयैतुं प्रणयादभीप्सवो**
**भवन्ति नापुण्यकृतां मनीषिणः।**

**स्त्रीणां रोदनं बलम्।**

एवम् अर्थगौरवे तु माघस्य वैशिष्ट्यमद्वितीयमेव।

**3. माघस्य पदलालित्यम् :-**

पद–सौकुमार्यं वर्णमाधुर्यम्, भावानुसारिभाषाश्रयणं संगीतात्मकत्वञ्च पदलालित्यं समेधयति, यत् माघे पदे–पदे प्राप्यते, यथा–

**मधुरया मधुबोधितमाधवी,**
**मधुसमृद्धि-समेधितमेधया।**

**मधुकराङ्गनया मधुरून्मद,**
**ध्वनिभृता निभृताक्षरमुज्जगे॥**[3]

---

1. शिशुपाल 1.33
2. शिशुपाल 4.17
3. शिशुपाल 6.20

अपि च–

**नवपलाशपलाशवनं पुरः,**
**स्फुटपरागपरागतपंकजम्।**
**मृदुलतान्तलतान्तमलोकयत्**
**स सुरभिं सुरभिं सुमनोभरैः॥**[1]

अन्यच्च–

**मधुसमृद्धिः-समेधित मेधया।**
**मधुकराङ्गनया मधुरून्मद्,**
**ध्वनिभृता निभृताक्षरमुज्जगे॥**[2]

इत्थं सुस्पष्टं यत् श्रीमाघे अलंकृतिनिवेशकुशलता, स्वल्पशब्दैः महतोऽर्थस्य प्रतिपादनक्षमता, पदलालित्यं च त्रयो गुणाः सन्त्येव॥

✦✦✦

1. शिशुपाल 6.2
2. शिशुपाल 6.20

# माघे सन्ति त्रयो गुणाः

**डॉ. सुमेधा**
पूर्वशोधच्छात्रा, साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय–
संस्कृतविश्वविद्यालय, नवदेहली–110016

शिशुपालवधमहाकाव्यस्य प्रणेतुर्माघस्य परिचयरूपेण डॉ. कीलहॉर्न–महोदयः राजपुतानाक्षेत्राद् वसन्तगढस्थानात् वर्मलाताव्यस्य कस्यचिद् राज्ञः 682 विक्रमाब्दस्य अर्थात् 625 तमस्य वर्षस्य एकं शिलालेखं प्राप्तवान्।

कीलहार्नमहोदयानुसारेण वर्मलातः श्रीवर्मलश्च एक एव आसीत् यः माघस्य पितामहस्य सुप्रभदेवस्य आश्रयदाता आसीत्। अतः सुप्रभदेवस्य समयः 625 ई. इति मन्यते। अथ च तस्य पौत्रस्य माघस्य अनुमानितस्य 657 विक्रमाब्दः इत्यतः 757 विक्रमाब्दपर्यन्तं स्वीक्रियते।[1]

"शिशुपालवधस्य कतिपयहस्तलिखितविवरणेषु याः पुष्पिकाः सम्प्राप्यन्ते तासु अयं भिन्नमालावास्तव्यः सिध्यति।[2] भिन्नमातः अथवा भीनमालः नामाख्यं नगरमिदं वर्तमाने पश्चिमराजस्थानान्तर्गते आवूपर्वतस्य लुनानद्याश्च मध्ये अस्ति।[3]"

मुख्यः– मम्मटाचार्येण स्वकीये काव्यप्रकाशे गुणाः परिभाष्यन्ते यत्–

---

1. Kill Horn- Journal of the Royal Asiatic Society 19.8 Page 409
2. प्रभाचन्द्र- 14.5–10 ग्रन्थानाम–प्रभावक चरित
3. संस्कृतवाङ्मयस्य बृहद् इतिहासः पृ.सं. 146

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवाऽऽत्मनः।**
**उत्कर्ष हेतवस्ते स्युश्चस्थितयो गुणाः॥**[1]

अर्थात् गुणाः आत्मनः धर्माः भवन्ति न च शरीरस्य। शरीरस्य शोभाधायकास्तु अलङ्काराः कथ्यन्ते। उक्तं हि काव्यप्रकाशे –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥**[2]

अत्र कारिकायां वर्णिता उपमादय अलङ्कारा प्रायशः सर्वैरेव आचार्यैः स्वीक्रियन्ते न च गुणरूपेण। तत्कथमत्र आलोचकैः माघे सन्ति त्रयो गुणः इत्युक्त्वा कालिदासस्य उपमा गुणः मन्यते।

पदानां लालित्यं रीतिः भवितुं शक्यते परमत्र तु एतदपि गुणेषु स्वीक्रियते। अर्थगौरवं शब्दशक्तिः भवितुं शक्यते परं कथमत्र गुणरूपेण कथ्यते। किम् एते एव गुणाः? आचार्यमम्मटेन अथ च विश्वनाथेनापि गुणत्रयमेव स्वीक्रियते–

**माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश।**[3]

वामनोक्त दशगुणेष्वापि उपमापदलालित्यार्थगौरवादीनां परिगणनं नास्ति। तत्कथमत्र माघे सन्ति त्रयो गुणाः इति कथ्यते? अत्र ध्येयं यत् गुणाः वैशिष्ट्यार्थे प्रयुक्तास्सन्ति। उक्तिरियम् आलोचकै उक्तमस्ति यत्[4]–

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

अत्र ध्येयं यत् यद्यपि माघः स्वकाव्ये एतेषां त्रयाणामेव वैशिष्ट्यानां समाहारं विद्यते तथापि उपमाप्रयोगे स कालिदासं नातिशेते अर्थगौरवे च भारविं नातिशेते। पदलालित्यं नूनमेव तस्य अपूर्वं खलु।[5] महाकविर्माघ

1. काव्यप्रकाशकारिका- 66(8.1)
2. काव्यप्रकाशः (कारिका)
3. काव्यप्रकाश–कारिका–68
4. काव्यालङ्कारसूत्रम्- 3.1.4
5. संस्कृतनिबन्धसुरभिः- पृ.सं. 175

एतेषां त्रयाणामेव प्रयोगे सिद्धहस्तः परमकौशलत्वं च भजते इति विचारः अनेन श्लोकेन प्रतिपादितः।

माघप्रणीतं शिशुपालवधमेकमेव महाकाव्यम् अद्यत्वे प्राप्नोति, परन्तु केषुचित् सूक्तिसंग्रहेषु माघकृतश्लोकाः संप्राप्यन्ते ये शिशुपालवधे न सन्ति। अद्यत्वे नोपलभ्यते।[1]

सर्वप्रथममेतत् ध्येयं यत् महाकविः कालिदासः संस्कृतजगति स्वोपमायाः कृते प्रसिद्धोऽस्ति। संस्कृतवाङ्मये लघुत्रयीबृहत्त्रयी इति नाम्ना केचन ग्रन्थाः प्रसिद्धाः सन्ति। येषु लघुत्रयी इति नाम्ना प्रसिद्धाः त्रय एव ग्रन्थाः कवेः कालिदासस्य। ते सन्ति रघुवंशं मेघदूतं कुमारसम्भवञ्च। एते ग्रन्थाः कालिदासस्य उपमायाः कृते एव लघुत्रयीग्रन्थेषु परिगण्यन्ते। माघोऽपि उपमायाः क्षेत्रे कालिदासमनुकरोति परन्तु नातिशेते कालिदासम्। माघस्योपमा पाण्डित्यपूर्णास्तु सन्त्येव सार्धमेव स्वकीयं लक्ष्यमपि प्राप्नुवन्ति। अस्मिन् प्रसङ्गे श्लोकोऽयं प्रस्तूयते।

**त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम्।**
**प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव॥**[2]

अत्र श्लोके माघस्य उपमाप्रयोगानन्तरमपि कीदृशमपि शैथिल्यं भावे न समायाति। इतोऽपि माघस्योपमाप्रयोगम् अवलोकयामः–

**दधानमम्भोरुहकेसरद्युतीर्जटाः**
**शरच्चन्द्रमरीचिरोचिषम्।**
**विपाकपिङ्गास्तुहिनस्थलीरुहो**
**धराधरेन्द्रं व्रततीततीरिव॥**[3]

**विद्वद्भिरागमपरैर्विवृतं कथञ्चि**
**च्छ्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः।**

---

1. संस्कृत निबन्ध शतकम्– पृ.सं. 112
2. शिशुपालवधम्– 2.39
3. वही. 1.5

**श्रेयान्द्विजातिरिव हन्तुमघानि दक्षं**
**गूढार्थमेष निधिमन्त्रगणं बिभर्ति॥**[1]

इह प्रथमे श्लोके नारदस्य पर्वतराज्ञा हिमालयेन सह अथ च द्वितीये पद्ये रैवतकपर्वतस्य श्रेष्ठोद्विजेन सह साम्यं कुर्वन् कविर्माघः उपमाप्रयोगे उत्कृष्टं चमत्कारं प्रस्तौति।

अतः परं विचारयामः माघस्य अर्थगौरवविषये, यद्यपि स्वकीये काव्ये अर्थगौरवप्रयोगे महाकविर्भारविः प्रसिद्धः। परं महाकविर्माघोऽपि भारवेः साम्यं भजते अर्थगौरवे इह प्रस्तूयते। प्रथमं भारवे अर्थगौरवस्य उदाहरणं भवतां पुरस्तात्

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**[2]

एवमेव निखिले ग्रन्थे भारवेः सूक्तीनां माध्यमेन तादृशं भावगाम्भीर्यम् अर्थगौरवञ्च समुत्पद्यते यत् जीवनोन्नायकत्वं भजते। अतः माघोऽपि तमनुसरन् शिशुपालवधं विरचितवान्। अत्र माघविरचितानि अर्थगौरवस्य उदाहरणानि–

**अपशङ्कमङ्कपरिवर्तनोचिताश्चलिताः पुरः पतिमुपैतुमात्मजाः।**
**अनुरोदितीव करुणेन पत्त्रिणां विरुतेन वत्सलतयैष निम्नगाः॥**[3]

अन्यच्च–

**उदयशिखरिशृङ्गप्राङ्गणेष्वेव रिङ्गन्**
**सकमलमुखहासं वीक्षितः पद्मिनीभिः।**

**विततमृदुकराग्रः शब्दयन्त्या वयोभिः**
**परिपतति दिवोऽङ्के हेलया बालसूर्यः॥**[4]

---

1. वही. 4.37
2. किरात. 2.30
3. शिशु. 4.47
4. शिशु 11.47

अत्र प्रथमे पद्ये वर्ण्यते यत् यथा क्रीडाक्रीडिता कन्या यदा पत्युः पार्श्वे गच्छति, तदा पिता वात्सल्येन रुदति तथैव अत्र रैवतकपर्वतस्य क्रोडाक्रीडिताः नद्यः यदा समुद्रं गच्छन्ति तदा पक्षिणां कलरवेण एवं प्रतीयते। यत् नदीनां पितातुल्यः रैवतकपर्वतः रुदन्नास्ति। एतादृशम् अर्थगौरवं माघकाव्ये प्राचुर्येण समुपलभ्यते। द्वितीये पद्ये वर्ण्यते यत् प्रातःकालस्य बालसूर्यः यदा स्वरक्तरश्मिन् प्रसार्य आकाशं प्रति गच्छति, अथ च पक्षिणोऽपि कलरवं कुर्वन्ति तदा प्रतीयते यत् आकाशरूपिणी माता हस्तौ प्रसार्य बालस्वरूपं सूर्यम् आह्वयति। एतादृशं भावपूर्णं मनोहरं चमत्कारजनकञ्च अर्थगौरवं शिशुपालवधे प्राचुर्येण समुपलभ्यते।

यद्यपि माघस्य अर्थगौरवं श्लाघनीयं परमेतत् भारविं नातिशेते।[1]

सम्पूर्णग्रन्थावलोकनेन ज्ञायते यत् माघः भारविमेव अनुसरति यतोहि अत्र किरातार्जुनीयशिशुपालवधयोः पर्याप्तं साम्यं प्राप्नोति। उभयोरेव महाकाव्ययो उपजीव्यत्वं महाभारतम् भजते। उभयोरेव प्रारम्भः श्री[2] शब्देन भवति। उभयोरेव प्रथमे सर्गे राजनैतिकं वर्णनं प्राप्यते। किराते यदि किरातयुधिष्ठिरसंवादोऽस्ति चेत् शिशुपालवधे नारदकृष्णसंवादः खलुः। यदि किराते व्यासः पाण्डवानां पथप्रदर्शकः चेत् शिशुपालवधे नारदः। उभयोरेव काव्ययोः महाकाव्यस्य सर्वाणि निर्धारितलक्षणानि प्राप्नुवन्ति। उभयोरेव काव्ययोः चित्रकाव्यानि सन्ति। किराते यदि शिवार्जुनयोः युद्धमस्ति। एतावत् साम्येन ज्ञायते यत् माघकाव्ये मौलिकताया अभावस्तु दृश्यते।

डॉ. कपिलदेवद्विवेदिमहोदयः कथयति यत् माघः पदलालित्ये दण्डिनमवध्यमेव अतिशेते।[3] माघस्य पदलालित्यं दण्ड्यापेक्षया उत्कृष्टं खलु। प्रथमं तु दण्डिनः पदलालित्योदाहरणं पश्यामः। यथा–

अनवरतं यागदक्षिणारहितशिष्टविशिष्टविद्यासम्भारभासुरभूसुरनिकटः राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यहृद्यनिरवद्यरूपो भूपो बभूव। राजहंसस्य महिषी वसुमती लनाकुलललामभूता अभूत्। तस्य वसुमती नाम सुमती

---

1. निबन्धशतकम् पृ.सं. 112
2. विराट 1.1 शिशु 1.1
3. निबन्धशतकम्– पृ.सं. 112

लालीवती कुलशेखरमणी रमणी बभूव।[1] यद्यपि दण्डिनः पदलालित्यं रमणीयं परं माघस्य पदलालित्यम् इतोऽपि रमणीयम्। यथा–

**मधुरया मधुबोधिमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिर्भृता निभृताक्षरमुज्जगे॥**[2]

अत्र पद्ये पदानां सुन्दरप्रयोगः संगीतात्मकतां जनयति। येन पदलालित्यम् उत्कृष्टतां भजते। पदलालितस्य एकमुदाहरणम् एतदपि–

**कुमुदवनमपश्रि श्रीमदम्भोजखण्डं**
**त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।**
**उदयमहिमरश्मिर्याति शीतांशुरस्तं**
**हतविधिलसितानां ही विचित्रो विपाकः॥**[3]

एतादृशं पदलालित्यं नूनमेव माघं सर्वोत्कृष्टं स्थानं प्रापयति। अस्य श्लोकस्य विषये एका किंवदन्ती प्रचलिता यत् अस्य पद्यस्य एकेनैवाक्षरेण "ही" इत्यनेनं लक्ष्मुद्रा प्रदत्ता।[4] इतोऽपि पदे पदे पदलालित्यवन्तः श्लोकाः सम्प्राप्यन्ते माघकाव्ये। पुनरेकवारं चिन्तयामः यत् कालिदास उपमायाः क्षेत्रे भारवि अर्थगौरवक्षेत्रे अथ च दण्डिः पदलालित्यक्षेत्रे उत्कृष्टत्वं भजते परं माघस्तु सर्वाणि वैशिष्ट्यानि धारयति। अतः सम्यगुक्तम्–

**माघेसन्ति त्रयो गुणाः।** इति

माघविषये आलोचकैः उक्तमस्ति यत्–

**नवसर्गगते माघे नवशब्दो न विद्यते॥**[5]

अर्थात् माघस्य शब्दभण्डारः एतावान् विशालोऽस्ति यत् नवसर्गपर्यन्तं कविना पृथग्पृथग्शब्दाः प्रयुक्ताः। इतोऽपि कविना भारविवत् एकमेव शब्दमधिकृत्य श्लोकाः विरचिताः। यथा–

---

1. पूर्वपीठिया–उच्छ्वास–1
2. शिशु. 6.20
3. शिशु. 11.64
4. शिशु भूमिका हरगोविन्द शास्त्री
5. संस्कृत साहित्य का बृहद् इतिहास–पृ.म.–264

**दाददो दुद्दुदावी दादादो दूददीददो।**
**दुददादं दददे दुद्दे ददाददददोऽददः।।**

चक्रबन्धस्य उदाहरणम् एतत्। एतोऽपि सर्वतोभद्रस्य उदाहरणमत्र प्रस्तूयते–

**स का र ना ना र का स,**
**का य सा द द सा य का।**
**र सा ह वा वा ह सा र,**
**ना द वा द द वा द ना।।**[1]

**निष्कर्षः–**

"माघे सन्ति त्रयो गुणा" इति कथनेन गुणानां तात्पर्यं वैशिष्ट्यमस्ति न च माधुर्योजादयः गुणाः। अत्र विचारणीयं यत् शिशुपालवधस्य उपजीव्यं महाभारतमस्ति। रघुवंशादिग्रन्थानाम् उपजीव्यं रामायणमस्ति। तदपि उपमाकालिदासस्य कथनमिदं समीचीनमस्ति किम्? किं रामायणे उपमाप्रयोगः नास्ति। यद्यपि सुन्दरकाण्डस्तु सम्पूर्णमेव उपमायाः कृते प्रसिद्धः तदपि कथनमिदमुचितं किम्? किं महाभारते उपमाप्रयोगः नास्ति? अस्य समाधानमिदं यत् तत्र उपमाप्रयोग अस्ति, परन्तु प्रसङ्गस्य विशालत्वेन तादृशं चमत्कृतित्वं नायाति। द्वितीयं महाभारते शिशुपालवधे वधस्य घटना नास्ति किं किं तत्र घटनेयं शिशुपालवधापेक्षया न्यूनतां भजते? अत्र ध्येयं यत्तत्र वर्णितान् भजते? अत्र ध्येयं यत् तत्र वर्णितान् केचन एव सर्गानधिकृत्य अत्र एकं महाकाव्यमेकं निर्मितमस्ति। अतो अत्र उत्कृष्टता स्वाभाविकी। महाभारतम् ऐतिहासिकग्रन्थः खलु। अतः शिशुपालवधमपि ऐतिहासिकत्वमुपयाति। महाकविर्माघः कालिदासभारविदण्डिप्रभृतीनां काव्यविरचनक्षेत्रे साम्यं भजते। अतः समीचीनमिदं–

**माघे सन्ति त्रयो गुणाः।**

✦✦✦

1. शिशु. 27

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016